மேற் கண்டவை உறிச் சொற்கள் ஆதலின் பெயர்ச் சொற்களுக்கு ஏற்ப வர வேண்டும். ஒத்தறியும் வகையைச் சார்ந்த சொற்கள் புல்லிங்கத்தில் வரும், विद्वस् शब्द போன்றவை. स्थेयान्, स्थेयांसौ, स्थेयांसः போன்றவை प्रेयसी, ज्यायसी என नदी போன்று स्त्रीलिंगத்தில் ई சேர்த்தவுடன் அவை ईकारान्त மாகின்றன. श्रेयः श्रेयसी, श्रेयांसि என यशस् शब्द போன்று அவை नपुंसकलिंगத்தில் வருகின்றன. (क्षिप्र = விரைவாக, उरु = அகன்று, पटु = புத்திசாலியான, कृश = ஒல்லியான, दृढ = கெட்டியான पृथु = அகலமான भृश = அதிகமான ऋजु = நேரான अन्तिक = அருகில், क्षुद्र = கருமியான, மட்டமான, गुरु = கனமான, प्रशस्य = புகழ்வதற்கு ஏற்ற बहुल = பலவகையான बाढ = உறுதியான, स्थूल = பருத்த, स्फिर = பெரிதான.)

---

* स् க்கு பதிலாக ,, என்ற குறி இடப்பட்டிருக்கிறது

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

பயிற்சி

I கீழ்க்கண்ட சொற்களை வைத்து வாக்கியங்கள் அமைக்க :

(1) अलं (2) अधिवसति (3) स्निह्यति (4) स्वस्ति (5) अक्रुध्यत् (6) द्विशः (7) मा (8) निकषा (9) प्रति (10) अन्तरेण

II திருத்தி எழுதுக:

1 अस्माकम् गृहाणां परितः उद्यानानि सन्ति। 2 बालाः गजानां भयेन धावन्ति। 3 ये पितृन् न स्निह्यन्ति, तेभ्यः धिक्। 4 अस्मिन् ग्रामे भक्ताः अधिवसन्ति। 5 रामः सीतां अपरित्यजत् 6 लक्ष्मणः रामं अनुगच्छत् 7 मेघाः वृष्ट्वा नद्यः जलपूर्णाः अभवन्। 8 आकाशे नक्षत्राणि प्रकाशितुं शिशवः अभिलषन्। 9 बालाः पाठशालां गन्तुं माता आजग्राह। 10 सिंहा गर्जित्वा मृगा अधावन्।

तं द्रष्टुं = तस्य दर्शनाय। मां दृष्ट्वा = मम दर्शनात्

III கீழ்க்கண்ட செய்யுளின் अन्वय, सार ஆகியவற்றை எழுதிச் சொற்களின் வகைகளைக் கண்டறியவும்.

चारुदत्त என்ற பணக்கார வணிகன் தன்னுடைய உதார குணத்தினுல் மிகவும் ஏழையானுன். மனம் வெறுத்து தன்னுடைய முன்னுல் செல்வாக்கையும், இந்நாள் இழி நிலையையும் எண்ணி அவன் புலம்புகிருன். வறுமைதான் கவலைகளையும் இடையூருக தோற்றுவிக்கிறது, என அவன் கூறுகின்ருன்.

दारिद्र्याद् ह्रियमेति, ह्रीपरिगतः प्रभ्रश्यते तेजसो,
निस्तेजाः परिभूयते, परिभवात् निर्वेदमापद्यते।
निर्विण्णः शुचमेति, शोकपिहितो बुद्ध्या परित्यज्यते,
निर्बुद्धिः क्षयमेत्यहो! निधनता सर्वापदामास्पदम्॥

ह्रीः = लज्जा (கூச்சம், வெட்கம்)

परिगतः पिहितः = பாதிக்கப்பட்ட निर्वेदः = வெறுப்பு एति = प्राप्नोति। शुचं = शोकं। क्षयं एति अहो।

IV धनिन् महिमन्, राजन् लट्வின் எல்லா வகைகளையும் இரு பதங்களிலும் எழுதுக.

V இதுவரை கற்ற செய்யுட்களையும், இனி கற்கப் போகும் செய்யுட்களையும் மனப் பாடம் செய்ய வேண்டும்.

அடுத்த பாடம் एकभारतं என்ற நாடகம் பாடத்தின் அங்கமாக சேர்க்கப்பட இருக்கிறது. இது மாணவர்கள் ஸம்ஸ்கிருதத்தில் பேச்சுவார்த்தை நன்கு அறியவே செய்யப் படுகிறது. 30வது பாடத்திற்குப் பின்னர் இது விரிவாக கற்பிக்கப்படும்.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकविंशो दिवसः

ह्यः पठितानां पञ्चानां पद्यानां सारं संक्षेपतः कथयित्वैव अद्यतनस्य पाठस्यारंभः समुचित इति मन्ये ।

रघोः दिग्विजयार्थं गजादीनां सेनांगानां अत्युत्साहः आक्रमणशक्तिश्च समजायेतां इति आद्येन वर्ण्यते ।

शरदागमने एव सप्तपर्णाः कुसुमिताः भवन्ति । तेषां कुसुमानि गजानां मदजलानीव सुरभिलानि च संपद्यन्ते । तेन सुगंधिर्वायुः अन्तरिक्षे प्रसरति । तेषामेव सप्तपर्णानां प्रकाण्डेषु सैन्यगजाः शृङ्खलिता वर्तन्ते । ते गजाः सप्तपर्ण-कुसुमसुरभिलेनानिलेन आहताः भवन्ति । तेन वायुना आहन्यमानाः ते गजाः स्पर्धालवश्च जायन्ते । तेषां कीदृशी स्पर्धा आसीत् ? अहो, अयं सप्तपर्णो वृक्षः । एकस्मिन् पत्रे सप्त पर्णानि अथवा सप्तधा विभिन्नानि दलानि सन्तीत्यनेन तस्य सप्तपर्ण इति संज्ञा संजाता । गजाः एवं विचिन्तयन्ति । "एते सप्तपर्णाः अस्मान् गन्धेन निघ्नन्ति । तर्हि वयमपि तान् गंधेनैव प्रहराम । ते सप्तपर्णाः खलु । वयमपि सप्तभिर्द्वारैः मदजलं प्रवाहयेम ।" इति विचिन्तयन्त इव ते गजाः सप्तपर्णपुष्पसुरभिलं मदजलं सप्तभिर्द्वारैः प्रस्रावयन्ति स्म । गजानां मदजलं सप्तभिः द्वारैः प्रवहतीति गजशास्त्रे प्रसिद्धम् । शुण्डाद्वाराभ्यां मस्तकपार्श्वाभ्यां नेत्राभ्यां लिंगात् च ।

अथ तृतीयं पद्यम् विवियते । यदि विजिगीषया प्रस्थितस्य कस्यचित् राज्ञः मध्येमार्गं नद्यः सलिलपूर्णा स्युः तर्हि तासां तरणाय स न शक्नुयात् । तस्माद् राजानः न खलु वर्षासु जैत्रयात्रोत्सुका भवन्ति । अधुना तु शरत् कालः समायातः । नद्यः अल्पजलाः गाधाश्चाभवन् । एवमेव यदि मार्गाश्च पङ्किला भवेयुः तर्हि ससैन्यस्य तस्य गमनं दुष्करं स्यात् । यथा अद्यतने काले भारते पन्थानः दृश्यन्ते, तथा रघोः काले सुदीर्घाः राजपथा नासन् । अधुना तु आसेतुहिमाचलं वाहनगतागतयोग्याः पन्थानः सन्ति खलु । यथाधुना, तथा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्मिन् काले न सरितां सेतवः अविद्यन्त । न च पर्वतपंक्तयः सुचराश्चाभवन् । एवं तस्मिन् काले वर्षासु पन्थानः पंकिला एवाविद्यन्त । शरदृतौ आयाते, ते मार्गाः क्रमशः शुष्कपंका अजायन्त । एवं तस्य रघोः मार्गान् यात्रायै सज्जीकुर्वाणा सा शरत् सर्वेभ्योपि प्रथमतः रघुं दिग्विजयार्थं प्रेरयामास ।

प्रायशः तिस्रः शक्तयः नृपान् दिग्विजयाय प्रेरयन्ति । प्रभुशक्तिः, मन्त्रशक्तिः, उत्साहशक्तिश्चेति । लब्धप्रतिष्ठस्य सैन्यसम्पत्समृद्धस्य प्रभोः शक्तिरेव प्रभुशक्तिः । सचिवादीनां नयोपायोपदेशविचक्षणानां शक्तिरेव मन्त्रशक्तिः । एतस्मात् प्रभुमन्त्रशक्तिद्वयात् अतिरिक्ता शक्तिरेवोत्साहशक्तिः । सा शक्तिस्तु केवलं धैर्यादुल्लासाच्च संजायते । एतत् शक्तित्रयमेव राज्ञः दिग्जयाय प्रेरयति । तदतिरिक्तां प्रेरणां प्रथमतः शरद् तस्मै अदादिति भावः ।

अथ तृतीयं पद्यं विवृणोमि । दिग्विजययात्रायाः पूर्वमेव गजतुरगादिकान् पुरोहिताः नीराजयन्ति । कस्मिंश्चित् स्थालीविशेषे दूर्वायवांकुरादिकानि मंगलद्रव्याणि निधाय हुतवहं प्रज्वाल्य धूपैः दीपैः मंत्रोच्चारणपूर्वकं पुरोहितैः क्रियमाणमण्डलरीत्या भ्रमणमेव नीराजनम् नाम । उत्तरभारतेषु आरती केरलेषु दीपाराधनः च नीराजनायाः प्रकारान्तराणि । एवं नीराजनायां पुरोहितैः क्रियमाणायां, हुतभुजो ज्वाला प्रदक्षिणं जज्वाल । तथा दक्षिणेन ज्वालन्त्याः ज्वालायाः भ्रमणं कविरुत्प्रेक्षते ; अग्निः स्वयं प्रसन्नो भूत्वा रघवे स्वहस्तेनैव जयं दत्तवानिति ।

अथ चतुर्थेन रघोः प्रस्थानमाह । यदा रघुः दिग्जयाय बहिर्गच्छति तदा मूलनगरं अनाथं भवति । ततः तत्संरक्षणार्थं प्रथमत एव सर्वमपि सज्जीकरणं कृतम् । अथ स्वस्यासान्निध्ये समीपस्थाः राजानः आक्राम्येयुः इति मत्वा रघुणा स्वसाम्राज्यस्य प्रान्तप्रदेशेषु संरक्षणार्थं च संविधाः कृताः । अभिमुखमापततः नृपान् जित्वा जित्वा रघुः पुरोगच्छति । "तदा विजितपूर्वाः पश्चात्कृताश्च नृपाः कदाचित् पश्चाद्भागात् आक्रमणं कुर्युः", एवं विचिन्त्य तेषामाक्रमणोद्यमं असाध्यं कृत्वा पार्ष्णिभागं च निष्कण्टकमकरोत् । एवं सर्वेषामपि संरक्षणार्थं सर्वाण्यपि सज्जीकरणानि कृत्वा विजयलाभार्थं ब्राह्मणपूजान्नदानादिकान् मंगलविधीन् विधाय स प्रस्थितवान् । तस्य सैन्यं षड्विधमासीत् । षड्विधं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सैन्यं तु "मौलं भृत्यः, सुहृद्, श्रेणी, द्विषद् आटविकं, बलं" इति कोशे दृश्यते। मोलं = मूल(केन्द्र)सम्बन्धि)

स रघुः राजगृहात् निष्क्रम्य गोपुरद्वारमतीत्य मुख्यरथ्यां प्रविशति स्म। सर्वे पौराः सर्वाः पौर्यश्च तदा मंगलकर्माण्याचेरुः। तेष्वतिगौरवात् वृद्धयोषितां आशिराचरणानि अत्र कथ्यते। पुरा देवा असुराश्च क्षीरोदधिं अमथ्नन् इति कथा प्रसिद्धा खलु। तदा मन्दरपर्वतस्य घर्षणेन अथवा भ्रमणेन पयः कणिका अवाकीर्यन्त। ताः सर्वतः शुभ्राः क्षीरसागरवीचयः तान् पयः कणान् महाविष्णोरुपरि विकिरन्ति स्म। तद्वत् अत्रापि शुभ्रवसनाः शुभ्रस्मिताः शुभ्रकेशिन्यश्च ताः वृद्धयोषितः रघोः शिरसि लाजानवाकिरन्।

अथ अद्य पठितुं निर्धारितं पद्यपञ्चकं व्याख्यायते। अस्माकं महाराजो रघुरधुना प्रथमत एव प्राचीं दिशं गच्छति। पाठारंभात् प्रागेव रघोः मार्गस्य परिचयः दीयते। रघुर्येन येन मार्गेण दिग्विजयाय गतवान् स स मार्गः परिचीयताम्।

प्रथमं स अयोध्यानगरात् (अधुना तु तत् नगरं उत्तरप्रदेशे अन्तर्भवति) प्राचीं दिशं जगाम। ततः वंगदेशं गत्वा तत्रत्यान् नृपान् विजित्य उत्कलदेशेन (उडिया) कलिंगान् (आंध्र) प्राप्य तत्रत्यं महेन्द्रनाथं जित्वा दाक्षिणात्यान् माण्ड्यान् केरलान् च विजित्य अपरान्तप्रदेशेन (पश्चिमसमुद्रतीरप्रदेशेन) गत्वा पारसीकान् विजित्य हिमाचलमारुह्य तदनन्तर्गतान् नृपानुन्मूल्य नेपाल-मार्गेणावतीर्य अयोध्यां न्यवर्तत। प्रथमतः प्राचीं प्रति दिशं प्रति यात्रां वर्णयति।

28 स ययौ प्रथमं प्राचीं तुल्यः प्राचीनबर्हिषा।
अहितान् अनिलोद्धूतैः तर्जयन् इव केतुभिः॥

अहितान् अनिलोद्धूतैः तर्जयन् इव।

अहितान् अनिलोद्धूतैः केतुभिः तर्जयन् इव स रघुः दिग्विजययात्रामा-रभते। प्रथमं स पूर्वां दिशं प्रति प्रतस्थे। प्राचीनबर्हिः इन्द्रः। रघुः प्राचीनब-र्हिषा तुल्य आसीत्। स कथं जगाम? यात्रायां सैन्यानामग्रे पताकासहितो ध्वजः अदृश्यत। तेन ध्वजेन स शत्रून् तर्जयन्निव जगाम। अंगुष्ठसन्निहिताया

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अंगुल्याः तर्जनीति संज्ञा जाता। तर्जनं तु तां अंगुलीं उन्नमय्य 'पश्य पश्य' इति भीषणभाषणमेव खलु। अत्र ध्वजेन तर्जन्या स शत्रून् अभीषयदिति च।

प्राची=पूर्वा दिक्। प्राचीनबर्हिः (सकारान्तः)=इन्द्रः। अनिलोद्धूतैः=पवनेन प्रकम्पितैः। केतुः=ध्वजः। अहितान्=शत्रून्। तर्जयन्=भीषयन्।

अन्वयः—प्राचीनबर्हिषा तुल्यः सः अनिलोद्धूतैः केतुभिः अहितान् तर्जयन् इव प्रथमं प्राचीं ययौ।

रघुः प्रथममेव पूर्वां दिशमभिप्रतस्थे। स इन्द्र इव तेजस्वी अदृश्यत। तस्य सेनामुखे पवनसंचालिता पताका अवर्तत। सा पताका प्रतिकूलतया अभ्यागतान् शत्रूनभिलक्ष्य 'अरे पश्यत पश्यत, यूयं न भविष्यथ' इति साकूतं तर्जयन्तीवादृश्यतेति कविरुत्प्रेक्षते।

केतुशब्दस्य ध्वजः पताका इति च द्वावर्थौ स्तः। अत्र तर्जयन्निति क्रियापक्षे ध्वजार्थो युक्तः। अनिलोद्धूतैः इति विशेषणार्थपक्षे तु पताकार्थो युक्तः। केतुशब्दः ध्वजार्थे एव कालिदासेन प्रयुक्तः शाकुन्तले "चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य" इति। भवतां यद् युक्तं प्रतिभाति तद् स्वीकरणीयम्।

'अञ्च्' इति कश्चिद् धातुरस्ति। गतिः पूजनं च तस्यार्थः। केषुचिद् रूपेषु तस्य ञकारो लुप्यते। तदा 'अच्' इति भवति। तस्मात् प्र, प्रति, उद्, अव इत्युपसर्गाणां योगेन क्रमेण प्राची, प्रतीची, उदीची, अवाची इति शब्दाः जायन्ते। पूर्वा, पश्चिमा, उत्तरा, दक्षिणा इति यथाक्रममर्थः।

उद्+धू+उद्धूत। अनिलेन उद्धूताः।

अथ तस्य सैन्यस्य असंख्येयत्वं भीषणत्वं च दर्शयति।

29 रजोभिः स्यन्दनोद्धूतैर्गजैश्च घनसन्निभैः।
भुवस्तलमिव व्योम कुर्वन् व्योमेव भूतलम्।

स्यन्दनोद्धूतैः गजैः च। भुवः तलम् इव। व्योम इव।

जैत्रयात्रायां रथानां चक्रचंक्रमणेन रजांसि उत्पतन्ति। तानि ऊर्ध्वं गत्वा आकाशे प्रसरन्ति। मेघसदृशः गजाः भूतले च संचरन्ति। अस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दृश्यस्य संदर्शकानां मनसि एवमाशंका जायते । 'किम् इतः पर्यन्तं अधः स्थिता भूमिः अधुना उपरिगता ? किमुत उपरिस्थितमाकाशं अधः पतितम् ?' ईदृशीं शंकां उत्पादयन् स रघुः ययौ ।

स्यन्दनः = रथः । घनसन्निभैः = मेघसदृशैः । व्योम (न. न. द्वि. ए.) = आकाशं । रजोभिः (स. न. तृ. ब.) = धूलिभिः ।

अन्वय :—स्यन्दनोद्धूतैः रजोभिः घनसन्निभैः गजैः च व्योम भुवस्तलमिव भूतलं व्योम इव कुर्वन् (सः ययौ इति पूर्वेण पद्येन अन्वयः) ।

स्यन्दनैः उद्धूतानि । घनैः सन्निभाः । कुर्वन् (त. पु. प्र. ए.) कृ + अत् ।

सैन्यस्य वैपुल्यं व्यापकत्वं चैव पुनरपि ब्रूते ।

30 प्रतापोऽग्रे ततः शब्दः परागस्तदनन्तरम् ।
यथौ पश्चाद्रथादीनि चतुःस्कन्धेव सा चमूः ॥

परागः तदनन्तरम् । पश्चात् रथादि इति ।

तस्य रघोः सैन्यं चतुर्धा विभक्तमिवादृश्यत । नात्र वर्ण्यते रथगज-तुरगपदातिरूपतया चतुर्धा विभक्तमिति । किन्तु अन्यथैव विभक्तम्; कथं तत् विभजनं ? कथ्यते । तस्य सैन्यस्य प्रथमो विभागः प्रतापः । अहो ! दिलीपसूनु-र्महाप्रतापो रघुः दिग्विजयाय प्रस्थितवान्' इति वार्ताप्रसरः प्रताप एव प्रथमो विभागः, स प्रतापः अग्रे याति । तदनु तस्य सैन्यानां कोलाहल एव द्वितीयो विभागः । स कोलाहलो वार्तामनुयाति । तदनन्तरं सैन्यैरुद्धूतं परागपटलं नेत्रविषयं प्राप्नोति । तत् धूलिपटलं तृतीयो भागः । तत्पश्चादेव तस्य रथगजतुरगादिसंकुलं सैन्यं प्रयाति । एवं प्रथमं प्रतापः ततः शब्दः तदनन्तरं परागः तत्पश्चात् रथादिसैन्यमिति चतुर्धा विभक्तमिव तस्य सैन्यं ययौ ।

अन्वय :—अग्रे प्रतापः, ततः शब्दः, तदनन्तरं परागः, पश्चाद् रथादि, इति सा चमूः चतुःस्कन्धा इव ययौ ।

चमूः = सैन्यं । चत्वारः स्कन्धाः यस्याः सा । स्कन्धाः व्यूहाः (शाखाः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्रापि सैन्यस्य पुरःप्रयाणमेव विवृणुते ।

31 मरुपृष्ठान्युदम्भांसि नाव्याः सुप्रतरा नदीः ।
विपिनानि प्रकाशानि शक्तिमत्त्वात् चकार सः ॥

असामान्यशक्तिमान् रघुः सैन्यैः सह पुरोगच्छति । तदा स मार्गे विविधानि विचित्राणि कर्माण्यकरोत् । मार्गे मरुभूमयः अविद्यन्त । तासु मरुभूमिषु स तत्र तत्र जलस्रोतांसि उत्पादयामास । तथा मार्गे नौकाभिः तरणीयाः जलपूर्णाः सरितः समदृश्यन्त । तादृशीः नदीः सुखेन तरणीयाः अकारयत् । एवमेव तस्य मार्गे यानि निबिडानि काननान्यासन् तान्युच्छेद्य प्रकाशानि च चकार ।

अन्वय :—सः शक्तिमत्त्वात् मरुपृष्ठानि उदंभांसि, नाव्याः नदीः सुप्रतराः विपिनानि प्रकाशानि च चकार ।

(उत्+अम्भांसि) उदम्भांसि (स. न. द्वि. ब.) उद्गतानि अंभांसि येषु तानि । (बहुव्रीहिः)

नौ+य=नाव्य । नौभिः तर्तुं योग्याः । सु+प्र+तृ+अ । शक्तिमत्त्वात्=शक्तेः । (शक्ति+मत्+त्व) बुद्धिमत्त्वात्=बुद्धेः । भयवत्त्वं= भयं । तरुण-तरुणत्वं-तारुण्यम्-तारुण्यवत् = तरुण । तारुण्यवत्त्वम् = तारुण्यं । चकार=कृ+अ(लिट्. प. प्र. ए.)

यदा स रघुः पूर्वाभिमुखं गच्छति स्म तदा सः भगीरथ इव बभासे ।

32 स सेनां महतीं कर्षन् पूर्वसागरगामिनीम् ।
बभौ हरजटाभ्रष्टां गङ्गामिव भगीरथः ॥

अयोध्यातः स राजा पूर्वसागराभिमुखं एव गच्छति । अग्रे अग्रे रघुः पश्चात् पश्चात् कोलाहलाकुला सदोच्चला सेना प्रवाहरीत्या अनुयाति च । तदा स भगीरथ इव बभौ । कथं रघोः भगीरथस्य च परस्परं सादृश्यमस्ति इति चेत् कथ्यते । शिवस्य जटायाः भ्रष्टां गङ्गां पुरा भगीरथः पूर्वसागराभिमुख अनयत् । तदापि भगीरथः पुरतः पुरतः, ऊर्मिमालासंकुला सरवा मन्दाकिनी पश्चात् पश्चात् इति रीत्यैव ययौ । ततस्तयोः परस्परं सादृश्यं कथितम् ।

अन्वय :—महतीं पूर्वसागरगामिनीं सेनां कर्षन् सः हरजटाभ्रष्टां गङ्गां कर्षन् भगीरथः इव बभौ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्ति काचित् पौराणिकी कथा। तस्याः कथाया एवात्र उपमानांशः कविना गृहीतः। पुरा किल सगरस्य पुत्राः कपिलमुनेः शापाग्नौ दग्धाः अभवन्। तेषां प्रपौत्रः भगीरथो नाम कश्चिद् राजा अजायत। सः शापदग्धानां स्वप्रपितामहानां उज्जीवनार्थं स्वर्गात् गङ्गां अवतारयामास। यदि गंगा भूमौ निपतेत् तर्हि भुवि प्रलयः स्यात्। ततः भगीरथस्याभ्यार्थनया हरः तां गंगां स्वजटाभारे बभार। ततः आवश्यकमेव प्रवाहं भगीरथाय परमशिवः स्वजटायाः अमुञ्चत्। तां गङ्गाधारामेव भगीरथः पूर्वसागराभिमुखमनयत्।

कर्षन् (त. पु. प्र. ए.) कृष्+अत्। पूर्वश्चासौ सागरश्च। पूर्वसागरं गच्छतीति पूर्वसागरगामिनी; हरः=शिवः। हरस्य जटा हरजटा। हरजटाया भ्रष्टा हरजटाभ्रष्टा। भ्रंश्+त=भ्रष्ट। बभौ=अशोभत। भा (लिट्. प. प्र. ए.) रघोर्मार्गो निर्विघ्नो निरामयश्चासीदिति वदति।

33 त्याजितैः फलमुत्खातैः भग्नैश्च बहुधा नृपैः।
तस्यासीदुल्बणो मार्गः पादपैरिव दन्तिनः॥

कश्चित् गजः कानने चरति। तस्य पुरतः फलवन्तः केचन तरवः सन्ति। सः तेषां शाखाः आकुञ्चिताः कृत्वा फलान्यादाय भक्षयित्वा तान् तरून् निरपायानेव मुक्त्वा याति। केचन तरवो निष्फलाः मार्गे विघ्नकारिणः दृश्यन्ते। गजः तान् उत्पाट्य उन्मूल्य वा दूरं क्षिपन्ति। केचन तरवः उत्पाटनाक्षमा भवन्ति। तान् भग्नान् कृत्वा स गजः स्वां यात्रामप्रतिबन्धां करोति। रघुरप्ययं गज इवानन्तरायो जगाम। मार्गे केचन नृपाः तस्य विधेया अभवन्। ते तस्मै करमयच्छन्। केचन तमभियोद्धुमागच्छन्। तैः सह युद्ध्वा स तान् बभञ्ज।

अन्वयः---फलं त्याजितैः उत्खातैः बहुधा भग्नैश्च नृपैः तस्य मार्गः, दन्तिनः मार्गः फलं त्याजितैः उत्खातैः बहुधा भग्नैश्च पादपैः इव उल्बणः आसीत्।

उत्खातैः=उन्मूलितैः। उल्बणः=विशदः, निर्विघ्नः। त्याजितः=त्यज् धातोः क्तप्रत्ययान्तः शब्दः। (प्रयोजकरूपम्) उद्+खन्+त=उत्खात।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[ह्यः = अतीते दिने, yesterday सम्पद्यन्ते = भवन्ति, जायन्ते। शृङ्खलिता = शृङ्खलाबद्धाः, chained आहताः = प्रहताः, पीडिताः। निघ्नन्ति प्रहरन्ति, (हन्ति हतः घ्नन्ति) प्रस्रावयन्ति = प्रवाहयन्ति; शुण्डा = गजानां करः विवरम् = द्वारम्, विजिगीषा = विजेतुमिच्छा, शक्नुयात् = शक्तो भवेत्। सेतुः = नदीतरणार्थं निर्मितो मार्गः (ridge), अतिरिक्ता = भिन्ना, स्थाली = plate, विशेष इति पदं " one kind of " इत्यर्थे प्रयुज्यते। दूर्वा = तृणविशेषः one kind of grass, वृक्षविशेषाः = some kinds (some sorts) of trees, हुतवहः = अग्निः = धूपः = सुगन्धिर्धूमः, हुतभुजः = अग्नेः, तद्वत् = तथा, वसनम् = वस्त्रम्, निर्धारितम् = निश्चितम्, उद्दिष्टम् प्राग् = पूर्वम्, साकूतम् = साभिप्रायम्, ऊर्मिः = तरंगः, अनन्तरायः = निर्विघ्नः।

॥ अभ्यासः ॥

I वाक्येषु प्रयुञ्जत —

1) ददृशुः 2) अश्रोष्यत् 3) कथय 4) विस्मरिष्यामि
5) अयुध्यत 6) विद्यते 7) व्यलिख्यत 8) लभेत
9) अलेखयत् 10) दर्शितम्। (e.g. जगाम-सीता ग्रामं जगाम)

II पदघटकानि विश्लेषयत—

1) तर्जयन् 2) नाव्याः 3) सुप्रतरा 4) गामिनी
5) त्याजित e.g. (लिखन्ती-लिख् + अत् + ई)

III पदानि विश्लेषयत—

1) अनिलोद्धूतैस्तर्ज्यन्निव 2) स्यन्दनोद्धूतैर्गजैश्च 3) कुर्वन्व्योमेव 4) पश्चाद्रथादीनि 5) फलमुत्खातैर्भग्नैश्च
(e.g. तस्यासीदुल्बणो मार्गः-तस्य + आसीत् + उल्बदणः + मार्गः)

IV अद्य पठितस्य श्लोकपञ्चकस्य सारं संस्कृते लघुभिर्वाक्यैः संक्षिपत।

V केवलवाक्यानि प्रयोजकरूपतया परिणमयत।

(e.g. बालः चरति। माता बालं चारयति।)

1) नृपः जनान् रक्षति। 2) कन्या पत्रं अलिखत् 3) छात्रः पठति।

VI पाठारम्भे दत्तं पद्यसंक्षेपं अनुवदत॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वाविंशो दिवसः

अयमद्य पठितपूर्वाणां पञ्चानां श्लोकानां अर्थसंग्रहो भवतामनुसन्धानार्थं क्रियते प्रथमत एव ।

रघोः राज्यं लब्धम् । शत्रवो भीताः समपद्यन्त । शरदृतुरागतः । दिग्विजयाय स प्रतिष्ठासते स्म । प्रथमत एव पूर्वां दिशं स ययौ । स राजा देवेन्द्रेण सदृश आसीत् । यथा इन्द्रः स्वर्गे सर्वेषामपि देवानामुत्तमः तथा रघुः भूमौ समस्तानामपि नराणां श्रेष्ठः अवर्तत । गमनावसरे सैन्यानामग्रे ध्वजोऽदृश्यत । अत्र कविरुत्प्रेक्षते । अभिमुखमापततो रिपून् उद्दिश्य तर्जनीमुन्नमय्य "अरे जाल्म, पश्य; त्वं न भविष्यसि" इति भीषयन्निवेति । उन्नमितया तर्जन्यैव वयं तर्जनं कुर्मः, अर्थात् अन्यान् भीषयामः । उन्नमितायाः तर्जन्याः उन्नतस्य ध्वजस्य च सादृश्यमस्ति च । द्वयोरपि परेषां भयदायकत्वं चास्ति ।

अथ समीक्षकाणां भुवं आकाशं च विषयीकृत्य भ्रमोऽजायतेति कथ्यते । पाशं दृष्ट्वा पाशः इति यथार्थबोधः प्रमा इति कथ्यते । पाशं दृष्ट्वा सर्प इति अयथार्थबुद्धिः भ्रमः इति च । जंबुकं दृष्ट्वा जंबुक इति बुद्धिः प्रमा, जंबुकं दृष्ट्वा श्वा इति बुद्धिः भ्रमः । रघोः सैन्ये रथानां नेमिचंक्रमणेन रजांसि ऊर्ध्वमुत्पतन्ति । तेन आकाशं मृन्मयं संजातम् । सैन्यगजानां सहस्राणि च भूमौ चरन्ति । ते मेघा इव श्यामाः स्थूलाश्चलनस्वभावाश्च । एवं स्थिते आकाशस्य भूमेश्च मध्ये स्थितानां सन्दर्शकानां एवं भ्रमः समुत्पद्येत । "किमियं भूमिः ऊर्ध्वमाकाशं गता ? किमाकाशं अधो गत्वा भूमौ रूपेण परिणतम् ?" इति । कुतः, आकाशं सैन्योद्धूतै रजोभिः मृन्मयं जातम् । मेघा इति भ्रममादधानाः श्यामा गजाः भूमौ चरन्ति च ।

पुनरपि सैन्यस्यैव भीषणतां प्रथयति । व्यूहो नाम सैन्यानां विभागः । रघोः सैन्यं चतुर्व्यूहतया विभक्तमिव जगाम किल । प्रायशस्तु सैन्यं रथगज-तुरगपदातिभिश्चतुर्धा विभक्तं दृश्यते । अत्र तु न तथा विभक्तमदृश्यतेति कथ्यते । सर्वेषामप्यग्रे प्रतापः । "अहो अयं रघुरागच्छति । दिग्जयाय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रातिष्ठत किल" इति जनानां मध्ये यो वार्ताप्रसरः स एवात्र प्रतापः । एवमाशंकाकुलाः जनाः यदा भीता वर्तन्ते तदा सैन्यात् संजातः आह्वानाट्टहासादिरूपः कोलाहलः श्रवणगोचरीभवति । तं कोलाहलमनु ते दृष्टिं प्रहिण्वन्ति । तदा तु दृश्यते दृष्टिपथमन्धीकुर्वन् परागपटलः । तत्पश्चादेव रथादिसैन्यं आगच्छति । एवं आदौ प्रतापः ततः शब्दः तदनन्तरं सेनापरागः अन्ते रथादयः सेनाश्च इति चतुर्धा व्यूहितं इव तत् सैन्यं प्रायात् ।

अथ चतुर्थपद्येन, तेन पन्थानः निष्प्रतिबन्धाः व्यरच्यन्तेति वदति । मार्गे तत्र तत्र मरुप्रदेशाः समापतिताः । तेषु निर्जलप्रदेशेषु कूपतटाकादिकान् उत्खाय जलदौर्लभ्यं परिजहार । तत्र तत्र अगाधाः नद्यः तस्य स्वच्छन्दप्रयाणं प्रतिबबन्धुः । तास्तु नद्यः नौभिरेव तरणीया अवर्तन्त । रघुः ताः यथाकथञ्चित् सुखेन तरणार्हाः चकार । तथा मार्गे निबिडानि काननानि तस्य गतिं निरुरुधुः । तानि सर्वाण्यपि उत्पाट्य उच्छेद्य च सुगमानि ततान । नात्र प्रभुशक्तिः मन्त्रशक्तिश्च प्रयोजकीभवत । उत्साहशक्तिरेवात्रोपकरोति । तस्य उत्साहशक्तिमत्त्वादेवैतानि अक्लिष्टतया निर्वृत्तानि ।

अथानन्तरेण पद्येन तस्य रघोः भगीरथसादृश्यं प्रकटयति । पुरा किल भगीरथो नाम राजा कपिलदग्धानां स्वप्रपितामहानां उज्जीवनार्थं गङ्गां स्वर्गादवातारयत् । तस्याः प्रवाहं हरः जटाभारे दधार । ततस्तां हरजटाया अवतार्य पूर्वसागराभिमुखमनयत् किल । रघोः सेना पूर्वसागराभिमुखं गच्छति; तत्पश्चात् रथतुरगादिसंकुलं कोलाहलाकुलं बलम् । तथैव भगीरथोऽपि पुरो जगाम । अग्रे अग्रे भगीरथः, पश्चात् पश्चात् ऊर्मिमालाकलिता सारवा मन्दाकिनी च इति ।

रघुः निर्विघ्नः निरपायः निर्भीकश्च प्रयाति । मार्गे कतिचन नृपाः तस्मै करं बहुमूल्यानुपहारांश्च दत्त्वा विधेया अभवन् । केचन नृपाः तस्य मार्गं प्रत्यबध्नन् । तादृशान् सर्वानपि उत्खाय भ्रष्टपदानकरोत् । अथ केचन राजानः तमभियोद्धुमभ्यपतन् । तैः सह नियुध्य सर्वानपि स बभञ्ज । इत्थं स स्वमार्गं विशदं वीतकण्टकं चारचयत् । अत्र रघुं मत्तगजेनोपमाति कविः । यथा कश्चन मत्तहस्ती पुरस्तात् दृष्टान् फलिनो वृक्षान् फलाहरणार्थमाकुञ्चयति, यथा च मार्गविघ्नकारिणः पादपान् उन्मूल्य दूरतः क्षिपति, यथा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च दुरुन्मूलान् गत्यन्तरायकारिणः क्षितिरुहान् भग्नान् करोति, तथा रघुरपि चकारेत्यर्थः । एकत्र रघुः प्रतिपक्षनृपाः च ; अन्यत्र तु दन्ती पादपाश्चेति-विशेषः । द्वयोरपि वृत्तयः समाना एव ।

पूर्वस्मिन् पद्ये मगधमणिपुरादिजनपदानां विजयकथा कथितेत्यनुमीयते । अथ रघुः वंगसमुद्रतीरं उपयाति ।

34 पौरस्त्यानेवमाक्रामंस्तांस्ताञ्जनपदाञ्जयी ।
प्राप तालीवनश्याममुपकण्ठं महोदधेः ॥

वङ्गानुत्तरेण विद्यमानान् जनपदान् स जिगाय । ततो महोदधेः वङ्गसमुद्रस्य परिसरप्रदेशं स विजयी प्राप्तवान् । स प्रदेशस्तु तालवनैः श्यामवर्णश्चासीत् ।

पदच्छेद :—पौरस्त्यान् एवं आक्रामन् तान् तान् जनपदान् जयी । तालीवनश्यामम् उपकण्ठम् ।

जनपदान् - देशान् । तालीवनं = तालवनं । उपकण्ठं = समीपं ।

अन्वय :— एवं पौरस्त्यान् तान् तान् जनपदान् आक्रामन् जयी सः तालीवनश्यामं महोदधेः उपकण्ठं प्राप ।

एवमुक्तरीत्या प्राच्येषु प्रदेशेषु आक्रमणं कृत्वा जयशीलः स रघुः तालवनैः श्यामलाभं पूर्वसमुद्रतीरं गतवान् ।

पुरस् + त्य, पौरस्त्य । दक्षिणा—दाक्षिणात्यः । पश्चात्—पाश्चात्यः । उत्तरशब्दात् तु औत्तराह इति रूपम् । अधोनिर्दिष्टाः समानार्थकाः

प्राच्याः = पौरस्त्याः प्रतीच्याः = पाश्चात्याः
अवाच्याः = दाक्षिणात्याः उदीच्याः = औत्तराहाः ।

तांस्तानिति तच्छब्दस्यावर्तनमर्थविशेषं सूचयति । जि + इन् = जयिन् ।

सुह्माः नृपाः आत्मरक्षार्थं तस्य जेतुर्विधेया अभवन्निति कथ्यते ।

35 अनम्राणां समुद्धर्तुस्तस्मात् सिन्धुरयादिव ।
आत्मा संरक्षितः सुह्मैर्वृत्तिमाश्रित्य वैतसीम् ॥

वेतसाः नाम नदीतीरेषु विद्यमानाः केचन तृणविशेषाः । ते शिरसा अथवा अग्रभागेन प्रवाहानुकूलं प्रणिपतन्ति, पश्चान्निवर्तन्ते च । प्रवाहाभिभवभयात् न खलु ते प्रवाहवेगमभितिष्ठन्ति । ईदृशीं वेतसवृत्तिं सुह्मनृपाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अङ्गीचक्रुः रघोरागमने ते राजनः तदनुकूलं शिरसा प्रणेमुः । अत एव रघोर्निष्क्रमणे ते भञ्जनाद्विमुक्ताः । ततस्तेषामात्मरक्षा लब्धा ।

अनम्राणां = अविनीतानाम् ; समुद्धर्तुः = उन्मूलनाशकात् । सिन्धुरयात् = प्रवाहवेगात् ; सुह्मैः = सुह्मजनपदवासिभिः, वृत्ति = चर्यां, प्रवर्तनम्, वैतसी = वेतससंबन्धिनी ।

अन्वय :—अनम्राणां समुद्धर्तुः तस्मात् सुह्मैः वैतसीं वृत्तिमाश्रित्य सिन्धुरयादिव आत्मा संरक्षितः ।

सार :—स रघुः अविनीतानां नाशकः खलु । तादृशात् तस्मात् सुह्मदेशनृपाः आत्मानं रक्षितवन्तः । कथं ? वैतसीं वृत्तिमाश्रित्य । वेतसाः प्रवाहप्रतिकूला न तिष्ठन्ति । प्रत्युत, प्रवाहवेगं अनुसृत्य किञ्चित् नतशीर्षा अनुवर्तन्ते, ततः निरपाया एव पश्चात् निवर्तन्ते च । अन्यथा ते प्रवाहभग्नाः भवेयुः ।

कृ+तृ=कर्तृ, पच्+अक=पाचक, गम+इन्=गामिन् । एतेषां पदानां व्युत्पत्तिः परिचितैव । एतेभ्योऽपि कर्त्रर्थे एव विहिता कतिचन प्रत्यया अपि सन्ति । उदाह्रियते ।

प्रत्ययः अन—क्रुध्+अन ; क्रोधन, रोषण, भीषण । क्रोधिन्, रोषक, भीषक इत्येवार्थाः ।

आलु—स्पृह, स्पृहयालु, निद्रालु, दयालु ।

मर or वर—विसृ+मर=विसृमर, नश्+वर=नश्वर, स्थावर, जित्वर ।

उर—भास्+उर=भासुर, भङ्गुर ।

इष्णु—उत्पतिष्णु, सहिष्णु, रोचिष्णु, चरिष्णु ।

र—कम्र, स्मेर, नम्र ।

समुद्धर्ता = सं + उद् + ह + तृ । आ+श्रि+त्+य=आश्रित्य तकारागमो विशेषः । 'स्तुत्यं स्तुतिभि'रित्यत्र कथितम् ।

तिङन्तक्रिया—सुह्माः आत्मानं समरक्षन् । सुह्मैः आत्मा समरक्ष्यत ।

सुबन्तक्रिया—सुह्माः आत्मानं संरक्षितवन्तः । सुह्मैः आत्मा संरक्षितः ।

प्रधानक्रिया तिङन्तक्रिया इति कथ्यते, विशेषणीभूताः अप्रधानक्रियाः सुबन्तक्रिया इति च । द्वादशे दिने सम्यक् विवृतमस्ति । ईक्ष्यतां तत् प्रकरणम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ प्रयोगविशेषः ॥

अपूर्णक्रियाः	पूर्णक्रियाः
अनाथानां समुद्धर्ता (समुद्धारकः) रघुः ।	रघुः **अनाथान्** समुद्धरति ।
पत्रस्य लेखित्री (लेखिका, लेखिनी) कन्या ।	कन्या **पत्रं** लिखति ।
लोकस्य रक्षिता (रक्षकः, रक्षी) ईश्वरः ।	ईश्वरः **लोकं** रक्षति ।
तारकाणां द्रष्टारः (दर्शकाः, दर्शिनः) जनाः ।	जनाः **तारकाः** पश्यन्ति ।

उपरि निर्दिष्टेभ्य उदाहरणेभ्यः इदमवधेयम् । कर्तरि पूर्णक्रियाणां कर्माणि द्वितीयाविभक्त्यन्तानि दृश्यन्ते । अपूर्णक्रियाणां तु तानि षष्ठीविभक्त्यन्तानि भवन्ति ।

अथ वङ्गान् विजित्य स गङ्गाप्रवाहाणामन्तरालेषु जयस्तंभानस्थापयत् ।

36 वङ्गानुत्खाय तरसा नेता नौसाधनोद्यतान् ।
निचखान जयस्तम्भान् गङ्गास्रोतोऽन्तरेषु सः ॥

सुह्मविजयानन्तरं स नेता वङ्गान् जेतुं प्रातिष्ठत । वङ्गास्तु नौकायुद्धे निपुणाः । स्थलेष्विव जलेष्वपि ते युद्धं कुर्वन्ति । तेन तेषां युद्धसामग्रीषु नौका एव प्रधानाः । नौरूपिणीभिः सामग्रीभिः सह युद्धायोद्यतान् तान् वङ्गनृपान् रघुः स्वबलेन उदमूलयत् । एवं तानुन्मूल्य रघुः सर्वविजयी भूत्वा स्वनामाङ्कितान् जयस्तम्भान् गङ्गाप्रवाहाणां मध्ये विद्यमानेषु अवकाशेषु स्थापयामास ।

उत्खाय = उन्मूल्य, तरसा = बलेन, साधनम् = सामग्री, निचखान = प्रतिष्ठापयामास, स्रोतः = प्रवाहः ।

अन्वयः—नेता सः नौसाधनोद्यतान् वङ्गान् तरसा उत्खाय गङ्गास्रोतोऽन्तरेषु जयस्तम्भान् निचखान ।

खननं निखः, उत्खाय निचखान इत्यादीनि पदानि एकस्मादेव 'खन्' धातोरुत्पन्नानि ।

उद् + खन् + य (ल्यबन्तः) अत्र 'खन्' रूपतामापद्यते इति विशेषः । उत्खातः उत्खातवान् इत्यादिषु चायं विशेषो दृश्यते ।

नि-खन् (लिट्. प. प्र. ए.) निचखान, निचख्नतुः, निचख्नुः ।

सः जयस्तम्भान् निचखान । तेन जयस्तम्भाः निचख्निरे ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पराजिताः रिपवः स्वस्थानेष्वेव प्रतिष्ठापिताः एवं वङ्गानां पराजयः तेषामेव समृद्धयेऽभवदिति सोदाहरणमुच्यते ।

37 आपादपद्मप्रणताः कलमा इव ते रिपुम् ।
फलैः संवर्धयामासुः उत्खातप्रतिरोपिताः ॥

प्रथमं कृषीवलाः शालीनां सस्यानि एकत्र निबिडतया प्ररोपयन्ति । ततः तानि कलमसस्यानि एकैकशः उत्खाय अथवा उन्मूल्य अन्यत्र क्षेत्रे प्ररोपयन्ति । तत्र लब्धप्रतिष्ठानि तानि वर्धन्ते फलन्ति च । एवं उत्खननपुनःप्रतिरोपणा-भावे व्रीहयो न प्रभूतं फलन्ति । उत्खातप्रतिरोपितास्तु कलमाः तत्कर्त्रे कृषीवलायैव शतगुणमुपकुर्वन्ति । तथैव रघुः अभिमुखमायातान् वङ्गनृपान् समूलमुन्मूल्य पुनःप्रतिष्ठापितवान् । एवं रघुणा पुनःप्रतिष्ठापितास्ते राजानः तस्य विधेया भूत्वा रत्नादिभिरुपहारैः विविधैर्विभवैश्च रघुं संवर्धयामासुः ।

आपादपद्मप्रणताः = पादपद्मपर्यन्तं कृतप्रणामाः । आपादं = पादपर्य-न्तम् आसमुद्रम् = समुद्रपर्यन्तम् कलमाः = शालयः (paddy) प्रति-रोपिताः = पुनर्वर्धिताः ।

अन्वयः—उत्खातप्रतिरोपिताः कलमाः इव आपादपद्मप्रणताः ते रघुं फलैः संवर्धयामासुः ।

पूर्वं उत्खाताः पुनः प्रतिरोपिताः उत्खातप्रतिरोपिताः । क्तप्रत्ययान्तौ शब्दौ एवं समस्येते । तस्य समस्तपदस्य विग्रहोऽपीदृशः । पूर्वं स्नातः पश्चात् भुक्तः = स्नातभुक्तः । बद्धमुक्तः ।

वङ्गविजयानन्तरं रघुः दक्षिणतः उत्कलान् (उडिया) प्रति प्रतिष्ठते ।

38 स तीर्त्वा कपिशां सैन्यैर्बद्धद्विरदसेतुभिः ।
उत्कलादर्शितपथः कलिङ्गाभिमुखो ययौ ॥

वङ्गान् विजित्य सः कलिङ्गान् जेतुं दक्षिणां दिशं प्रतस्थे । मध्येमार्गं उत्कलदेशो वर्तते । वङ्गानां उत्कलानां च मध्ये कपिशा नाम नदी प्रवहति । अगाधजलां तां तर्तुं तेन काचन योजना कृता । कतिपयसैन्यगजान्, प्रवाहे पंक्तिविधया सेतुरूपेण स्थापयामास । तेषां पृष्ठभागेन स सेनासहितः पारं गतवान् । एवं स उत्कलान् प्रविवेश । तत्र युद्धस्यावश्यकता नासीत् । ते रघोर्दर्शनेनैव विधेया अभवन् । ते रघवे कलिङ्गमार्गं निरदिशन् । तेन मार्गेण अक्लिष्टमेव सः कलिङ्गानभिययौ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बद्धाः द्विरदाः एव सेतवः येन सः । द्विरदाः = गजाः । उत्कलैः आदर्शितः पन्थाः यस्मै सः । पथिन् - शब्दः नकारान्तः खलु । द्वितीयाद्विवचनपर्यन्तं अयं शब्दः पन्थान् इति रूपं भजते । द्वितीयाबहुवचनात् प्रभृति स्वरप्रत्ययसंयोगे 'पथ' इति परिणमति । समासे 'पथिन्' शब्दः 'पथ' इति अकारान्तो भवति । राजपथः, महापथ । प्रथमैकवचने पन्थाः इति रूपम् । कलिङ्गान् अभिमुखः ।

तॄ + त्वा तीर्त्वा केषुचित् रूपेषु 'तॄ' धातुः तीर् इति परिणमति । तरणं तीर्त्वा उत्तीर्य तीर्णः अवतारः इत्यादयः तॄ धातोरुत्पन्नाः शब्दाः । द्वौ रदौ (दन्तौ) यस्य सः द्विरदः ।

अथ रघुः कलिङ्गान्तर्गते महेन्द्रपर्वतशीर्षे सेनां निवेशयामास ।

39 स प्रतापं महेन्द्रस्य मूर्ध्नि तीक्ष्णं न्यवेशयत् ।
अङ्कुशं द्विरदस्येव यन्ता गंभीरवेदिनः ॥

महेन्द्रो नाम कलिङ्गानामुत्तरस्यां दिशि विद्यमानः पर्वतकूटः । तस्य शृङ्गे रघुः स्वसेनानिवेशमकरोदिति पद्यसारः । एतमर्थं भंग्यन्तरेण कविः कथयति । तस्य पर्वतस्य शिरसि रघुः स्वं तीक्ष्णं प्रतापं न्यवेशयत् । कस्याप्यन्यस्यौन्नत्यमाक्रमणं वा असहमानः स गिरिः चिराय उच्छिरस्कस्तिष्ठति । तस्य शिरांसि स विजयी रघुः पादेनाहन्ति स्म । सैन्यैः आघातयामास च । उक्तमर्थं कविरुपमया स्पष्टीकरोति । गम्भीरवेदी गजविशेषः । रक्तस्रुतौ मांसच्छेदे च अचञ्चलचित्तो गज एव गम्भीरवेदीति कथ्यते । सः कमपि न गणयति । कस्यापि विधेयो न भवति । तादृशस्य हस्तिनो मस्तके यथा आधोरणः अंकुशमाधाय तं वशगं करोति तथा रघुः तं अविधेयं गिरिं विधेयं चकार ।

मूर्ध्नि = शिरसि मूर्धन् शब्दो नकारान्तः आत्मन् शब्दवत् । नि + विश् + अय + त्, (प्रयोजकार्थः, यन्ता = आधोरणः (यम् + तृ = यन्तृ) विद् + इन् = वेदिन् ।

सेना न्यविशत् । रघुः सेनां न्यवेशयत् । रघुणा सेना न्यवेश्यत । रघुणा निवेशिता सेना ।

पठितपूर्व, पठितचरः = पूर्वं पठितः । अनुसन्धानम् = परस्परबन्धोद्बोधनम् । समपद्यन्त = अभवन्, अजायन्त । प्रतिष्ठासते = प्रस्थातुमिच्छति जाल्मः = नीचः तर्जन्या + एव जम्बुकः = क्रोष्टा (Jackal) भ्रमः = अयथार्थबोधः प्रमा = यथार्थबोधः नेमिः = रथचक्राणां लोहमयं वहिर्वलयम् प्रथयति = प्रख्यापयति प्रायशः = प्रायेण (Generally =

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

more or less) प्रहिण्वन्ति = प्रक्षिपन्ति, व्यरच्यन्त = विरचिताः, उत्खाय = उत्खननं कृत्वा, निरुरुधुः = न्यरुन्धन्, तरणार्हाः = तरणीयाः, उत्पाट्य = उत्खाय, उन्मूल्य, ततान = चकार, बलम् = सैन्यम्, ऊर्मिः = तरङ्गः, सारवा = सशब्दा, निर्भीकः = निर्भयः, तम् अभियोद्धुम् = तेन सह युद्धं कर्तुम्, अन्तरायः = विघ्नः, जिगाय = अजयत्, श्यामलाभम् = श्यामलप्रभम्, वेतसः = तृणविशेषः (Ratan), निबिडता = सान्द्रता, शाली = व्रीहिः (Paddy) प्ररोपयति = प्ररोहयति, प्रभूतम् = समृद्धम्, कतिपय = कतिचन (Some) कतिपयैः जनैः, कतिपयेषु जनेषु, तर्तुम् = तरणाय, निवेशः = निवासस्थानम् न्यवेशयत् = स्थापयामास कस्य अपि अन्यस्य औन्नत्यं आक्रमणम् चिराय = बहोः कालात् उच्छिरस्कः = उन्नतमस्तकः आहन्ति स्म = प्रहृतवान् स्रुतिः = प्रवाहः शब्दवत् = शब्द इव । इव इत्यर्थे 'वत्' इति कश्चन प्रत्ययोऽस्ति, तदन्तं पदमव्ययं भवति । वृक्षवत् = वृक्षः (वृक्षाः) इव ।

राजवत् पञ्चवर्षाणि दशवर्षाणि दासवत् ।
प्राप्ते तु षोडशे वर्षे पुत्रं मित्रवदाचरेत् ॥

॥ अभ्यासः ॥

I 'धनिन्' 'राजन्' शब्दयोः 'विशेत्' इति लिङन्तस्य च रूपाणि लिखत ।

II पूरयत—

1) अहं पुत्राय कथां .... । 2) यदि दीपः .... (ज्वल) तर्हि प्रकाशः .... (प्रसृ) । 3) मम पुत्राय पत्रं लिखानि । 4) .... इमां वार्तां वदेम । 5) .... सौख्येन वर्तन्ताम् ।

III पदानि विश्लेषयत—

1) पौरस्त्यानेवमाक्रामंस्तांस्ताञ्जनपदाञ्जयी । 2) सुह्मैर्वृत्तिमाश्रित्य । 3) सैन्यैर्बद्धद्विरदसेतुभि । 4) द्विरदस्येव । 5) तस्यासीदुल्बणो मार्गः ।

IV पूर्णक्रियासु वाक्यानि प्रयुङ्क्त । (हनुमान् रामस्य आराधकः = हनूमान् रामं आराधयति ।)

1) रामायणस्य रचयिता वाल्मीकिः । 2) वित्तस्य संपादकाः जनाः । 3) काननानां उन्मूलयिता रघुः । 4) फलानां आहर्तारः बालाः । 5) तृणानां भक्षकाः मृगाः ।

V अद्य पठितानां पाठानां सारं संक्षिप्य लिखत ।

VI पाठारंभे दत्तं पाठसंक्षेपं अनुवदत ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रयोविंशो दिवसः

पठितपूर्वं विषयं सङ्गृह्यैव अद्यतनं पद्यविभागं पठितुमारभामहे। वङ्गदेशादुत्तरतः पश्चिमतश्च विद्यमानान् स रघुः आचक्राम। ते जनपदास्तु अयोध्यातः पौरस्त्या एव। अत एव पद्ये "पौरस्त्या"निति पदेन ते विशेषिताः। रघुः न कुत्रापि पराजितोऽभूत्। सर्वत्र जयशील एवासीत् तान् जनपदानाक्रम्य स जेता वङ्गसमुद्रस्य तीरं प्राप्तवान्। तत् तीरं तु तालवनेन श्यामलमदृश्यत।

तत्र तु 'सुह्म'नामा कश्चन जनपदः अवर्तत। रघोराक्रमणकोलाहले दूरादाकर्णिते सत्येव ते स्वयमेव विधेया बभूवुः। यदि ते अभियोद्धुमुत्सहेरन् तर्हि तेषां सर्वनाशो निश्चित एव। कुतः? स अनम्राणां समुद्धर्ता खलु। ये अविनीता अविधेयाश्च वर्तन्ते तेषां उन्मूलनाशो निश्चित एव। तत् प्रथमत एव विज्ञाय ते रघुं नम्रशिरस्का एवोपागच्छन्। तथा तैः आत्मा संरक्षितः। अर्थात् ते स्वयं रक्षामलभन्त। कविरत्राप्युदाहरति, ते सुह्माः वैतसीं वृत्तिमाश्रित्यैव निरामयाः अभवन्निति। का नाम वैतसी वृत्तिः? विव्रियते। नदीतटेषु दृश्यमानाः तृणविशेषा एव वेतसाः। तेषां सन्ति सुदीर्घाः पुष्पकाण्डाः। ते काण्डाः प्रवाहाभिमुखा न तिष्ठन्ति। किन्तु प्रवाहानुकूलं किञ्चिद् दूरं चलन्ति। ततः परावर्तन्ते। पुनरप्यनुकूलं चलन्ति, परावर्तन्ते च। एवं प्रवाहानुकूल-प्रवर्तनेन तेषां न कापि हानिः जायते यदि ते प्रवाहमभितिष्ठन्ति तर्हि ते भग्नाः भवेयुः। तादृशीं वैतसीं वृत्तिमेव सुह्मा अपि स्वीचक्रुः।

ततः स वङ्गान् जनपदान् प्राप। तत्रत्या नृपास्तु नौकादिभिर्जलयुद्ध-सामग्रीभिः सह तमभ्यगच्छन्। स तान् स्वशक्त्यैव जिगाय। न तु कूट-तन्त्रादिकं प्रयुक्तवानिति भावः। ततः स गंगायाः प्रवाहेषु अथवा तानन्तरा विद्यमानेष्ववकाशेषु तत्र स्वकीयनामाङ्कितान् जयस्तम्भान् स्थापयामास।

पराजिताः वङ्गास्तु तस्य पादतले प्रणेमुः। तान् स धर्मविजयी रघुः तत्तत्स्थानेष्वेव प्रतिष्ठापयामास। पूर्वमुन्मूलिताः पुनः प्रतिष्ठापिताश्च ते पूर्वाधिकमवर्धन्त। किञ्च स्वेषां प्रतिष्ठापयित्रे स्वामिने रघवे रत्नादीनुपहारान्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समर्पयामासुश्च । अत्रापि कविः विवक्षितमुपमया स्पष्टीकरोति । कर्षकाः प्रथमं व्रीहीणां बीजानि निबिडतया एकत्र वपन्ति । यदा तान्यङ्कुरितानि सस्यभावं भजन्ते, तदा तान्युत्खाय एकैकशः अन्यस्मिन् क्षेत्रे प्ररोपयन्ति । एवं पुनःप्रतिष्ठां लब्ध्वा एव ते वर्धमानाः फलन्ति च । फलेषु परिणतेषु ते नम्राश्च भवन्ति । तैः तानि फलानि रक्षित्रे कर्षकाय समर्प्यन्ते च । रघुणाऽपि एतादृशस्य कर्षकस्य सौभाग्यं लब्धमिति भावः ।

वङ्गान् जित्वा स दक्षिणां दिशं प्रातिष्ठत । तत्र उत्कला नाम जनपदोऽवर्तत । उत्कलानां वङ्गानां च मध्ये कपिशा नाम नदी प्रवहति । सा अगाधजला दुस्तरा चासीत् । तस्याः समुत्तरणार्थं सः स्वसैन्यगजैः सेतुमाबबन्ध । गजानां पङ्क्त्या निर्मितेन तेन सेतुना स सेनासहितः एकस्मात् गजपृष्ठात् अन्यस्मिन् गजपृष्ठे पादं विन्यस्य उत्कलान् प्राप । उत्कलराजास्तु रघोर्दर्शने एव विधेया अभवन् । विधेयीभूता विनीताश्च ते रघवे अनन्तरविजेयान् कलिङ्गान् गन्तुं मार्गं निरदिशन् । एवमुत्कलैः प्रदर्शितमार्गः स जेता कलिङ्गाभिमुखीकृत्य ययौ ।

उत्कलेभ्यः कलिङ्गान् प्राप्नुवतो जनस्य प्रथमत एव महेन्द्रपर्वतः नेत्रगोचरीभवति । तस्यात्युन्नतं दुर्गमं च शिखरमारुह्य तत्रैव सेनां निवेशयामास । न तावत्पर्यन्तं कश्चिदपि जनः तस्य शृङ्गे पदमादधाति स्म । न स कस्यापि विधेयतां गतिश्च । यथा कश्चिदाधोरणः अविधेयस्यानियन्त्रणीयस्य च गजस्य पृष्ठमारुह्य मस्तके अङ्कुशं निवेश्य तं नियन्त्रयति तथैव स धीरः महेन्द्रं स्ववशंवदं चकार ।

महेन्द्रः तत्रत्यः प्रतापी राजा चाऽसीत् । स न विधेयतामापद्यत । रघुमहेन्द्रयोः भीषणं रणमभूत् ।

40 प्रतिजग्राह कालिङ्गः तमस्त्रैर्गजसाधनः ।
पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः ॥

वङ्गनृपाणां युद्धसामग्र्यः नौका आसन् इति कथितं खलु । अत्र तु कलिङ्गानां युद्धसाधनानि गजा अभवन् । गजसैन्यसमन्वितः स कलिङ्गराजः अस्त्रैः तं रघुं अभियोद्धुमारभत । गजस्योपरि स्थित्वा सः धन्वी अस्त्रैः रघुं प्राहरत् । अत्र कविरुपमाति । यथा पुरा पर्वतः शिलाभिः इन्द्रं प्राहरत्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथेति। तत्र काचित् पौराणिकी कथा अनुसन्धेया। पुरा पर्वतानां पक्षा आसन् किल। ते पक्षिण इव उड्डीय यथेष्टं नगराणामुपरि तिष्ठन्तः बहुधा नाशं कुर्वन्ति स्म। एवं पर्वतैरुपद्रुह्यमाणा जना इन्द्रं शरणमगच्छन्। तदा इन्द्रः वज्रमादाय पर्वतानां पक्षान् छेत्तुमारभत। छेदनोद्यते शक्रे, पर्वताः शिलाभिः इन्द्रं प्राहरन्। तथैव कालिङ्गः रघुमभिजघान। यथा पर्वतानामायासो विफलोऽभवत् तथा कलिङ्गराजस्य यत्नोऽपि व्यर्थोऽभूदिति सारः।

अन्वयः—शिलावर्षी पर्वतः पक्षच्छेदोद्यतं शक्रं इव गजसाधनः कालिङ्गः तं अस्त्रैः प्रतिजग्राह।

प्रतिजग्राह=अभ्ययुध्यत शक्रः=इन्द्रः प्रति+ग्रह् (लिट्) जग्राह जगृहतुः जगृहुः। ग्रहधातो रेफः ऋकारो भवति केषुचन रूपेषु। यथा-गृह्णाति, गृहीत्वा गृहीत। ग्रहणं विग्रहः ग्रहीतुम्। गजाः साधनं यस्य सः। कलिङ्गानां राजा=कालिङ्गः।

कालिङ्गः पराजितः, रघुर्विजेता चासीत्। तदा रघुः पूर्वाधिकमशोभत।

41 द्विषां विषह्य काकुत्स्थस्तत्र नाराचदुर्दिनम्।
सन्मङ्गलस्नात इव प्रतिपेदे जयश्रियम्॥

कलिङ्गराज्ये तयोरुभयोः भयङ्करे रणे वर्तमाने सति कालिङ्गः तस्य योधाश्च रघोरुपरि अस्त्राणि ववृषुः। त शरवर्षं मङ्गलस्नानवत् स स्वीकृतवान्। मङ्गलस्नानं नाम विवाहात् पूर्वं क्रियमाणं कर्म। अत्र जयश्रिया सह रघोः विवाह आसन्नः। तत्पूर्वं शत्रुभटास्त्रवर्षेणैव मङ्गलस्नानं कृतम्। शत्रूणां शस्त्रप्रहारेण रघोः श्रीः उज्ज्वलतरा आसीत् इति भावः।

द्विषां=शत्रूणाम् विषह्य=प्रसह्य, सहनं कृत्वा काकुत्स्थः=रघुः नाराचदुर्दिनम्=शरवर्षम्, प्रतिपेदे=प्राप। दुर्दिन इति पदस्य अत्र निरन्तर-धारावर्ष इति लाक्षणिकोऽर्थः।

अन्वयः—तत्र काकुत्स्थः द्विषां नाराचदुर्दिनं विषह्य सन्मङ्गलस्नातः इव जयश्रियं प्रतिपेदे।

द्वेष्टि इति द्विट् (क्विबन्तः) अत्रायं विशेषः। व्यञ्जनप्रत्ययेषु परेषु पदान्तः षकारः, सम्राज् इत्यस्य जकारश्च टकारो भवति। द्विष्-द्विट्। मुष्णाति इति मुट्। त्विष्-त्विट्। सम्राज्-सम्राट्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्विट् द्विषौ द्विषः	सम्राट् सम्राजौ सम्राजः
द्विषं द्विषौ द्विषः	सम्राजं सम्राजौ सम्राजः
द्विषा द्विड्भ्याम् द्विड्भिः	सम्राजा सम्राड्भ्याम् सम्राड्भिः ।

युद्धानन्तरं तस्य भटाः विजयोत्सवानन्दमनुबभूवुः ।

42 ताम्बूलीनां दलैस्तत्र रचितापानभूमयः ।
नालिकेरासवं योधाः शात्रवं च पपुर्यशः ॥

रघोर्विजयिनो भटाः विजयोत्सवमाचरितुमारभन्ते । तत्र कलिङ्गेषु प्रभूतं नालिकेरासवो लभ्यते । अयोध्यानिवासिनां नालिकेरासवः सुदुर्लभ एव । कलिङ्गेषु तस्य सुलभतया तल्लाभे भटानां विजयाह्लादो द्विगुणीभवति स्म । तैः विजयानन्तरं रणसादमपोहितुं पानसन्नाहः सज्जीकृतः । तेषां पानभूमिः ताम्बूलपल्लवैरास्तीर्यत । तस्यामासीनाः ते भटाः नालिकेरासवं आकण्ठं पपुः । आसवपानेन सममेव ते शत्रूणां यशश्चापिबन् । शत्रूणां यशसः पात्रपरिमितत्वात् धावल्यात् भटानां सम्मुखे अप्रत्यक्षीभावाच्च आसवसादृश्यं विभाव्यते ।

अन्वयः—तत्र योधाः ताम्बूलीनां दलैः रचितापानभूमयः नालिकेरासवं शात्रवं यशः च पपुः ।

रचिता आपानभूमिः यैः ते । शत्रु+अ (तद्धितः) शत्रुसम्बन्धि= शात्रवं । युध्-युध्यते इति योधः, आयोधनं, युद्धं, योद्धा, आयुधम् इत्यादयः 'युध्' धातोरुत्पन्नाः ।

बन्धनानन्तरं रघुः महेन्द्रनाथं निरपायमेव मुमोच ।

43 गृहीतप्रतिमुक्तस्य स धर्मविजयी नृपः ।
श्रियं महेन्द्रनाथस्य जहार, न तु मेदिनीम् ॥

रघुः राजधर्मार्थमेव दिग्विजयायोद्युक्तः, न तु भूमेर्धनस्य वा लिप्सया । शत्रूणां विधेयतापादनमेव विजयस्योद्देश्यम् । न तु नतशिरस्कानां शिरच्छेदः । तस्मात् स धर्मविजयी रघुः पूर्वं महेन्द्रनाथमबध्नात् । पश्चात् विधेयत्वे व्यक्ते सति तं निरपायमेव व्यसृजत् च । विमोचनात् प्राक् तस्य राजश्रियं रघुरग्रहीत् । भूमिं तु तस्मै एव प्रत्यपच्छत् । अन्तःपुरमहिषीभिः धर्मपत्न्या च विना राज्ञां द्वे पत्न्यौ स्तः । एका राजश्रीः इतरा भूमिश्च । महेन्द्र-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाथस्य राज्यश्रीरेव रघोरादेया वर्तते, न त्वस्य भूमिरन्तःपुरमहिष्यो वा।

अन्वयः— धर्मविजयी स नृपः गृहीतप्रतिमुक्तस्य महेन्द्रनाथस्य श्रियं जहार, मेदिनीं तु न जहार।

पूर्वं गृहीतः पश्चात् प्रतिमुक्तः=गृहीतप्रतिमुक्तः। पूर्वं लिखितं पश्चात् प्रेषितं=लिखितप्रेषितं पत्रम्। भुक्तदग्धमन्नं इत्यादि। हृ-लिट्-जहार जहतुः जहुः। मेदिनी=भूमिः।

कलिङ्गेभ्यः स पाण्ड्यादीन् दाक्षिणात्यान् जेतुं प्रतिष्ठते स्म।

44 ततो वेलातटेनैवं फलवत्पूगमालिना।
अगस्त्याचरितामाशामनाशास्यजयो ययौ॥

कलिङ्गविजयानन्तरं पूर्वसमुद्रतीरेणैव रघुः दक्षिणाभिमुखं प्रतस्थे। समुद्रतीरं तु समृद्धफलैः पूगवृक्षैः निबिडमदृश्यत। विजयस्तु स यत्नेन विनैवालभत।

अन्वयः — ततः फलवत्पूगमालिना वेलातटेनैव अनाशास्यजयः स अगस्त्याचरितां आशां ययौ।

फलवतां पूगानां माला अस्यास्ति इति। माला+इन्=मालिन् पूगः =क्रमुकः Aricanut अनाशास्यः जयः यस्य सः। अनाशास्यः अप्रार्थनीयः। तस्य जयो न प्रार्थनीय आसीत्। अप्रार्थित एव जयः तमुपागच्छत् इत्यर्थः। अथवा अनाशास्य इति पदं अनुत्तमपदवत् अत्र प्रयुक्तम्। अस्माद् उत्तमः नास्ति इति अनुत्तमः। सर्वोत्तम इत्यर्थः। अष्टाङ्गहृदयेऽपि अस्तीदृशः प्रयोगः। त्वग्दोषकृदचक्षुष्यमिति तैलगुणवर्णने। अत्र अचक्षुष्यमित्यस्य अस्मात् परं चक्षुष्यं नास्तीत्येवमर्थः। तथात्रापि अस्मात् आशास्यः नास्तीति अनाशास्यः, आशां दिशम्।

अगस्त्येनाचरिता। अगस्त्यो नाम महर्षिः पुरा विंध्यपर्वतमुल्लंघ्य दक्षिणाशां प्रस्थितवान्। ततः स तत्रैव वसन्नास्ते न तु ततः प्रतिन्यवर्ततेति पुराणकथा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स दक्षिणापथे कावेरीनदीतीरे सेनां न्यवेशयत् ।

45 स सैन्यपरिभोगेण गजदानसुगन्धिना ।
कावेरीं सरितां पत्युः शङ्कनीयामिवाकरोत् ॥

नद्यः पत्न्यः, समुद्रः तासां भर्ता इति कविसंकल्पः । तत एव नद्यः समुद्रमभिगच्छन्ति । अत्र तु कावेरी पूर्वसागरस्य पत्नीष्वन्यतमा । तस्यां परपुरुषसङ्गमशंका समुद्रस्य जातेति कथ्यते । कथं ? रघोः भटाः स्नानपानप्लवनादिभिः तां नदीं सम्यगन्वभुंक्त । सेनागजानां मदजलेन सुरभिला च भूत्वा सा नदी स्वभर्तारं समुद्रं अभिजगाम । तदा समुद्रः तां परपुरुषोपभुक्तामाशङ्कत ।

सैन्यानां परिभोगेण । गजानां दानेन सुगन्धिना । दानं = मदजलम् ।

अन्वयः—- सः गजदानसुगन्धिना सैन्यपरिभोगेण कावेरीं सरितां पत्युः शङ्कनीयां अकरोत् इव ।

(अद्यतनं = Today प्रायशः कालवाचिभ्यः शब्देभ्यः 'तन' प्रत्ययो विधीयते । तदा तद् विशेषणं भवति । चिरम् - चिरन्तनः पुरुषः । ह्यः—ह्यस्तनं घृतं । सेतुः = नदीनामेकस्मात् तीरात् अन्यस्मिन् तीरे प्रापणार्थं दार्वादिभिर्निर्मितो बन्धः । प्राप्नुवतः गच्छतः ; आधोरणः = गजनियन्ता, धन्वी न. पु. प्र. ए. । धनुस् + विन्-धन्वा = चापधारी उड्डीय = उड्डयनं कृत्वा उड्डयनम् = पक्षिणां गगनेन गमनं उपद्रुह्यप्राणाः = पीड्यमानाः । छेत्तुम् = छिद् + तुम्. अभिजघान = अभिहतवान्, अर्थात् प्रहृतवान्, स्नानवत् = स्नानमिव । नाम इत्यव्ययं "=" अस्य चिह्नस्यार्थे क्वचित् प्रयुज्यते. आसन्नः = अन्तिकमागतः रणसादं = युद्धक्लमं अपोहितुं = दूरीकर्तुम आस्तीर्यत = आस्तृता, प्रावृता पात्रपरिमितत्वात् = पात्रे परिमितमस्तीत्यतः उदयुङ्क्त = उद्यतोऽभूत् व्यसृजन् = विसृष्टवान्, प्राक् = पूर्वं, आदेया = आदातव्या न + तु + अस्य । पत्नीषु अन्यतमा = पत्नीषु एका । पर्वतेष्वन्यतमो हिमालयः । सम्यक् = यथेच्छम् अन्वभुंक्त = भुक्तवान् ।)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ अभिधा लक्षणा व्यञ्जना ॥

अर्थबोधे तिस्रः शक्तयः अथवा वृत्तयः प्रवर्तन्ते इति कल्प्यते । ताः अभिधा लक्षणा व्यञ्जना चेति कथ्यन्ते । 'गजः' इत्यक्षरद्वयात् पादचतुष्क-शुण्डादिविशिष्टः कश्चन बृहदाकारो जन्तुरस्माभिरवबुध्यते । अत्र 'गज' इति शब्दो 'वाचकः' अर्थात् 'अभिधायक' इति कथ्यते । 'गज' इति वाचकाद् अवबुध्यमानो जन्तुः 'वाच्यः' अर्थात् 'अभिधेय' इति च कथ्यते । वाचक-शब्दस्य वाच्यवस्तुबोधने या शक्तिरस्ति सा 'अभिधा' शक्तिरित्यभिधीयते । तया शक्त्यैव अक्षरसमुदायात् वस्तूनां बोधो जायते । गृहादिभ्यः शब्देभ्यः तत्तद्वस्तुबोधने तादृशी शक्तिरेव प्रवर्तते । अथ लक्षणावृत्तिः — 'वङ्गानुत्खाय तरसा' इति पद्ये 'उत्खाय' इति पदस्य 'उत्खननं कृत्वा' इत्येवार्थो वाच्यः । उत्खननं तु तरुलतादीनां खनिजादीनां वा विषये एव युज्यते । न तु मनुष्याणां वंगराजानां विषये । अतः अत्र प्रकरणे 'वंगान् उत्खाय' इत्यस्य वंगनृपान् चिराय स्थिरप्रतिष्ठात् सिंहासनात् भ्रंशयित्वा' इत्यर्थ आपतति । एवं वाच्यार्थस्य अनुपपत्त्या अनौचित्याद्वा केषुचित् प्रकरणेषु शब्दस्य तत्संबद्धोऽन्योऽर्थः स्फुटति । सोऽयमर्थः लक्ष्यार्थ इत्युच्यते । लक्षकशब्दस्य लक्ष्यार्थबोधने या शक्तिरस्ति सा लक्षणेति कथ्यते । अत्र 'उत्खाय' इति लक्षकः शब्दः । वंगनृपाणां सिंहासन-भ्रंशो लक्ष्यार्थः । अथ व्यञ्जनावृत्तिः —अत्रैव पद्ये लक्ष्यार्थबाधानन्तरं कश्चिदन्यो-ऽप्यर्थः स्फुटीभवति । यथा कश्चित् तृणादिकमुन्मूल्य दूरीकरोति तथा रघुरपि अनायासेनैव वंगनृपान् स्थानभ्रष्टानकरोत् इति । इयमनायासतैव अत्र व्यंग्यार्थः । उत्खायेति शब्द एव अमुं व्यंग्यार्थमपि जनयति । अतः स एव शब्दोऽत्र व्यञ्जकश्च । एवं च उत्खाय इति शब्दः उन्मूलनं इत्यर्थस्य वाचको भवति । स एव शब्दः स्थानभ्रंश इत्यर्थस्य लक्षकः, अनायासता इत्यस्य व्यञ्जकश्च भवति । यथा कश्चित् एक एव पुरुषः पुत्रस्य पिता भवति भागिनेयस्य मातुलो भवति पत्न्याः भर्ता च भवति तथा । सोऽयं व्यंग्यो यदा सहृदयाकर्षको भवति तदा ध्वनिरिति कथ्यते । अस्माकं साधारणसंभाषणेष्वपि यत्र यत्र रसोऽनुभूयते तत्र तत्रेयं व्यञ्जनावृत्तिर्भवत्येव ।

॥ अभ्यासः ॥

I यथोचितं प्रत्ययैः संयोज्य वाक्यानि लिखत । यथा—अयोध्या राजन् दशरथ अस्=अयोध्यायाः राजा दशरथः आसीत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

1) पिता दण्ड तनय प्रहरति । 2) अहं सिह भय धाव् । 3) सीता प्रवहन्ती नदी स्नान कृ । 4) वृक्ष पक्षिणः नीड रचय ।
5) विद्या उत्कृष्ट धन लोक किञ्चित् न विद्यते ।

II लकारादीनि अर्थं च लिखत । यथा-लिखत. लोट्. पर. मध्य. बहु. You write.
1) भाषस्व 2) जायेरन् 3) बभौ 4) मन्यामहे 5) कुरुतः ।

III अधोनिर्दिष्टानां पदानां परिचयं दत्त । (यथा—विजिगीषा=जि धातोः सन्नन्तः, वि उपसर्गः) ।
1) लिप्सते 2) लेखयति 3) मधुद्विट् 4) निपीय 5) पठत ।

IV अद्य पठितानां पद्यानां सारं स्ववाक्येषु लिखत ।

V अद्यतनपाठारंभे दत्तं पाठसंक्षेपं अनुवदत ।

अङ्गिक्रियाः   अङ्गक्रियाः ।

1

केवलम् —नृपाः फलं अत्यजन् ।   फलं त्यक्तवन्तो नृपाः । } कर्तरि
प्रयोजकम्—रघुः नृपैः फलं अत्याजयत् ।
नृपैः फलं त्याजितवान् रघुः ।

केव—नृपैः फलं अत्यज्यत ।   नृपैः त्यक्तं फलम् । } कर्मणि
प्रयो—रघुणा नृपैः फलं अत्याज्यत । रघुणा नृपैः त्याजितं फलम् ।

2

केव— शिष्यः पाठ पठति ।   पाठं पठन् शिष्यः । } कर्तरि
प्रयो— गुरुः शिष्यं पाठं पाठयति । शिष्यं पाठं पाठयन् गुरुः ।
केव—शिष्येण पाठः पठ्यते ।   शिष्येण पठ्यमानः पाठः । } कर्मणि
प्रयो—गुरुणा शिष्यं पाठः पाठ्यते । गुरुणा शिष्यं पाठ्यमानः पाठः ।

3

पुत्री चन्द्रं पश्यति (अपश्यत्) ।   चन्द्रं पश्यन्ती (दृष्टवती) पुत्री ।
माता पुत्रीं चन्द्रं दर्शयति (अदर्शयत्) ।   पुत्रीं चन्द्रं दर्शयन्ती (दर्शितवती) माता ।
पुत्र्या चन्द्रः दृश्यते (अदृश्यत) ।   पुत्र्या दृश्यमानः (दृष्टः) चन्द्रः ।
मात्रा पुत्रीं चन्द्रः दर्श्यते (अदर्श्यत) । मात्रा पुत्रीं दर्श्यमानः (दर्शितः) चन्द्रः ।

अत्र प्रयोजकप्रयोगाणां सविस्तरः पाठः एकादशदिने दृश्यताम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुर्विंशो दिवसः

अथ तु ह्यः पठितस्य पद्यषट्कस्य सारः संग्रहीतव्यः। तेषु प्रथमे रघु-कालिङ्गयोरायोधनं खलु वर्णितम्। कलिङ्गराजः - गजसैन्येन सह रघुमभियो-द्धुमागतः। तेन सह रघोः घोरं युद्धमजनि। कथम्? पुरा किल पर्वतानां पक्षच्छेदनार्थं इन्द्रः वज्रपाणिः समागतः। अभ्यागच्छन्तं शत्रुम् इन्द्रं दृष्ट्वा पर्वताः शिलाखण्डैः तं अभिजघ्नुः अर्थात् प्रजह्रुः। पर्वतानां शिलाखण्डैः प्रहारमगणयन् स इन्द्रः गिरीणां पक्षं चिच्छेद। एवमत्रापि रणाङ्कणे संवृत्तम्। कालिङ्गस्य शरजालैराहतोऽपि रघुः तत् सर्वमप्यपरिगणयन् अयुध्यत। अन्ते पर्वतस्य या गतिरासीत् सैव कालिङ्गस्यापि संजातेत्युपमया व्यज्ञयति।

एवं युद्धमन्तरा संभूतं शराणां वर्षणं स रघुः धीरं सोढवान्। अन्ते, कालिङ्गे पराजिते शरवर्षणं च समाप्तम्। शरवर्षादुन्मुक्तः स रघुः तदा मङ्गलस्नानं कृतवानिवाधिकं बभासे। राज्याभिषेकाद् विवाहाद् वा पूर्वमाचर्यमाणं स्नानमेव मङ्गलस्नानम्। सर्वौषधिभिः संस्कृतेन जलेनाभिषेक एव मङ्गलस्नानविधिः। शरवर्षः ओषधिसंस्कृतजलवर्ष इव तस्योल्लासाय श्रियै च सञ्जातः इति तस्य सर्वंसहत्वं स्पष्टीकरोति।

ततः तस्य भटाः विजयोत्सवमारभन्ते स्म। कलिङ्गेषु तांबूलीलताः प्रभूतं दृश्यन्ते। तत्रत्यानां स्त्रीणां पुरुषाणां च ताम्बूलचर्वणं दिनचर्यास्वन्तर्भवति। निरन्तरं सम्यक् चर्विततांबूलानां तेषां अतिरक्तौष्ठदन्तजिह्वानां, हन्त! भीषणो मन्दहासोऽपि। तत्रत्या जनाः स्वेषां नित्योपयोगार्थं तांबूलीवाटिकाः सनिष्कर्षं पोषयन्ति। रघोर्भटास्तु तासां ताम्बूलीनां दलैः पानभूमिं विरचय्य तत्रासीनाः नालिकेरमद्यमाकण्ठं पपुः। तैः तु नालिकेरमद्यं अनास्वादितपूर्वमेव भवेत्। आसवेन साकं शत्रूणां यशश्च तदा नावशिष्टमभूदिति भावः।

कलिङ्गराजः रणान्ते गृहीतः, ततः रघोः दयालुत्वात् मुक्तश्च। कुतः सोऽपराधी विमुक्तः? इति चेदुच्यते। राजधर्म इति मत्वैव रघुः दिग्वि-जयमारब्धवान् न तु हिंसार्थम्। धार्मिका राजानः शरणागतं पराजितं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निरायुधं वा शत्रुम् न हन्तुं उत्सहन्ते । तस्मादेव स कालिङ्गो विमुक्तः । किन्तु तस्य श्रियं रघुरादद । भुवा सह तं मुमोच । महेन्द्रनाथं निःश्रीकं विससर्जेत्यर्थः ।

कलिङ्गराज्यस्य पूर्वा सीमा वंगसमुद्र एव । तेन समुद्रतीरेणैव विजयशीलो रघुः दक्षिणां दिशं जगाम । समुद्रतीरं तु फलस्तबकवतां क्रमुकाणां वाटिकाभिः निबिडं शीतलं चासीत् । सा दिशा अगस्त्याचरितेति पुराणे प्रथितम् । पुरा अगस्त्यो मुनिः विन्ध्यपर्वतमुल्लंघ्य दक्षिणस्यां दिशि वसतीति प्रसिद्धम् ।

कावेरी नदी दक्षिणापथे मलयाचलादवतरति । सा पूर्वाभिमुखं प्रवहन्ती वङ्गसमुद्रेण सङ्गच्छते । रघुस्तस्याः तीरेषु सेनां निवेशयामास । सैन्यगजाः मदजलेनार्द्रगण्डाः तस्याः प्रवाहेषु बहुशो मज्जनोन्मज्जनान्यतन्वन् । तेन तस्या जलं मदजलसुरभिलं कलुषं चाभवत् । तथा सुरभिला कलुषा च सा नदी स्वभर्तुः समुद्रस्य निकटं जगाम । तदा भर्ता समुद्र एवमाशङ्कत । "किमियं परपुरुषेण सङ्गता ? कालुष्येण परिमलेन चेयं परपरिभुक्तेव प्रतिभाति" इति ।

अथ अद्य पठितव्यानि पद्यानि व्याख्यायन्ते । कावेरीमुत्तीर्य मलयाचलसानुषु भटा विशश्रमुः ।

46 बलैरध्युषितास्तस्य विजिगीषोर्गताध्वनः ।
मरिचोद्भ्रान्तहारीताः मलयाद्रेरुपत्यकाः ॥

रघुः अवाचीं दिशं प्रतिष्ठासुः सैन्यैः सार्धं सुदीर्घं पन्थानं पश्चात् कृतवान् । अन्ततः स मलयपर्वतस्योपान्तं प्राप । पर्वतपरिसरास्तु मरिचवल्लीभिः रमणीया अदृश्यन्त । तासु वल्लीपटलीषु हारीताः पक्षिविशेषाः मुहुर्मुहुरितस्ततो भ्राम्यन्त आसन् । तादृशीषु मलयाद्रेरासन्नभूमिषु सा सेना विश्रमसुखमनुभवितुं कंचित् कालं उवास । हारीताः पक्षिविशेषाः अल्पप्रमाणाः मरिचानि खादितुं मरिचवल्लीपटलेष्वितस्ततः भ्राम्यन्ति ।

अन्वयः—गताध्वनः विजिगीषोः तस्य बलैः मरीचोद्भ्रान्तहारीताः मलयाद्रेः उपत्यकाः अध्युषिताः ।

अधि इत्युपसर्गयोगे सप्तम्याः स्थाने द्वितीया भवति । यथा—

बालः गृहे वसति । बलानि उपत्यकासु अवसन् ।
बालः गृहं अधिवसति । बलानि उपत्यकाः अध्यवसन् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अधि + वसू + इ + त = अधि उष इत = अध्युषित । विजेतुं इच्छुः विजिगीषुः । गताः अध्वानः येन सः । मरिचेषु उद्भ्रान्ताः हारीताः यासु ताः । मरिचं = black pepper गताध्वनः = मार्गमतीतस्य उपत्यका × अधित्यका । उपत्यका = valley अधित्यका = peak.

मलयाद्रेः सानुषु एलापरागाणां आधिक्यं सौलभ्यं च वर्ण्यते ।

47 ससञ्जुरश्वक्षुण्णानामेलानामुत्पतिष्णवः ।
तुल्यगन्धिषु मत्तेभकटेषु फलरेणवः ॥

रघुणा समाक्रान्ते एकैकस्मिन् प्रदेशे ये ये विशेषाः सन्ति तेषु द्वित्रान् एव कविः कथाकथनमन्तरा पाठकसमक्षं प्रदर्शयति । मलयाद्रेरुपत्यकासु एलावनानां सौलभ्यं विशिष्य वर्णनीयमास्ते । मलयपर्वतेषु एलावनानि सुलभं विद्यन्ते । भूमौ पतितानि तेषां फलानि सेनाश्वानां खुराघातैः संक्षोद्यमानानि अभवन् । क्षुण्णानां तेषां चूर्णानि अन्तरिक्षे उत्पेतुः । तानि चूर्णानि एलापरागसमानगन्धिषु मत्तगजमस्तकेषु संसक्तानि अभवन् ।

अन्वयः— अश्वक्षुण्णानां एलानां उत्पतिष्णवः फलरेणवः तुल्यगन्धिषु मत्तेभकटेषु ससञ्जुः ।

अश्वैः क्षुण्णाः = चूर्णिताः । उत्पतन्ति इति उत्पतिष्णवः, उत्पतन्तः । तुल्यः गन्धः येषां ते = तुल्यगन्धिनः । मत्तानां इभानां कटाः । मत्ताः = मदयुक्ताः । इभाः = गजाः । कटाः = गण्डाः । फलानां रेणवः । रेणवः = परागाः ।

सञ्ज् - लिट् - ससञ्ज ससञ्जतुः ससञ्जुः । संगः, सक्तिः, आसक्तः, प्रसंग-आदयः सञ्ज् धातोरुत्पन्नाः ।

क्षुद् + त = क्षुण्ण । उत् + पत् + इष्णु — उत् पतिष्णु । इन् प्रत्ययस्यैवार्थः । उत्पातिन् । अलङ्करिष्णु, निराकरिष्णु, रोचिष्णु, वर्तिष्णु, वर्धिष्णु, सहिष्णु, प्रभविष्णु, इत्यादयः उकारान्तः उत्पतिष्णु-सदृशाः शब्दाः ।

मलयपर्वते चन्दनद्रुमाः सुलभाः सन्ति । तेषु सर्पाः वेष्टयन्ति इति प्रसिद्धम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

48 भोगिवेष्टनमार्गेषु चन्दनानां समर्पितम् ।
नास्रसत् करिणां ग्रैवं त्रिपदीच्छेदिनामपि ॥

अस्ति मलयाचलेषु चन्दनवृक्षाणां बाहुल्यम् । तेषां प्रकाण्डेषु सर्पाणां चिरकालपरिवेष्टनेन वलयाकाराः निम्नाः रेखाः संजाताः । रघोः सेनागजानां ग्रीवासु विद्यमाना रज्जवः तेषु वेष्टनमार्गेषु निबद्धाः । तथापि तेषां आभोगानां परिक्लृप्ततया अन्यूनाधिकतया च तेषु निबद्धानि ग्रीवाबन्धनानि न स्रस्तान्यभवन् । अजगराङ्कितेषु तथा तैः चिराय परित्यक्तेषु तेषु चन्दनवृक्षप्रकाण्डेषु करिणां ग्रैवबन्धनार्थं विशिष्य उट्टङ्कनोच्छेदनादिरूपः क्लेशः तद् भटानां न सोढव्य आसीदिति भावः । चरणत्रयमाहत्य श्रृंखलिता अपि ते गजाः ताः श्रृंखलाः छेत्तुमपि शक्ता आसन् । तथापि चन्दनद्रुमाणां सुगन्धेन मुग्धास्ते गजाः तत्र निश्चलाः तस्थुरित्यर्थः ।

भोगिनां वेष्टनस्य मार्गः । भोगिन् = सर्पः । वेष्टनमार्गः = सर्पाणां वलयरूपेण वृक्षेषु वासात् उत्पन्ना निम्ना रेखा । स्रंसू—लुङ् । अस्रसत् अस्रसतां अस्रसन् । स्रस्तमभूत् अथवा शिथिलबन्धमभूत् । त्रिपदी = पादत्रयमेकीकृत्य बद्धा रज्जुः । त्रिपदीम् छिनत्ति इति त्रिपदीच्छेदिन् । ग्रैवम् (ग्रीवा + अ) ग्रीवा = कण्ठः । ग्रैवम् = कण्ठबन्धनम् ।

अन्वयः— चन्दनानां भोगिवेष्टनमार्गेषु समर्पितं त्रिपदीच्छेदिनामपि करिणां ग्रैवं न अस्रसत् ।

सूर्यादपि अधिकप्रतापो रघुरासीत् इति कथ्यते ।

49 दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि ।
तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे ॥

मलयपर्वतमभिव्याप्य ये नाम पौरस्त्याः प्रदेशा अवर्तन्त तेषां शासकाः तदानीं पाण्ड्यराजा आसन् । ते सूर्यादपि प्रतापिनो विरेजुः । तेषां राज्यस्योपरि चरन् सूर्यः स्वतो मन्दप्रतापो भवति । सूर्यः यदा दक्षिणायनं प्रविशति तदा तस्य तापः स्वयं मन्दीभवति खलु । स तेजो मन्दीभावः पाण्ड्यानां तेजोऽभिभवाद्भवतीति कविरुत्प्रेक्षते । तादृशप्रतापिनोऽपि पाण्ड्याः रघोः प्रतापं सोढुं शक्ता नाभवन् । अत्र सूर्यः प्रतापी, पाण्ड्यः प्रतापवत्तरः, रघुः प्रतापवत्तमः इति सूचितम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्दायते = मन्दः भवति, मन्दीभवति । विषेहिरे = असहन्त ।

अन्वय :— रवेरपि तेजः दक्षिणस्यां दिशि मन्दायते । तस्यामेव पाण्ड्याः रघोः प्रतापं न विषेहिरे ।

नामानि कामिश्चित् प्रक्रियाभिः धातुत्वं भजन्ते, एते 'नामधातव' इति कथ्यन्ते । ततः तिङन्तरूपाणि च जायन्ते । यथा—

मन्दं भवति = मन्दायते । दास इवाचरति = दासायते ।

पुत्रं इच्छति = पुत्रीयति । दासं इच्छति = दासीयति ।

अत्र नामान्त्यस्वरस्य विकारः यप्रत्ययश्च विशेषः ।

जनकः पुत्रस्य दासायते । दशरथः पुत्रीयति स्म ।

पुत्रस्य दासायमानः जनकः । पुत्रीयन् दशरथः यागं चकार ।

अत्रेदमवधेयम् । 'भवति' 'इव आचरति' इत्याद्यर्थे निष्पन्नानि मन्दायते चपलायते इत्यादीनि रूपाणि आत्मनेपदे, तथा इच्छतीत्यर्थे निष्पन्नानि पुत्रीयति अन्नीयति इत्यादीनि रूपाणि परस्मैपदे च प्रयुज्यन्ते ।

पुत्रं इच्छति = पुत्रकाम्यति । कृष्णः इवाचरति = कृष्णति । इत्यादयः केचन प्रयोगविशेषा अपि सन्ति । ते विरला एव दृश्यन्ते ।

नामभ्यः विशेषणेभ्यश्च क्रियारूपनिष्पादनरीतिः प्रायशः अन्यभाषास्वपि दृश्यते । यथा आंगल्याम् ।

1) Trust	Entrust	6) Strength	Strengthen
2) List	Enlist	7) Wide	Widen
3) Courage	Encourage	8) Real	Realise
4) Little	Belittle	9) Western	Westernise
5) Bar	Debar	10) Pure	Purify

आङ्गल्यां तु पदानां पूर्वमुपसर्ग(prefix)—योगेन अथवा पश्चात् प्रत्यय-(suffix) योगेन च क्रियारूपाणि संपद्यन्ते इति विशेषः । हिन्दीभाषायामपि पश्यत ।

लाज, लजाना । शर्म, शर्माना । हाथ, हथियाना । दुख, दुखाना ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्वाचीन - मद्रास - प्रान्तान्तर्गत 'डिण्डिकल' 'टिनेवेली' इति ख्याता जनपदाः रघुणा सम्प्राप्ताः। तदा पाण्ड्याः स्वयं विधेया भूत्वा रघवे उपहारान् ददुः।

50 ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेः।
ते निपत्य ददुस्तस्मै यशः स्वमिव सञ्चितम्।

पाण्डयाः रघुमभियोद्धुमुद्युक्ता नाभवन्। ते स्वयं रघोर्विधेयतामंगीचक्रुः। नम्रशीर्षास्ते रघुं प्रणिपेतुः, मुक्ताफलभूयिष्ठानुपहारान् तस्मै ददुश्च। तन्मुक्ताफलं तु महोदधेः ताम्रपर्णीसङ्गमस्थानात् अल्पाल्पतया चिरायोपार्जितं च। तत् सर्वं चिरकालसञ्चितं स्वं यश इव ते रघवे समर्पयामासुः।

मुक्तासारम् = उत्तममौक्तिकम्। (pearls) संचितम् = आर्जितम्। 'चि' धातोः चयनं, समाहरणं पुञ्जीकरणं वार्थः।

अन्वयः — ते ताम्रपर्णीसमेतस्य महोदधेः मुक्तासारं स्वं सञ्चितं यश इव तस्मै ददुः।

ताम्रपर्णी = सह्यपर्वतात् महोदधिमभि प्रवहन्ती काचन नदी यस्याः सङ्गमस्थानात् विशिष्टानि मौक्तिकानि लभ्यन्ते। नि+पत्+य = निपत्य; सं+चि+तं = संचितम्। सञ्चयनं, सञ्चयः, चिनोति, परिचयः, अपचयः इत्यादयः 'चि' धातोरुत्पन्नाः।

अथ पद्ययुग्मकं प्रौढैः छात्रैः स्वयं पठितव्यम् आस्वादितव्यम् च। रघुः मलयदर्दुरौ नाम पर्वतौ उल्लङ्घ्य सह्यपर्वतं प्रापेति कथ्यते।

51 स निर्विश्य यथाकामं तटेष्वालीनचन्दनौ।
स्तनाविव दिशस्तस्याः शैलौ मलयदर्दुरौ॥

52 असह्यविक्रमः सह्यं दूरान्मुक्तमुदन्वता।
नितंबमिव मेदिन्याः स्रस्तांशुकमलङ्घयत्॥

अस्यायं सारः। दक्षिणा दिग् उपभोगक्षमा युवतीव शीर्षमुत्तरतो विन्यस्य शेते। मलयदर्दुरौ पर्वतौ तस्याः स्तनौ इव राजतः। सह्यपर्वतस्तु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्या नितम्बः रघुः प्रथमं तस्याः स्तनद्वयाक्रमणमर्दनसुखं अन्वभवत्। ततः नितम्बमाचक्राम। वस्त्रं दूरतः उत्क्षिप्तम्। तत् वस्त्रमेव पश्चिमसागरः।

अन्वयः — असह्यविक्रमः सः तस्याः दिशः तटेषु अलीनचन्दनौ स्तनौ इव (स्थितौ) मलयदर्दुरौ शैलौ यथाकामं निर्विश्य मेदिन्याः स्रस्तांशुकं नितम्बं इव (स्थितं) उदन्वता दूरात् मुक्तं सह्यं अलङ्घयत्।

निर्विश्य = उपभुज्य उदन्वान् = समुद्रः मेदिनी = भूमिः अंशुकं = वस्त्रम्।

यथाकामम्, काममनतिक्रम्य इति तस्य विग्रहः। अनतिक्रम्य इत्यस्य अनुसृत्य इत्यर्थं आपतति। तथा च काममनतिक्रम्य इत्यस्य काममनुसृत्य इत्येवार्थः। एवं अस्मात् विग्रहात् कामानुरूपमित्यर्थो जायते। काममनतिक्रम्य इति क्रियाविशेषणं खलु। तदा तयोः समस्तपदमपि क्रियाविशेषणं भवति। यथोचितं, यथोक्तं यथार्हं, इत्यादीन्यपि एवं क्रियाविशेषणान्येव। उचितमनतिक्रम्य यथोचितम् इत्यादि।

तस्य सैन्यं अपरान्तराज्येषु प्रससार।

53 तस्यानीकैर्विसर्पद्भिरपान्तविजयोद्यतैः।
रामास्त्रोत्सारितोऽप्यासीत् सह्यलग्न इवार्णवः॥

रघुः पाण्डेयभ्यः सह्यपर्वतमुल्लंघ्य अपरान्तान् अर्थात् पश्चिमसमुद्रतीरदेशान् प्राप। कालिदासस्य काले पश्चिमाम्बुधेस्तीरप्रदेशाः अपरान्ता इति व्यवह्रियन्ते स्म। अधुनातनाः केरलकर्णाटकमुम्बयीगुर्जरप्रान्ताः तदानीं अपरान्तेषु अन्तर्भूता आसन्। तेषु दाक्षिणात्यः प्रान्त एव केरला नाम। तत्र प्रविष्टा रघोः सेना सह्यपर्वतमालायाः आरभ्य आसमुद्रं व्याप्ता अभवत्। तासां सन्ततचलनात्मकत्वं शब्दायमानत्वं च सन्दर्शकानां एवंरूपं भ्रममुत्पादयामासतुः। 'पुरा परशुरामेण सह्यात् दूरमुत्सारितोऽयं समुद्रः पुनरपि सह्याद्रिसानुं उपागतः किम्?' इति। सा सेना समुद्र इव आसह्यसमुद्रं आकन्यागोकर्णं व्याप इति सारः।

अनीकम् = सैन्यम् विसर्पद्भिः = व्याप्नुवद्भिः उत्सारितः = दूरं यापितः, अर्णवः = समुद्रः लग्नः = संसक्तः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्वयः—अपरान्तजयोद्यतैः विसर्पद्भिः तस्य अनीकैः रामास्त्रोत्सारितः अपि अर्णः सह्यलग्नः इव आसीत् ।

वि + सृप् + अत् विसर्पत् । (शत्रन्तः) सर्पः सर्पणं विसर्पः इत्यादयः सृप् धातोरुत्पन्नाः । उत् + सृ + इ + त = उत्सारितः (प्रयोजकः क्तान्तः) ।

[चर्विततांबूलानां = ताम्बूलं चर्वितवताम् सम्यक् = तथाविधि properly. अतिरक्ताः ओष्ठाः दन्ताः जिह्वाश्च येषां ते । आसीनाः = उपविशन्तः उच्यते=कथ्यते । (वच् + य + ते) निःश्रीकं = प्रतापरहितम् स्तबकः=पुञ्जः, गुच्छः क्रमुकः = पूगः निबिडं = सान्द्रं गण्डः = कपोलः प्रतिभाति = seems उट्टंकनं to chisel आभोगः = अवकाशः स्रस्तं = अस्रसत्, slipped down अजगरः = वन्यसर्पः सोढव्यः = सहनीयः सह+त=सोढ सोढुं, सोढवान्, सोढा । अभिभवः=पराभवः । अर्वाचीनः = अधुनातनः ख्यातं = प्रसिद्धं चिराय = चिरेण आसह्यसमुद्रं = सह्यादारभ्य समुद्रपर्यन्तं, व्याप=व्याप्तः ।)

॥ अभ्यासः ॥

I प्रत्ययादिकान् विघटयत । यथा - अभ्यगच्छत् = अभि+अ+गम्+अ+त् ।

1) विसर्पद्भिः 2) क्षुण्ण 3) समर्पितम् 4) मन्दायते ।
5) विषेहिरे 6) निपत्य 7) उत्सारितः ।

II ४६, ४७ पद्ययोः पदानि विघटयत ।

III अधोनिर्दिष्टैः पदैः वाक्यानि रचयत ।

1) दक्षिणस्यां 2) रेणुः 3) ददुः 4 अधिवसन्ति
5) तीक्ष्णायते ।

IV अद्य पठितानां पद्यानां सारं संस्कृतभाषायां संक्षिप्य लिखत ।

V पाठारंभे दत्तं पद्यसंक्षेपं अनुवदत ।

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चविंशो दिवसः

ह्य एकैकशः पठितचराणि पद्यानि अद्य सुखबोधार्थं संगृह्यन्ते ।

महेन्द्रनाथविजयानन्तरं कावेरीमुत्तीर्य बहुदूरं दक्षिणाभिमुखं गत्वा मलयाचलप्रान्तान् रघुः प्रापेति कथ्यते । मलयसानुषु मरिचवल्लीनां सौलभ्यमस्ति । निबिडतया तरुषु लग्नानां तासां पटलेषु हारीतः पक्षिविशेषाः भ्राम्यन्तो विद्यन्ते । पक्कानि मरिचानि स्वादूनि खलु । तत्खादनार्थमेव ते लतापटलेषु भ्राम्यन्ति । तादृशीषु मलयाद्रेरुपत्यकासु रघोः सैन्यानि निविविशिरे ।

ततः तत्र एलावनानां बाहुल्यं कविः सूचयति । मलयसानुवनेषु शुष्काणि एलाफलानि अधोविकीर्णानि सन्ति । अश्वानां खुराघातैः चूर्णितानां तेषां परागाः ऊर्ध्वमुत्पतन्ति । उत्पतितास्तु ते वन्यगजानां मदजलार्द्रेषु गण्डेषु लग्ना अभवन् । सजातीयविश्वासादेव ते गजकटेषु ससञ्जुः । कुतस्तयोः सजातीयता ? मदजलानां परागाणां च गन्धः समान एव । अतः परागा गजगण्डेषु पेतुः ।

ततः चन्दनद्रुमाणां वन्यसर्पाणां च मलयाचलसानुषु सन्ततसाहचर्यस्य परिचयं ददाति । तत्र युगयुगान्तरजरठाः चन्दनद्रुमाः सन्ति । अजगराः अथवा वन्यसर्पाः प्रायशः चन्दनद्रुमेषु वेष्टनं कृत्वा जीविकां निर्वहन्ति । चन्दनास्तु तेषां वासाय प्रियतमा वृक्षाः । ते शरीरेण वृक्षप्रकाण्डेषु संवेष्टय आस्यं अधः प्रसार्य लंबमानाः वर्तन्ते । यदा तेषामधोभागेन गजादयो वन्यमृगा गच्छन्ति तदा तान् झटिति गृहीत्वा कबलयन्ति । एतेषु अवसरेषु तेषां आस्यानामेव इतस्ततः प्रसारणं चलनं वा भवति; न तु शरीरस्य । शरीरं तरुकाण्डे वेष्टितमेव वर्तते । तरवः यथाकालं वर्धन्ते । अजगराणां दृढतरवेष्टनात् तेषां शरीराभोगपरिक्लृप्ताः भागास्तु तथैव वर्तन्ते च । न ते वर्धन्ते । द्रुमाणां इतरभागापेक्षया ते कृशा निम्नाश्च भवन्ति । काले गते ते सर्पाः स्ववासवृक्षान् विहाय वृक्षान्तरमाश्रयन्ते । तदा तेषां वेष्टनस्थानानि निम्नानि स्पष्टीभवन्ति । ईदृशाः सर्पवेष्टनैर्निम्नाङ्कवन्तः चन्दनाः मलयपर्वतेषु प्रभूतं विद्यन्ते । तादृशानां चन्दनवृक्षाणां अजगरवेष्टितेषु निम्नतलेषु सैन्यगजानां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कण्ठरज्जवः निपुणं निबद्धाः। गजास्तु मदमत्ता एवावर्तन्त। ते पादत्रयमाहत्य बद्धां शृङ्खलामपि छेत्तुं शक्ताः। तथापि तेषां कण्ठरज्जवो न स्रस्ता अभवन्। चन्दनवनसौरभेण ते आकृष्टा निश्चलं तस्थुरिति भावः।

पाण्डयनृपाणां प्रतापसान्निध्ये सूर्यस्यापि प्रतापो मन्दीभवति। दक्षिणायनकाले सूर्यः दक्षिणां दिशं विशति। तदा स मन्दप्रभो भवत्येव। तस्य प्रभामान्द्यस्य हेतुः पाण्डयप्रतापाधिक्यमित्यनुमीयते। एतेन पाण्डयाः सूर्यादपि प्रतापवत्तरा इति सिद्धम्। ते पाण्डया अपि रघोः प्रतापं न सोढवन्तः। रघुरतिप्रतापः त। तोऽप्यल्पप्रतापाः पाण्डयाः। ततोऽप्यल्पप्रतापः सूर्य इत्यर्थोऽत्र व्यंग्यः।

ते पाण्डयाः रघवे बहूनि मुक्ताफलानि उपजहुः। तानि तु मुक्ताफलानि तैः बहोः कालात् आरभ्य ताम्रपर्णीसंगमस्थानात् संचितानि। पाण्डयाः तत्सञ्चयं स्वं चिरार्जितं यश इव तस्मै ददुः। यशसो धावल्यं कविलोकप्रसिद्धम्। मुक्ताफलानां धावल्यं तु लोकप्रसिद्धम्।

ततो रघोः सैन्यानि अपरान्तप्रदशान् विविशुः। पश्चिमपयोधेः तीराप्रदेशा एवापरान्ताः। तान् जेतुं तस्य सेना उदयुङ्क्त। सा च आसह्यसमुद्रं आक्रम्यागोकर्णं च प्रससार। तदा संदर्शकानां एवमाशंका जाता, "पुरा परशुरामेण विदूरं यापितः समुद्रः किं पुनरपि सह्यपादं प्राप्तवान्" इति।

अथ केरलवनिताः अनाथाः पलायन्त इति वर्ण्यते।

54 भयोत्सृष्टविभूषाणां तेन केरलयोषिताम्।
अलकेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः॥

केरलानामाक्रमणप्रकार वर्णयति। केरलेषु ये ये राजानः वीराः योधाश्च आसन् ते सर्वेऽपि रघोः सैन्येन सह युद्ध्वा वीरोचितं मरणमवृण्वन्। तदा तेषामनाथा अशरणा धर्मपत्न्यः इतस्ततः पर्यधावन्। रक्षां लब्धुकामास्ता धावनावसरे भूषणानि तत्यजुः। भूषणानां शिञ्जारवश्रवणात् शत्रवः अनुधाव्य आक्रमणं कुर्वीरन्निति भयं भूषणत्यागे हेतुः स्यात्। अथवा तेषां भारः पलायने क्लेशहेतुश्च स्यात्। एवं भूषणानि त्यक्त्वा धावन्तीनां केरल-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वनितानां अङ्गानि अनलङ्कृतान्यदृश्यन्त। तासां सौभाग्यवेलासु अलकाः सदैव केतकीकुसुमपरागैः संस्कृताः आसन्। धावनसमये कथं तेषां वासचूर्णलब्धिः? नैव लभ्यते नूनम्। तथापि तासां अलकाः तदापि शून्याः नाभवन्। रघुः रेणुभिः तासां कुन्तलसंस्कारविधिं चकार।

भयेन उत्सृष्टाः विभूषाः याभिः ताः। उत्सृष्टः=त्यक्तः (उद् + सृज् + त) चम्वाः रेणुः। अलकाः=स्त्रीणां ललाटेषु लम्बमानाः चूर्णकुन्तलाः। अप्रतिनिधिः प्रतिनिधिः कृतः प्रतिनिधीकृतः (अभूततद्भावः) चूर्णानां प्रतिनिधीकृतः। चमूरेणुं चूर्णप्रतिनिधिं अकरोत् इत्यर्थः। योषित् = स्त्री चमूः=सेना।

अन्वयः—भयोत्सृष्टविभूषाणां केरलयोषितां अलकेषु तेन चमूरेणुः चूर्णप्रतिनिधीकृतः।

पूर्णक्रियाप्रयोगः	अपूर्णक्रियाप्रयोगः
सः चमूरेणुं चूर्णप्रतिनिधीचकार।	स चमूरेणुं चूर्णप्रतिनिधीकृतवान्।
तेन चमूरेणुः चूर्णप्रतिनिधीचक्रे।	तेन चमूरेणुः चूर्णप्रतिनिधीकृतः।

मुरलानद्यास्तटेषु केतकीकुसुमपरागाः आसन्। ते भटानां प्रसाधने उपचक्रुः।

55 मुरलामारुतोद्धूतमगमत् कैतकं रजः।
तद्योधवारबाणानां अयत्नपटवासताम्।

मुरलानदी केरलेषु प्रसिद्धा 'पेरियार्' इत्यनुमीयते। तस्याः तीरेषु केतकीकुसुमानि सुलभान्यासन्। तत्रत्यानि केतकीकुसुमरजांसि मारुतेन अन्तरिक्षे प्रसार्यमाणानि चासन्। रघोः सैनिकानां कञ्चुकाः तत्पर्यन्तं पर्यटनेन स्वेदोद्गमात् पूतिगन्धय आसन्। ते कञ्चुकाः केतकीकुसुमसुरभिणा मारुतेन सुरभिला अभवन्।

उद्धूतं (उद्+धू+त) = उपरि प्रसारितं वारबाणः = कञ्चुकः coat पटवासः=वस्त्रेषु सौरभ्याधायकं द्रव्यम्। गम् धातोः लुङि, अगमत् अगमतां अगमन् इति रूपाणि। अगच्छत् इति लङि रूपम्। केतक + अ = कैतक (तद्धितान्तः) केतकसंबन्धि।

अन्वयः—मुरलामारुतोद्धूतं कैतकं रजः तद्योधवारबाणानां अयत्नपटवासतां अगमत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुरलायाः मारुतेन उद्धूतं। तस्य योधानां वारबाणः। यत्नः अयत्नः। अयत्नेन सिद्धः पटवासः। अयत्नपटवासस्य भावः अयत्नपटवासता रजः पटवासतां अगमत् = रजः पटवासः अभवत्।

तत्र तालीवनानां सेनाश्वकवचानां च शब्दः समान एवासीत् इति कथ्यते।

56 अभ्यभूयत वाहानां चरतां गात्रशिञ्जितैः।
वर्मभिः पवनोद्धूतराजतालीवनध्वनिः॥

केरलेषु तत्र तत्र विशिष्य 'पालक्काट' परिसरेषु तालवृक्षाः निविडतया दृश्यन्ते। रघोः कालेऽपि तालवनानि केरलेषु प्रभूतान्यासन्। तेन तालवनमार्गेण रघोः सेना पुरोगच्छति। सेनाश्वानां लोहकवचाः प्रयाणे सञ्जातैश्चलनैः शब्दायमाना भवन्ति। उपरितलेषु तालपत्राणि पवनाघातैः घरघरशब्दमुत्पादयन्ति तदधोभागेन गच्छन्तोऽश्वाः अधस्तान् च कवचानां घरघरशब्दमुत्पादयन्ति। तथापि सेनाश्वकवचशब्दा तालपत्रेभ्य उत्पन्नान् शब्दान् अवश्चकुः। तालपत्रारवेभ्योपि उच्चैस्तराः अश्वकवचशब्दा इति भावः

अभि+अ+भू + य + त कर्मणि, लङ् = पराजीयत। वाहाः= अश्वाः गात्रेषु शिञ्जितैः शिञ्जद्भिः=शिञ्जारवं कुर्वद्भिः। वर्मभिः = कवचैः (वर्मन्)। राजतालीनां वनानि राजतालीवनानि। पवनेन उद्धूतानां राजतालीवनानां ध्वनिः। तालशब्दस्य स्त्रीत्वविवक्षायां ताली इति रूपम्। तालवृक्षाद् ईषद्भिन्नः द्रुमविशेषो वा।

अन्वयः—चरतां वाहानां गात्रशिञ्जितैः वर्मभिः पवनोद्धूतराजतालीवनध्वनिः अभ्यभूयत।

पूर्णक्रियाः		अपूर्णक्रियाः
कर्म-वर्माणि ध्वनिं अभ्यभवन्	—	वर्माणि ध्वनिं अभिभूतवन्ति।
कर्त-वर्मभिः ध्वनिः अभ्यभूयत	—	वर्मभिः ध्वनिः अभिभूतः।
कर्म-पवनः तालीवनं उदधुनोत्	—	पवनः तालीवनं उद्धूतवान्।
कर्त-पवनेन तालीवनं उदधूयत	—	पवनेन तालीवनं उद्धूतम्।

पुन्नागतरूणां खर्जूरीणां च बाहुल्यं वर्णयति।

57 खर्जूरीस्कन्धनद्धानां मदोद्गारसुगन्धिषु।
कटेषु करिणां पेतुः पुन्नागेभ्यः शिलीमुखाः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र अपरान्तेषु पुन्नागवृक्षाः सन्ति । " सुलताना चंपा " इति हिन्दी-भाषायां " पुन्ना " इति कैरल्यां च ज्ञायमानो वृक्ष एव पुन्नागः । तेषां प्रसूनेषु मधुबाहुल्यात् भ्रमराः पिपासवः आपतन्ति । तेषां परिसर एव स्थितेषु खर्जूरीवृक्षप्रकाण्डेषु रघोः सेनागजाः बद्धाः आसन् । तेषां कटेभ्यः अर्थात् गण्डेभ्यः मदजलं प्रवहति स्म । मदजलस्य गन्धः भ्रमरान् आकर्षत् । ततः ते भ्रमराः मधुमधुराणि पुन्नागपुष्पाणि विहाय ततोऽधिकसुरभिलेषु नागकट-कुंभेष्वपतन् ।

पुन्नागः = नागकेसरः अत्युन्नतो वन्यवृक्षविशेषः । खर्जूरी = खजूर, Date tree. स्कन्धः = काण्डः । नद्धाः = बद्धाः । उद्गारः = उत् स्रवणं कटः = गण्डः । शिलीमुखाः = भ्रमराः ।

अन्वयः — खर्जूरीस्कन्धनद्धानां करिणां मदोद्गारसुगन्धिषु कटेषु शिलीमुखाः पुन्नागेभ्यः पेतुः ।

खर्जूरीणां स्कन्धेषु नद्धाः । मदस्य उद्गारेण सुगन्धयः । नह्+त= नद्ध । (सन्नाहः परिणाहः पिनद्ध इत्यादयः) (करिन् नाग गज इभ वारण कुम्भिन् एते पर्यायाः) पेतुः = पत् (लिट्, प. व.) पपात पेततुः पेतुः ।

अपरान्तमहीपालाः रघवे करं ददुः ।

58 अवकाशं किलोदन्वान् रामायाभ्यर्थितो ददौ ।
अपरान्तमहीपालव्याजेन रघवे करम् ॥

परशुरामः पुरा समुद्रमभ्यर्थितवान् । 'हे समुद्र! अस्माकं निवासाय किंचित् स्थानं देहि' इति । समुद्रस्तु दयालुः रामस्य दीनदशामालोक्य तस्मै निवासार्थं अवकाशं दत्तवान् । केरलदेशः परशुरामस्याभ्यर्थनया समुद्रेण दत्तः इति प्रसिद्धम् । तादृशः समुद्रः रघवे करमयच्छत् किल । समुद्रः स्वयं करं न दत्तवान् । किन्तु अपरान्तमहीपाला इति व्याजेन । ते राजानः रत्नाकर इव संपन्नाः गंभीराश्च । तेषां विधेयता खलु समुद्रस्यापि विधेयीभावः । क्षात्रकुलान्तकः स रामः यस्य सविधे याचकोऽभवत् स एव समुद्रो रघोर्दर्शनेनैव विधेयोऽभवत् इति भावः ।

अवकाशः = स्थानम्, स्थलम् । करः = बलिः (सामन्तनृपैः सम्राजे दीयमानं धनं) । उदन्वान् = समुद्रः । व्याजः = कापट्यं । व्याजेन = अलीकबोधमुत्पाद्य । अपरान्तानां महीपालाः इति व्याजेन ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्वयः— उदन्वान् अभ्यर्थितः सन् रामाय अवकाशं ददौ किल। स (उदन्वान्) अपरान्तमहीपालव्याजेन रघवे करं ददौ।

त्रिकूटपर्वतं रघुः जयस्तंभीचकार।

59 मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणम्।
त्रिकूटमेव तत्रोच्चैर्जयस्तम्भं चकार सः॥

अस्त्यपरान्तेषु त्रिकूटो नाम पर्वतः। रघुः तं पर्वतमुन्नतं जयस्तम्भं चकार। स पर्वतः रघुणा जयस्तम्भीकृत इत्यर्थः। जयस्तम्भेषु विजेतारः राजानः स्वनामपराक्रमशासनादीनि उट्टंकयन्ति (Engrave) खलु। अस्मिन् स्तम्भेऽपि रघुः नामशासनादीनि आलेखयामास। कथं स आलेखयति स्म? सन्ति तस्य सेनायां मत्तगजाः। ते मदमसहमानाः तत्सानुप्रदेशेषु तत्र तत्र दन्तैरुत्किरन्ति स्म। एवमुत्कीर्णा रेखा नामविक्रमचरितशासनादिरूपतया अत्र निर्दिष्टाः। तथा हि, मत्तगजाः उट्टंकनकलापटवः शिल्पिनः इति कल्प्यते। तेषां दन्ताः टंकस्थाने कल्पिताः। सानुषु समुत्पन्ना रेखा रघोर्नामविक्रमशासनानि च। त्रिकूटो जयस्तंभश्च।

अन्वयः—तत्र सः मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणं त्रिकूटमेव उच्चैः जयस्तम्भं चकार।

मत्ताश्च ते इभाश्च मत्तेभाः, तेषां रदनैः उत्कीर्णानि व्यक्तानि च विक्रमलक्षणानि यस्मिन् सः। (बहुव्रीहि)

मत्तेभः = मत्तगजः। रदनाः = दन्ताः। उत्कीर्ण = उट्टंकित (Engraved) क्वचित् क्तप्रत्ययस्य भावार्थो लभ्यते। गतागतं इत्यत्र गमनागमनं इत्येवार्थः। न तु गतः आगतः इति। एवं उत्कीर्णं इत्यस्य उत्किरणं अथवा उट्टङ्कनं इत्यर्थः। उत् + कॄ + त। टंकः = Chisel.

कतिचन अपूर्णक्रियाः (कृदन्ताः) स्थानव्यत्ययात् पूर्णक्रियाभावं भजन्ते। अपूर्णक्रिया यदि विशेष्यपदेभ्यः पूर्वं प्रयुज्यन्ते तर्हि ताः अपूर्णाः अर्थात् विशेषणान्येव भवन्ति। परन्तु यदि ताः विशेष्यपदेभ्यः परं वाक्यानामन्ते प्रयुज्यन्ते तर्हि ताः पूर्णक्रियाणां कार्यं निर्वहन्ति। कृदन्तेषु अर्थात् अपूर्णक्रियासु नामविशेषणार्हाः कतिचन शब्दा अत्र संगृह्यन्ते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

	प्रत्ययाः	अपूर्णाः	पूर्णाः	लकाराः	कालाः
I a)	शतृ (अत्)	लिखत्	लिखति	लट्	कर्तरि
b)	शानच् (आन)	भासमान	भासते	लट्	वर्तः
II	क्तवतु (तवत्)	लिखितवत्	अलिखत्	लङ्	
			अलेखीत्	लङ्	
III	क्वसु (वस्)	लिलिखिवस्	लिलेखे	लिट्	कर्तरि
IV	क्त (त)	धावित (अकर्मक)	अधावत्	लङ्	भूतः
V	क्त (त)	लिखित	अलिख्यत	लङ्	कर्मणि
			अलेखि	लङ्	भूतः
			लिलिखे	लिट्	
VI a)	य	लेख्य			कर्मणि
b)	तव्य	लेखितव्य	लिख्यतां	लोट्	प्रकाराः
c)	अनीय	लेखनीय	लिख्येत	लिङ्	

ग्रामं गतः रामः........ रामः ग्रामं गतः (अगच्छत्)

पाठं पठितवती सीता........ सीता पाठं पठितवती (अपठत्)

मया दृष्टः गजः........ मया गजः दृष्टः (अदृश्यत)

तेन लेख्यं पत्रं........ तेन पत्रं लेख्यं (लिख्येत or

(or लेखितव्यं,लेखनीयं) (or लेखितव्यं, लेखनीयं) लिख्यतां)

अत्रेदमवधेयम् । भूतकाले प्रकारार्थे च अपूर्णक्रियाणां पूर्णक्रियास्थाने प्रयोगः साधारणः । न तथा वर्तमाने भविष्यति च । यथा "रामः अगच्छत्" 'रामेण लिख्येत' इत्येतयोः स्थाने 'रामः' । 'रामेण लेखनीयं । इति सुलभं प्रयुज्यते ; किन्तु 'रामः गच्छति' 'रामः गमिष्यति' इत्येतयोः स्थाने 'रामः गच्छन्' 'रामः गमिष्यन्' इति न प्रयुज्यते । तत्र 'रामः गच्छन् अस्ति' गमिष्यन् अस्ति (आस्ते) इत्येव प्रयोक्तव्यम् । भूतकाले प्रकारार्थे च क्वचन 'अस्ति' 'स्यात्' इत्यादिः 'अस्' धातोः अनुप्रयोगः प्रायशो दृश्यत एव । तथापि तत्रापि 'रामेण पुस्तकं पठितमस्ति' इत्यस्य 'रामेण पुस्तकमपठ्यत' इत्येव सामान्यतः तात्पर्यं प्रतीयते । 'रामेण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्तव्यमस्ति' इत्यस्य 'रामेण क्रियेत' इति संपिण्डितोऽर्थः । ते गजं दृष्टवन्त आसन् = ते गजं अपश्यन् । अयं प्रस्तावः केवलं सामान्यबोधायैवात्र कृतः । बोधस्याल्पाल्पभेदमनुसृत्यैव सर्वास्वपि भाषासु प्रयोगाणां वैविध्यमपि प्रचारमविन्दत । I went, I have gone, I had gone. वह गया, वह गया है, वह गया था इत्यादयः प्रयोगाः इतरभाषास्वपि भूतकालबोधे वैविध्यं जनयन्ति । एतं विषयमधिकृत्य विशेषपठनमग्रे भविष्यति ।

[निविविशिरे = न्यविशन्त । खुरः = hoof. लग्नाः = सक्ताः. ससञ्जुः = सक्ता अभवन्. जरठाः = वृद्धाः. आस्यम् = मुखम्. प्रसार्य = व्यादाय. झटिति = द्रुतं, कवलयन्ति = ग्रसन्ति. शरीरभोगपरिक्लृप्ताः = शरीरवेष्टनेन सीमिताः अर्थात् केवलं शरीरवेष्टनेन संबद्धाः. आभोगः = अवकाशः. विहाय = त्यक्त्वा, वृक्षान्तरं = अन्यो वृक्षः, रज्जुः = पाशः आहत्य = एकीकृत्य । सञ्चित = पुञ्जीकृत । धावल्यं = शुभ्रता । उदयुङ्क्त = उद्यक्ता अभवत् । पूतिगन्धयः = दुर्गन्धयुक्ताः । पलायन्त = अधावन् कवचः = Armour. आघातः = आहननं, संघट्टनं देहि = यच्छ ।]

॥ अभ्यासः ॥

I अधोरेखांकितानि पदयुग्मकानि एकपदे प्रयुङ्क्त । यथा—

1) मया पत्रं **लिख्यमानं आस्ते** । मया पत्रं लिख्यते ।
2) मया पाठः **पठितः आसीत्** । मया पाठः अपठ्यत ।
3) रात्रौ नक्षत्राणि **दृश्यानि स्युः** । रात्रौ नक्षत्राणि दृश्येरन् ।

1) पित्रा पुत्रः **ताडितः आसीत्** । 2) मया देवः **पूज्यमान आस्ते** ।
3) तवाभिप्रायो मया **स्वीकार्यः स्यात्** 4) त्वया अहं **दृष्टः आसम्** ।
5) मया शीतं जल **पेयं स्यात्** । 6) सीतया त्वं **कथितः आसीः** ।

II प्रत्ययांशान् विघटयत । यथा—सञ्जातः सं + जन् + त ।

1) अभ्यभूयत । 2) उत्सृष्टः । 3) अभ्यर्थितः ।
4) उत्कीर्ण । 5) ददौ ।

III पाठारम्भे पद्यानां संक्षेपं अनुवदत ।

IV अत्र पठितानां पद्यानां सारं संस्कृतभाषायां संक्षिप्य लिखत ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

षड्विंशो दिवसः

अतीते दिवसे वयं रघुं केरलप्रान्तमुपागतं अपश्याम। यदा स ससैन्यः केरलान् प्राप, तदा तत्रत्या नृपाः तं अभ्ययुध्यन्त। युध्यमानास्ते वीरोचितां मृतिमवापुः। तदानीं तेषां अशरणाः स्त्रियः इतस्ततो भीताः पलायन्त। तासां अंगेषु विविधानि भूषणानि आसन्। पलायनवेलायां तेषां भूषणानां भारं वोढुं ताः न अशक्नुवन्। तासां धावनं भूषणशब्दैः अनुमाय सैनिकाः ताः अनुधावेयुः इति भीतिरन्यः प्रतिबन्धोऽप्यासीत्। तस्मात् ताः भूषणानि मार्गे तत्यजुः। एवं भूषारहितानां तासां सुन्दरीणां दर्शनं रघुः नासहत। "अहो! कियत् सौन्दर्यवत्य एतास्तरुण्यः! आसां भूषणशून्यानि गात्राणि कथमहं पश्यामि? यथाशक्ति तासां अंगानि भूषयेयम्"। इति चिन्तयन् स सहृदयो रघुः तासां अलकान् चमूरेणुभिः अलंचकार। सेनापरागाणां केतकपरागाणां च वर्णे सादृश्यमस्ति।

एवं तांस्तान् प्रदेशान् जित्वा स जेता केरलेषु 'पेरियार्' इति नाम्ना अधुना प्रख्यातायाः मुरलानद्याः परिसरं प्राप्नोति। सेयं नदी पुरा कोटिलिंगपुरं (कोडुङ्ङल्लूर्) गत्वा पश्चिमसमुद्रं अभिगच्छन्ती आसीत्। क्रिस्तोः पश्चात् चतुर्दशे शतके संभूता किल काचिदतिवृष्टिः। ततः संजातेन जलप्रलयेन प्रभूतसलिला सा नदी 'आलुवा' शिवमन्दिरस्यान्तिकादारभ्य द्विमुखी समजनि। नवीना शाखा अवाङ्मुखो भूत्वा दक्षिणया दिशा प्रवहन्ती 'कोचिन् कानल्' इत्यधुना प्रसिद्धे जलाशये पपात। सैव शाखा क्रमशः परिपुष्टा अभवत्। प्राचीना पश्चिमया दिशा कोटिलिंगपुरीमभिगच्छन्ती शाखा तु प्रतिवर्षं गाधा विरलजला चासीत्। क्रिस्तोः पश्चात् चतुर्दशशतकात् पूर्वं केरलानां प्रमुखो नौकाशयः कोटिलिंगपुरमेवासीदिति प्रसिद्धं खलु। सैव नदी मुरलेति नाम्ना अत्र परामृश्यते। तस्या मुरलानद्याः परिसरेषु केतकनिकुञ्जानि निबिडतया प्ररोहन्ति। रघोः भटानां कञ्चुकाः स्वेदोद्गमैः पूतिगन्धयः अजायन्त। तेषां दुर्गन्धिनां वारवाणानां सुरभीकरणविधिं ते परागा एव चक्रुः।

अथ केरलेषु तालीवनानामाधिक्यमासूचयन् आयात्यनन्तरः श्लोकः। रघोः सैन्येषु अश्वाश्चरन्ति। तेषां गात्रेषु कवचाः सन्ति। अश्वानां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्लुतिभूयिष्ठैः प्रयाणैः ते कवचाः परस्परमंघट्टनैः घरघरारवमुत्पादयन्ति । ते येन मार्गेण सञ्चरन्ति तेषां पर्यन्तभूषु राजतालीवृक्षा अवर्तन्त । राजताल्यस्तु तालवृक्षजातावन्तर्गताः विस्तृतपर्णवत्यश्च । तेषां पत्रेणैव केरलेषु ग्रामीणाः आतपत्रमारचयन्ति । तासां पत्राणि वैपुल्येन विस्तृततया च मन्दवातेनापि परस्परं घर्षयन्ति । पत्राणां परुषतया तदा महान् घरघरारवो जायते । तान् राजतालीवनपत्रजातान् घरघरारवान् सैन्याश्वकवचजनितघरघरारवः अधश्चकार । पत्रघर्षणशब्दादप्युच्चैस्तरः अश्वानां कवचशब्द इति भावः ।

केरलानतिक्रम्य पश्चिमपयोधितीरेणैव उत्तरां दिशं रघुर्गच्छति स्म । कस्मिंश्चित् खर्जूरीप्रचुरे प्रदेशे स सेनां न्यवेशयत् । सेनागजाः खर्जूरी-काण्डेष्वबध्यन्त । तेषां मत्तगजानां गण्डेभ्यः मदजलं प्रवहदवर्तत । तेषां मदजलानां गन्धः अन्तरिक्षे प्रसृतो बभूव । तेषां निकटप्रदेशेषु पुष्पिताः पुन्नागवृक्षाः अविद्यन्त । तेषां पुष्पाणि नितरां सुरभिलानि च । तेभ्यः कुसुमेभ्यो भृगाः मधु पिबन्त आसन् । गजानां मदजलपरिमले आकाशे प्रसरति ते भ्रमराः पुन्नागपुष्पाणि विहाय करिणां स्रवन्मदजलेषु कुम्भेषु पेतुः । पुन्नागपुष्पेभ्योऽप्यधिकसुगन्धयः करिकटा इति व्यज्यते ।

अथान्ये केचन अपरान्तनृपाः रघवे करं दत्वा स्वविधेयतां अंगीचक्रु-रित्यर्थं भंग्यन्तरेण कथयति । परशुरामः पुरा समुद्रमुपगम्य एवं ययाचे । हे रत्नाकर, हे अगाधहृदय, मम निवासार्थं किञ्चित् स्थलं देहि । एतां अर्थनां निशम्य करुणार्द्रचित्तः स समुद्रः तस्मै निवासाय अवकाशं दत्तवान् । अत्र समुद्र उत्तमर्णः (creditor) रामोऽधमर्णः (debtor) च अभूताम् । स एव रत्नाकरोऽधुना विधेयो भूत्वा रघवे करं ददौ । समुद्रः स्वयं प्रत्यक्षमागत्य न ददौ किन्तु अपरान्तराजरूपेणैव । अयमाशयः । अपरान्तराजाः तस्मै करं ददुः । ते नृपाः गाम्भीर्यात् रत्नाकरत्वाच्च पश्चिमसमुद्रप्रतिरूपा आसन् । तस्मात् नृपैः कृतं करदानं मर्त्याकारं धृतवता समुद्रेण कृतं करदानमिति अनुमीयते ।

रघुरपरान्तविजयानन्तरं त्रिकूटपर्वतमेव स्वं जयस्तम्भं चकार । न तु वङ्गविजयानन्तरमिव कृत्रिमं जयस्तम्भं निचखान । विजयस्तम्भेषु विजयिनो विजयवार्तायाश्च अक्षराण्यालेख्यन्ते खलु । अत्र त्रिकूटपर्वते कथमक्षरलेखनं कृतम्? उच्यते । रघोः सेनासु मत्तगजाः आसन् । तैः मदमसहमानैः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रिकूटसानवः दन्तैरुत्कीर्यन्ते स्म । तस्मात् तत्र तत्र रेखा दृश्याः संजाताः । ताभिः रेखाभिरङ्कितः स त्रिकूटपर्वतः तस्य जयस्तम्भीभवितुं युक्त एव । ईदृशं जयस्तम्भं तत्र प्रतिष्ठाप्य स पश्चिमोत्तरां दिशं प्रातिष्ठासत ।

पश्चिमोत्तरेण मार्गेण स पारसीकान् प्रदेशान् प्राप ।

60 पारसीकांस्ततो जेतुं प्रतस्थे स्थलवर्त्मना ।
इन्द्रियार्थानिव रिपूंस्तत्त्वज्ञानेन संयमी ॥

रघुरपरान्तविजयानन्तरं पश्चिमसमुद्रतीरेणैव उत्तराभिमुखो जगाम । रघोः काले (कालिदासकाले इत्येव सुवचम्) सिन्धुनद्याः पश्चिमतीरादारभ्य पश्चिमभागे विद्यमानाः प्रदेशाः पारसीकनाम्ना प्रसिद्धा आसन् । रघुः तान् पारसीकान् विजेतुं तदभिमुखो जगाम । अपरान्तेभ्यः जलमार्गेण स्थलमार्गेण च पारसीकान् गन्तुं शक्यम् । रघुः स्थलमार्गेणैव जगाम । मध्येमार्गं यदि केचन नृपाः अविधेयाः स्युः तेषामपि विधेयतापादनमेव स्थलमार्गप्रयाणस्योद्देश्यम् । जलमार्गे तु तस्यावकाशोऽपि न स्यात् । तां विजययात्रां कविरुपमाति । कश्चन योगी मोक्षमभिलषति । मोक्षलब्धेर्विघातकारीण्येवेन्द्रियाणि । इन्द्रियाणि सदा इन्द्रियार्थानुधावनेन मनःचञ्चलं व्यग्रं च कुर्वन्ति । मनश्चाञ्चल्यादेकाग्रताभंगः । एवं स योगी लक्ष्यात् व्यतिचलति । यदि कश्चन मोक्षरूपं लक्ष्यं प्राप्तुमिच्छति तर्हि प्रथमत एव इन्द्रियाणां विजयः कार्यः । एवमेव यदि रघुः दिग्विजयरूपं लक्ष्यं प्राप्तुमिच्छति तर्हि पारसीकाः जेतव्या एव । तदर्थं स पारसीकान् प्रतस्थे । स्थलमार्गेण गतस्य तस्य विजय एव स्तुत्यर्हः । तथा तत्त्वज्ञानेन लभ्यो मोक्ष एव महत्तरः । न तु येनकेन प्रकारेण लब्धः ।

पारसीकाः = Persians इन्द्रियाख्यान् = इन्द्रियनामकान् संयमी = यतिः मुनिः वर्त्म = मार्गः ।

अन्वयः — ततः सः, इन्द्रियाख्यान् रिपून् जेतुं संयमी तत्त्वज्ञानेन इव, पारसीकान् जेतुं स्थलवर्त्मना प्रतस्थे ।

इन्द्रियं इति आख्या येषां ते । इन्द्रियस्वरूपाः इत्यर्थः । तत्त्वज्ञानं = ब्रह्म सत्यं जगत् मिथ्या इति बोधः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रघोः पारसीकगमनं पारसीकवनितानां मुखानि ग्लापयति स्म ।

61 यवनीमुखपद्मानां सेहे मधुमदं न सः ।
बालातपमिवाब्जानामकालजलदोदयः ॥

पारसीकास्तु निश्चिन्ता निरपायाश्चावर्तन्त । तस्मात् तेषां स्त्रियो यवन्यश्च अर्थात् पारसीकवनिताश्च निरातङ्का आसन् । मधु पिबन्तीनां मधुरं जीवितं स्वदमानानां तासां मुखानि मदाधिक्येनारुणान्यदृश्यन्त । तस्य कारणं तद्भर्तॄणां निर्भयता अथवा निश्चिन्ततैव खलु । तत् स्वैरजीवितं रघुर्नासहत । सः तासां सुखजीवितभञ्जकः संवृत्त इत्यर्थः । उपमया उक्तं स्पष्टीकरोति । बालातपः खलु कमलानामरुणिम्नो हेतुः । तमातपं यथा मेघः अपवार्य कमलानां सौभाग्यं नाशयति तथा रघुः पारसीकान् निहत्य तेषां पत्नीनां मुखशोभामपाहरदिति भावः ।

अन्वयः— अकालजलदोदयः अब्जानां बालातपमिव सः यवनीमुखपद्मानां मधुमदं न सेहे ।

यवनीमुखान्येव पद्मानि । मधुनः मदं । बालश्चासौ आतपश्च । न कालः अकालः । जलदस्य उदयः । अकाले जलदोदयः । सेहे = असहत सह् (लिट् आत्मनेपदम्) सेहे सेहाते सेहिरे । अब्जं = कमलं ।

तत्पुरुषसमासस्य उपविभागाः अत्र संक्षिप्यन्ते ।

यवनीनां मुखानि = यवनीमुखानि । (नामपदयोः समासः) ।
मुखानि पद्मानि इव = मुखपद्मानि । (उपमानोपमेययोः)
बालश्चासौ आतपश्च = बालातपः । (विशेषणविशेष्ययोः)
न कालः = अकालः । (निपातनामपदयोः)
गृहीतः च असौ प्रतिमुक्तः च = गृहीतप्रतिमुक्तः । (विशेषणयोः)
पुरुहूतस्य प्रीतये स्थापितः ध्वजः = पुरुहूतध्वजः (मध्यमपदलोपः)

एते सर्वेऽपि उत्तरपदार्थप्रधानाः समासाः । तस्मात् एते तत्पुरुषे अन्तर्भवन्ति । अन्येऽपि केचन सन्त्येव । तत्पुपुरुषस्य एतादृशाः विविधाः विभागाः सन्तीत्येवात्र अवधार्यम् । प्रायशः अर्थबोधाय इयतालम् ।

पारसीकैः सह अतिभीमं युद्धमजायत ।

62 संग्रामस्तुमुलस्तस्य पाश्चात्यैरश्वसाधनैः ।
शार्ङ्गकूजितविज्ञेयप्रतियोधे रजस्यभूत् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाश्चात्य, यवन, हूणशब्दा: प्रायश: वैदिकमतानवलंबिनां सिन्धुनद्या: आरभ्य पाश्चात्यजनपदवासिनां पर्यायतया अत्र प्रयुक्ता: । रघु: तत्र यवनै: सह अयुध्यत । यवनानां युद्धसामग्रीषु प्रधानभूता: अश्वा: सन्ति । तत: तस्य तुरगसैन्यै: सह योद्धुं अवसरो लब्ध: । तत् युद्धं तु रेणुपटलीभि: संकुलमभूत् । प्रतिभटा: कुत्र तिष्ठन्तीति द्रष्टुमपि ते परस्परं न पारयन्ति स्म । पुनस्ते तत् कथमजानत ? समराङ्गणेषु प्रोत्साहनार्थं शार्ङ्ग: कूज्यते । तस्य शार्ङ्गजनस्य श्रवणेनैवं प्रतिभटा: कुत्र तिष्ठन्ति, कुतस्ते आक्रामन्ति इति ज्ञानं पक्षद्वयस्याप्यभूत् ।

संग्राम: = रणम् । तुमुल: = संकुल:, प्रचण्ड: । अश्वा एव साधनानि येषां ते । शार्ङ्ग: = महिषादीनां शृंगै: विरचितं किञ्चन वाद्योपकरणम् । शार्ङ्गाणां कूजितं शार्ङ्गकूजितं । शार्ङ्गकूजितेन विज्ञेया: प्रतियोधा: यस्मिन् तत् (रणम्) ।

अन्वय:—अश्वसाधनै: पाश्चात्यै: शार्ङ्गकूजितविज्ञेयप्रतियोधे रजसि तस्य तुमुल: संग्राम: अभूत् ।

पुरातने काले उक्षमहिषादीनां शृङ्गेषु यथास्थानं सुषिरान् विधाय मुखवायुप्रवहणेन नादमुत्पादयन्ति स्म । अद्यापि केरलेषु पञ्चवाद्यमेलादिषु शार्ङ्गनादो मुखर: श्रूयते । अधुना तु स लोहनिर्मित इत्येव भेद: । तथापि तस्य अद्यापि शृंगपर्यायेण 'कोंबू' इति पदेनैव मलयाले व्यवहारो भवति । प्रतियोधा: = प्रतिभटा: । रज: = धूलि: । विज्ञातुं योग्या: विज्ञेया: (वि + ज्ञा + य) कर्मणि प्रकारार्थ: । (ज्ञातव्या:) अत्र कश्चिद् विशेष: । अस्मिन्नर्थे विधीयमाने यप्रत्यये परे आकारान्तो धातु: एकारान्त: संपद्यते ।

पा—पेय, पातव्य ।	मा—मेय, मातव्य ।
गा—गेय, गातव्य ।	दा—देय, दातव्य ।
धा—धेय, धातव्य ।	हा—हेय, हातव्य ।

रघु: यवनानां शिरांसि छित्वा भूमिं आच्छादयामास ।

63 भल्लापवर्जितैस्तेषां शिरोभि: श्मश्रुलैर्महीम् ।
तस्तार सरघाव्याप्तै: स क्षौद्रपटलैरिव ॥

श्मश्रूणि नाम मुखरोमाणि । यवना: श्मश्रुला: । ते मुखरोमाणि वर्द्धयन्ति न ते क्षुरन्ति । युद्धे रघुणा तेषां श्मश्रुलानि शिरांसि भल्लै:

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आयुधविशेषैः निकृत्तानि । तानि भूमौ निपेतुः । निपतितानि तानि शिरांसि मधुमक्षिकाभिर्व्याप्तानि क्षौद्रपटलानीव अदृश्यन्त । तादृशैः शिरोभिः तद्रणाङ्कणं रघुराच्छादयामास ।

सरघाः = मधुमक्षिकाः, (bees). क्षौद्रपटलं = मधुपटलं (honey comb). भल्लाः = आयुधविशेषाः । अपवर्जिताः = निकृत्ताः, छिन्नाः । तस्तार = आच्छादयामास । मही = भूमिः ।

अन्वयः—सः भल्लापवर्जितैः श्मश्रुलैः तेषां शिरोभिः सरघाव्याप्तैः क्षौद्रपटलैः इव महीं तस्तार ।

श्मश्रु अस्य अस्तीति श्मश्रुलम्, श्मश्रुमत् (bearded). मत् प्रत्ययस्यार्थे अयं लप्रत्ययः पाक्षिको विधीयते । पांसुल, मांसल, श्रील, धाराल, पक्ष्मल आदयः शब्दाः एवं निष्पन्नाः । तस्तार (स्तृ लिट्) तस्तार तस्तरतुः तस्तरुः । विस्तारः, विस्तरः आस्तरणं, प्रस्तरः, विस्तृत, आस्तृत, आदयः अस्मादुत्पन्नाः ।

शिष्टा यवनाः रघुं शरणं जग्मुः ।

64 अपनीतशिरस्त्राणाः शेषास्तं शरणं ययुः ।
प्रणिपातप्रतीकारः संरंभो हि महात्मनाम् ॥

तस्मिन् युद्धे बहवो मृताः । शेषाः त्यक्तयुद्धोद्यमाः रघुं शरणं प्रापुः । ते सदा शिरस्त्राणवन्तः सन्ति । रघुणा विजितास्ते यवनाः शिरस्त्राणमपनीय विजेतारं रघुमेव शरणीचक्रुः । शिरस्त्राणापनयनं विधेयतासूचकं किल । रघोस्तु तेषां शरणं गतानां वधे प्रतिपत्तिर्नासीत् । सूर्यवंशसंभूतः स उदारो दयालुश्च । शत्रूणां प्रति सञ्जातः तस्य रोषः तेषां विधेयतापर्यन्तमेवावतिष्ठते । शत्रूणां प्रणिपात एव तेषां कोपस्य प्रतीकारः न तु तेषां अशरणानां हत्या । महान्तः परकीयमौद्धत्यं न सहन्ते । तेषामानन्दमयं जीवितमभीष्टमेव ।

अपनीत = दूरीकृत । शिरस्त्राणं = उष्णीष, turban. संरंभः = कोपः । हि = खलु ।

अन्वयः— शेषाः अपनीतशिरस्त्राणाः तं शरणं ययुः । महात्मनां संरंभः प्रणिपातप्रतीकारः हि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपनीतानि शिरस्त्राणानि यैः ते । प्रणिपात एव प्रतीकारः यस्य सः । महान्तः आत्मानः येषां ते । अत्रास्ति विशेषः । महत्+आत्मा इत्यस्य समस्तपदं महदात्मा इत्येव भवेत् । कथम् महात्मा इति? उच्यते । 'महत्' इति पदं यदा विशेषणतया समस्यते तदा 'महा' इति आकारान्तो जायते । यदि नामतया समस्यते तर्हि महत् इत्येव भवति । महान् च असौ पुरुषः च महापुरुषः । महतां सान्निध्यं महत्सान्निध्यम् ।

अप+नी+त । शिरस्+त्रा+अनं । प्र+नि+पत्+अ ।

योधाः मधु निपीय युद्धक्लममपनिन्युः ।

65 विनयन्ते स्म तद्योधा मधुभिर्विजयश्रमम् ।
आस्तीर्णाजिनरत्नासु द्राक्षावलयभूमिषु ॥

युद्धमवसितम् सर्वमपि प्रशान्तम् । किन्तु भटानां युद्धक्लेश एवावशिष्टः । तमप्यपनेतुं ते भटा उदयुञ्जत । द्राक्षाफलादुत्पाद्यमानं स्वादिष्ठं मद्यं तत्र प्रभूतं लभ्यते । चर्मभिर्निर्मितान्यत्युत्तमानि आस्तरणान्यपि तत्र सुलभानि । द्राक्षावलयैः निबिडा वाटिका अपि तत्र विद्यन्ते । तासु मृद्वीकलतावलयेषु उत्कृष्टचर्माण्यास्तीर्य आसीनाः द्राक्षाफलोत्पन्नं मद्यरसमास्वदमानास्ते रघोर्भटाः युद्धक्लममपानयन् ।

अजिनं=चर्म । अजिनरत्नानि=उत्कृष्टचर्माणि । विनयन्ते स्म=अपानयन्, दूरीचक्रुः । (वि+नी) विनयः, अपनयः, प्रणयः, परिणयः, नयनं, अनुनयः आदि ।

अन्वयः- तद्योधाः आस्तीर्णाजिनरत्नासु द्राक्षावलयभूमिषु (आसीनाः) मधुभिः विजयश्रमं विनयन्ते स्म ।

आ+स्तॄ+त=आस्तीर्ण=आवृत, आच्छन्न । आस्तीर्णानि अजिनरत्नानि यासु तासु । रत्नशब्दोऽत्र उत्कृष्टार्थे प्रयुक्तः । यथा - राजरत्नम्=उत्कृष्टो राजा ।

[पलायन्त = अधावन् । चमूरेणुः = सेनापरागः । समजनि=समजायत, सञ्जाता । अवाङ्मुखी = दक्षिणाभिमुखी । गाधा × अगाधा । निकुञ्जः = लतापुञ्जः । प्लुतिभूयिष्ठैः = उत्पतनप्रचुरैः, उत्प्लवनाधिकैः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सरन्ति = प्रयान्ति । घर्षयन्ति = संघट्टयन्ति । स्रवन्मदजलेषु = मदजलं स्रवत्सु । कुम्भेषु = मस्तककुम्भेषु । निशम्य = श्रुत्वा । सानुः = उपत्यका शक्यं = साध्यं । मोक्षलब्धेःविघातकारीणि एव इन्द्रियाणि । इन्द्रियार्थः = इन्द्रियविषयः । व्यग्रं = विवशं । स्तुत्यर्हः = स्तोतुमर्हः प्रशंसनीयः । म्लापयति = निष्प्रभीकरोति अरुणानि = रक्तवर्णानि अपवार्य = आवृत्य इयता = एतावता पारयन्ति = प्रभवन्ति, शक्नुवन्ति, त्यक्तयुद्धोद्यमाः = युद्धोद्यमं त्यक्तवन्तः हत्या = वधः चर्मभिः निर्मितानि अत्युत्तमानि मृद्वीका = द्राक्षा आस्तीर्य = परिधाय ।]

॥ अभ्यासः ॥

I निर्दिष्टरीत्या विपरिणमयत । यथा—सः हसति स्म = स अहसत् ।

सीता संभाषते स्म = सीता समभाषत—

1) रामः सीतां परिणयति स्म । 2) कन्या दीपं प्रज्वालयति स्म ।
3) गुरुः शिष्यं अनुमोदते स्म । 4) सुहृदः नाटकं समीक्षन्ते स्म ।
5) मातरः पुत्रीषु स्निह्यन्ति स्म । 6) अहं वार्तां अवगच्छामि स्म ।

II पदानि संयोज्य समासानां संज्ञाः वदत—यथा—जगतां पतिः = जगत्पतिः, तत्पुरुषः । शक्तिं अनतिक्रम्य = यथाशक्ति, अव्ययीभावः ।

1) अरुणं च तत् अम्बुजं च । 2) विज्ञानस्य निधिः 3) सुखं च दुःखं च 4) कालमनतिक्रम्य 5) महद् बलं यस्य सः ।

III यथोचितं पूरयित्वा वाक्यानि रचयत—

1) रघुः...जेतुं.... 2) सः यवनीमुखपद्म मधुमद न सह् ।
3) जलद अब्ज बालातप न सह् । 4) रघु भट पाश्चात्य सह युध् ।
5) तद्योधाः आसीना...विनयन्ते स्म ।

IV अद्यतनपाठारम्भे दत्तं पाठसंक्षेपं अनुवदत ।

V अद्य पठितानां पद्यानां संक्षेपं संस्कृतभाषायां लिखत ॥

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सप्तविंशो दिवसः

अपरान्तविजयानन्तरं पारसीकान् जेतुं रघुः प्रस्थातुकाम आसीदिति 'पारसीकांस्ततो जेतुम्' इत्यादिना पद्येन वर्णयति । अपरान्तेभ्यः पारसीकान् गन्तुं द्वौ मार्गौ स्तः । एको जलमार्गः । इतरस्तु स्थलमार्गः । स स्थलमार्गमेवावालंबत । यदि जलमार्गेण गम्यते तर्हि तस्य पराक्रमस्य प्रकाशनावकाशो न स्यात् । कुतः ? समुद्रे न कश्चनापि तमभियोद्धुमागमिष्यति । पारसीकप्राप्तिपर्यन्तं तेन नौकायां निद्राणेनैव भवितव्यम् । पराक्रमस्यावसरो न स्यात् । स्थलमार्गेण यात्रायां तु इतस्ततो नृपैः सह योद्धुमवसरो लभ्येत । ततः स जलमार्गं विहाय स्थलमार्गेणैव प्रातिष्ठत । तस्य मार्गस्य प्राधान्यं कविरुपमया स्पष्टीकरोति । कश्चित् संयमी वर्तते इति कल्पयामः । स इन्द्रियस्वरूपान् शत्रून् जेतुं प्रयतते । स स्त्रियः परिहरति । भोग्यवस्तूनि न स्वीकरोति । सिनेमाशालादिकान् इन्द्रियसन्तर्पकान् सर्वानपि दूरं त्यजति । यावत् तत्त्वज्ञानं न जायते तावत् एते परिहरणोद्यमाः सर्वेऽपि व्यर्था एव । पुनरप्यासक्तिरवशिष्यते । तदा स तत्त्वज्ञानरूपेण मार्गेण इन्द्रियान् निग्रहीतुमुद्युङ्क्ते तदा तेन विजयो नियतमेव लभ्यते । तथा स्थलमार्गेण गत्वा पारसीकानां विजय एव शाश्वतो विजयः, अन्यथा तु क्षणिक एवेति च सूचयति ।

अथ 'यवनीमुखपद्मानाम्' इति द्वितीयः श्लोको विव्रियते । अत्र यवनशब्दमधिकृत्य किञ्चिद्वक्तव्यमस्ति । यवनशब्दः पारसीकानां पर्यायतया अत्र प्रयुक्तः । वैदिकेतरधर्मावलंबिनः पाश्चात्यदेशेभ्यः समागताः जनगणाः सर्वेऽपि यवनशब्देन व्यवह्रियन्ते स्म । वस्तुतस्तु ते विभिन्नान् वर्गान् प्रतिनिदधुः । ग्रीकप्रदेशात् अलक्सेन्द्रनामकः कश्चिद्विजिगीषुरत्रागतः । स च तदनुयायिनश्च यवना इति व्यवह्रियन्त । होरा इति ज्योतिश्शास्त्रसारभूतस्य ग्रन्थस्य निर्माता कश्चिद् यवनाचार्यः । अरेबियानिवासिनः तत्संबन्धिनो माहम्मदा अपि भारतीयानां पक्षे यवना एव । भागवतेऽप्यस्ति कश्चिद् यवनः । तेनापि द्वारकातः पाश्चात्येन सनातनधर्ममनंगीकुर्वता केनचित् गणनायकेन भवितव्यम् । अस्तु, कालिदासः अत्र पारसीकान् यवनपदेन परामृशति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पारसीकाः परलोकसुखेषु न विश्वसन्ति। लौकिकं सुखमेव तेषां परमं लक्ष्यम्। मधुपानं विनोदः सुखानुभूतिः पुनरपि पानं विनोदः विषयसुखानुभूतिः, अयमेव तेषां जीवितचर्याक्रमः। यवनतरुणीनां कपोलतलानि सन्ततमधुपानशीलतया अरुणान्यदृश्यन्त। तमरुणिमानं रघुः न सेहे। तस्यारुणिम्नः कारणं तु तासां सनाथत्वं खलु। नाथास्तु शत्रुराहित्यात् निश्चिन्ताश्चावर्तन्त। ततो यवनीनां मधुमदसंजातस्य मुखारुणिम्नो मूलहेतुः तद्भर्तॄणां निश्चिन्ततैव। सा च निश्चिन्तता "नास्मकं कोऽपि शत्रुर्वर्तते। अस्मत्साम्राज्यं तु अन्यैर्दुरासदमेव" इति विश्वासादुत्पन्ना। यवनीमुखेषु दृश्यमानात् मधुमदारुणिम्नः तद्भर्तॄणां अनन्यविधेयत्वरूपं दर्पं रघुरनुमाति स्म। तं दर्पं विजिगीषुर्न सेहे इत्यर्थः। अत्र कविरुपमया उक्तं स्पष्टीकरोति। कमलानि सूर्योदये विकसन्ति खलु। बालातपालेपात् तान्यतितरामरुणानि भवन्ति। अकालमेघः कुतोऽप्याकाशे प्रत्यक्षीभवति। मेघः विकसन्ति कमलानि दृष्ट्वा एवं चिन्तयति। "अहो! एषां सौन्दर्यावलेपः। एतेषामीदृशसौभाग्यवर्धकः सूर्यः एव खलु।" एवं विचिन्त्य मेघः सूर्यं तर्जयति। "पश्य पश्य रे सूर्य! त्वमधुना न भविष्यसि।" इत्युक्त्वा स सूर्यमाच्छादयति। ततः स्वभर्तुरपायशङ्कया कमलानि म्लानानि भवन्ति। तथैव यवनतरुणीमुखान्यपि म्लानान्यभवन्।

भारतीयानां बलं तु गजसैन्यभूयिष्ठं भवति। पारसीकानां अश्वभूयिष्ठं च। पारसीकाः अश्वसैन्यैः सह रघुमभ्ययुध्यन्त। तद् युद्धं तु धूलिभिः संकुलमासीत्। पक्षप्रतिपक्षसैन्ययोर्मध्ये चमूनां सान्द्ररेणुप्रसरात् ते परस्परं द्रष्टुं न पारयन्ति स्म। पुनः कथं युद्धमभूत्? उच्यते - पक्षप्रतिपक्षसैन्ययोः प्रोत्साहनार्थं भटा युद्धे शार्ङ्गं कूजयन्ति। तेषां शब्दश्रवणेन प्रतिभटानां सन्निधानमनुमाय तत्तत्स्थानानि लक्षीकृत्य अस्त्राणि मुमुचुः। रजःपटलैरावृतेऽपि रणाङ्गणे, भटेषु परस्परं द्रष्टुमशक्तेष्वपि अस्त्रप्रयोगो विफलो नासीदित्यर्थः।

अथ "भल्लापवर्जितै"रिति पद्यं व्याख्यायते। पारसीकाः प्रायशः श्मश्रुला दृश्यन्ते। न ते मुखं क्षुरन्ति। तथापि श्मश्रूणि द्व्यङ्गुलप्रमाणं वर्धयित्वा अग्रान् निपुणं कृन्तन्ति। तथा च तानि मुखानि वृक्षशाखासु लम्बमानानि माक्षिकपटलानीव दृश्यन्ते। तादृशानि मुखानि रघोर्भटाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भल्लैर्निकृत्य रणांकणे पातयामासुः । क्षौद्रपटलानि भूमौ पतितानि मधुस्रुतिभिरार्द्राणि भवन्ति। तन्निकटे भूमिः क्लिन्ना च भवति। तथा अत्रापि शिरांसि रक्तस्रवणेनार्द्राण्यासन्। निकटस्थलं क्लिन्नं चाभवत्।

भूयिष्ठाः पारसीकाः हताः। अवशिष्टाः कतिचन रघुं शरणमीयुरिति 'अपनीतशिरस्त्राणा' इति पद्येन कथयति। पारसीकाः खलु 'टोपीवालाः' सन्ति। ते प्रायशः शीर्षकं धरन्ति। ये युद्धे न अम्रियन्त ते शिरस्त्राणमपनीय रघुं शरणं गताः। शिरस्त्रणापनयनं तेषां विधेयतासूचकम्। यदा विजितः विजेतुः समक्षं गच्छति तदा सः स्वविधेयताप्रकटनार्थं शिरसः शीर्षण्यमपनयति। एवं ते नग्नशीर्षाः रघुं पादयोः प्रणेमुः। रघोरपि तदेव लक्ष्यमभूत्। शत्रूणां विधेयतापादनमेव तस्य प्रयत्नस्य लक्ष्यम्। तत्तदानीं सिद्धमभूत्। पुनः किमर्थं तेभ्यो द्रुह्यति? ततः किं प्रयोजनम्? इति मत्वा उदारचित्तः स क्षान्तः सन्ताननुजग्राह। रघुर्महात्मा खलु। महात्मनां शत्रुभिः सह तावत्पर्यन्तमेव प्रतीकारबुद्धिर्भवति यावत् ते नतशिरस्का अभयं गच्छन्ति। तेन तस्य तैः सह द्वेषभावः प्रणष्टः। ते रघोरनुग्रहपात्राणि चाभवन्।

अथ "विनयन्ते स्म" इति पद्यम्। रघोः योधाः युद्धात् संजातं क्लेशं अनायासमेवापानयम्। कथम्? ब्रूमः। पारसीकेषु द्राक्षावाटिकाः प्रचुरं विद्यन्ते। विशिष्टानां मृगचर्मणां च सौलभ्यं तत्रास्ति। उत्कृष्टमद्यानां जन्मभूमिस्तु पारसीकप्रदेशा इति प्रसिद्धमेव। जेतारस्ते भटाः अतिशीतलेषु द्राक्षानिकुञ्जेषु उत्तमानि मृगचर्माण्यास्तीर्य तेषु निविष्टाः मधुरं मधु पायं पायं ते युद्धक्लममपानयन्।

रघुः पारसीकान् जित्वा उत्तरां दिशं प्रतिष्ठते।

66 ततः प्रतस्थे कौबेरीं भास्वानिव रघुर्दिशम्।
शरैरुस्रैरिवोदीच्यान् उद्धरिष्यन् रसानिव।

पारसीकविजयानन्तरं ततोऽप्युत्तरां दिशं जेतुं रघुरुदयुङ्क्त। पारसीकप्रदेशेभ्य उत्तरप्रदेशाः हिमवतः पश्चिमोपत्यका इत्यवधार्यम्। सूर्यः उत्तरायणं गतः स्वैः किरणैः जलमुद्धरति। किरणैर्बाष्पीभूतं जलं मेघः संपद्यते इति शास्त्रीयं सत्यम्। सूर्यः उत्तरायणं प्रविष्टः सन् भूमेः सलिलं किरणैः उद्धरति। तथैव रघुः औत्तराहान् प्रविश्य तत्रत्यान् रिपून् शरैरुन्मूलयामासेति सारः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कौबेरी = उदीची. भास्वान् = सूर्यः, उस्रः = किरणः, उदीच्यान् = औत्तराहान्, रसः = जलं ।

अन्वयः— ततः भास्वानिव रघुः उस्रैः इव शरैः रसान् इव उदीच्यान् उद्धरिष्यन् इव कौबेरीं दिशं प्रतस्थे ।

कुबेरः वैश्रवणः. कुबेर + अ = कौबेर. स्त्री — कौबेरी. कुबेरः उत्तरस्या दिशः पतिरिति प्रसिद्धम् । चतसृणां दिशां तथा चतसृणां विदिशां (कोणानां) च एकैके दिक्पालाः सन्तीति पौराणिकः संकल्पः । अस्य चायं क्रमः ।

दिशः		दिक्पालाः	दिशः		दिक्पालाः
पूर्वा	—	इन्द्रः	पश्चिमा	—	वरुणः
दक्षिणपूर्वा	—	वह्निः	पश्चिमोत्तरा	—	वायुः
दक्षिणा	—	यमः	उत्तरा	—	कुबेरः
दक्षिणपश्चिमा	—	निर्ऋतिः	पूर्वोत्तरा	—	ईशः

उदीची + य (तद्धितान्तः) उद् + धृ + इष्य + अत् (शत्रन्तः)

67 विनीताध्वश्रमास्तस्य सिन्धुतीरविवेष्टनैः ।
दुधुवुर्वाजिनः स्कंधान् लग्नकुंकुमकेसरान् ॥

रघुः पारसीकेभ्यः सिन्धुनदीमुत्तीर्य पूर्वोत्तरदिगभिमुखं काश्मीरान् प्रति यात्रामारभते । सिन्धुनदीतीरे स सेनां निवेशयामास । सैन्येषु तथा तीरे निविष्टेषु तस्य सैनिकाश्वाः मार्गश्रममपनिन्युः । ते सिकतामयेषु सिन्धुतटेषु शयित्वा यथेष्टमङ्गपरिवर्तनं चक्रुः । तदा तेषां निबिडसटेषु स्कन्धेषु कुङ्कुमकेसरा लग्ना अभवन् । तदा तेषां केसराणां कुतकूतनं (Tickling) असहमानाः ते अश्वाः लग्नकुङ्कुमकेसरान् सटाजटिलान् निपुणमकम्पयन् ।

अध्वा (अध्वन्) = मार्गः विवेष्टनैः = दुधुवुः = अकम्पयन्त वाजिनः = अश्वाः स्कन्धान् = अंसप्रदेशान् अथवा कायान् । लग्नः = सक्तः केसरः = किञ्जल्कः धू + उः (लिट्) दुधाव दुधुवतुः दुधुवुः ।

अन्वयः- तस्य वाजिनः सिन्धुतीरविवेष्टनैः विनीताध्वश्रमाः लग्नकुंकुमकेसरान् स्कन्धान् दुधुवुः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अध्वनः श्रमः = अध्वश्रमः. विनीतः (परिहृतः) अध्वश्रमः यैः ते = अध्वश्रमं विनीतवन्तः । लग्नाः कुङ्कुमकेसराः येषु ते । कुङ्कुमवृक्षाः काश्मीरेषु तत्परिसरप्रदेशेषु च सुलभाः सन्ति ।

हूणैः सह रघुरयुध्यत । ते हताश्चासन् ।

68 तत्र हूणावरोधानां भर्तृषु व्यक्तविक्रमम् ।
कपोलपाटलादेशि बभूव रघुचेष्टितम् ।

रघुः द्वित्राणि दिनानि सिन्धुतीरे निविष्टवान् । ततो यात्राक्रममपनीय स उदीचीं प्रातिष्ठत । तत्रास्ति हूणानां जनपदः । तत्रत्यैः राजभिः सह रघुरयुध्यत । घोरे समरे ते नृपा अम्रियन्त । तेषां अन्तःपुरस्त्रियः तस्मादनाथा अभवन् । विलप्य विलप्य तासां कपोला अरुणा अजायन्त । रघोः विक्रमस्य फलं प्रख्यापयितुं तासां गण्डपाटलिमैवावशिष्टः । अन्यत् सर्वमपि विनष्टमासीदित्यर्थः ।

अन्वयः—तत्र भर्तृषु व्यक्तविक्रमं रघुचेष्टितं हूणावरोधानां कपोलपाटलादेशि बभूव ।

व्यक्तः विक्रमः यस्मिन् तत् रघोः चेष्टितं । हूणानां अवरोधाः । = अन्तःपुरस्त्रियः, कपोलस्य पाटलं आदिशति इति कपोलपाटलादेशि. कपोलः गण्डः, पाटलं, पाटलिमा = अरुणवर्णम् . आ + दिश् + इन् . आदेशि = उत्पादकम् . चेष्ट् + इ + त. क्तप्रत्ययोऽत्र भावार्थे प्रयुक्तः, ततोऽस्य चेष्टा चेष्टनं इत्यादि क्रियानामार्थः ।

ततः काम्बोजनृपा अपि विधेया अभवन् ।

69 काम्बोजाः समरे सोढुं तस्य वीर्यमनीश्वराः ।
गजालानपरिक्लिष्टैरक्षोटैः सार्धमानताः ॥

हूणविजयानन्तरं स कांबोजं नाम जनपदं जेतुं जगाम । तत्रत्यैः राजभिः सह सोऽयुध्यत । रघोरप्रतिहतं तेजः ते समरे सोढुं न प्रभवन्ति स्म । ते शस्त्रैः क्षतगात्राः सन्तः तस्य विजयिनो रघोः पादे निपेतुः । तेषां राज्ञां दौर्बल्यं रघोर्वीर्यं च कविः तत्संबन्धिनोदाहरणेन स्पष्टयति । तत्र अक्षोटनामकाः वृक्षविशेषाः सन्ति । ते अत्युन्नताः पृथुलकाण्डाश्च । तेषु सैनिका गजा निबद्धा आसन् । तेषां गजानां शक्तिमसहमानाः ते वृक्षाः गजकटवर्षणैः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शृंखलासंघट्टनैश्च क्षतप्रकाण्डाः भूमौ अपतन्। तेषां वृक्षाणां पतनसदृशमेव तत्रत्यानां नृपाणां रघोः पादे पतनमिति कविरपहसति।

अनीश्वराः = अशक्ताः, आलानं = गजबन्धनपाशः वृक्षकाण्डो वा। सार्धं = सह, साकं, समम्।

अन्वयः—समरे तस्य वीर्यं सोढुं अनीश्वराः काम्बोजाः गजालानपरिक्लिष्टैः अक्षोटैः सार्धं आनताः।

सह + तुं सोढुं. सोढ, सोढव्य, सोढा, सहनं, सह्य। क्लिश् + त = क्लिष्ट. गजानां आलानेन परिक्लिष्टैः।

ते रघवे उत्तमाश्वभूयिष्ठानुपहारान् अर्पयामासुः।

70 तेषां सदश्वभूयिष्ठास्तुङ्गा द्रविणराशयः।
उपदा विविशुः शश्वत्; नोत्सेकाः कोसलेश्वरम्॥

कांबोजेषु उत्कृष्टवंशप्रभवाः अश्वा लभ्यन्ते किल। तैरश्वैः सुवर्णरत्नादिसम्पद्भिश्च ते समृद्धाः। ते राजानः उत्तमाश्वभूयिष्ठान् धनराशीन् तस्मै विजेत्रे उपहारतया समर्पयामासुः। रघवे समर्पितेषूपायनेषु भूयिष्ठोऽशः अश्वसंचय आसीदित्यर्थः। एवं बहून्युपायनानि रघुमाविशन्। तथापि तं गर्वो नाविशत्। स गर्विष्ठो नाभूदिति भावः। अत्युन्नतानां नृपाणां विजये यादृशो गर्वः कस्यचित् सम्राजः समुत्पद्यते तादृशो गर्वो रघोर्नासीदिति संक्षिप्तोऽर्थः।

द्रविणराशयः = सम्पत्संचयाः। उपदाः = उपायनानि, उपहाराः। शश्वत् = पुनः पुनः। उत्सेकाः = गर्वाः।

अन्वयः—तेषां सदश्वभूयिष्ठाः तुंगाः द्रविणराशयः उपदाः कोसलेश्वरं शश्वत् विविशुः। उत्सेकाः न विविशुः।

सन्तश्च ते अश्वाश्च सदश्वाः सदश्वाः। भूयिष्ठ येषु ते। द्रविणानां राशयः। कोसलानां ईश्वरः। कोसलानां केन्द्रमासीदयोध्येति प्रसिद्धम्।

ततः स हिमालयमारुरोह।

71 ततो गौरीगुरुं शैलमारुरोहाश्वसाधनः।
वर्धयन्निव तत्कूटानुद्धतैर्धातुरेणुभिः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स जयी रघुः काम्बोजान् जिगाय । ततः स हिमवतोऽन्तर्गतान् जनपदान् जेतुमुत्सेहे । हिमवतः शिखराः गजैः सुखं न समारोढव्याः । ततो गजसैन्यं काम्बोजेष्वेव विहाय अश्वसेनामेव स सार्धं नीतवान् । तस्य पर्वतस्य सानुप्रदेशेषु मनःशिलागैरिकादयो धातवो विद्यन्ते । अश्वानां खुराघातैः तेषां धातूनां रेणुपुञ्जा ऊर्ध्वमुत्पतन्ति स्म । तदा संदर्शकानामेवं संदेहः समजायत । किंस्विदस्य गिरेः शिखराणि स्वयं पृथुलीभवन्ति ? ऊर्ध्वमुद्भूयमानैर्धूलिपटलैः अद्रेः शृङ्गाणि पूर्वाधिकमुन्नतानि इवादृश्यन्तेत्यर्थः ।

गौरीगुरुः = पार्वत्याः पिता (हिमालयः) । तत्कूटान् = तस्य शिखरान् ।

अन्वयः—ततः सः अश्वसाधनः सन् गौरीगुरुं शैलं उद्धूतैः धातु-रेणुभिः तत्कूटान् इव आरुरोह ।

[तेन निद्राणेन भवितव्यम् = स निद्राणो भवेत् । निद्राणः = स्वपन-सन्तर्पकान् = सन्तृप्तिकरान्. तेन केनचित् गणनायकेन भवितव्यम् = स कश्चित् गणनायको भवेत् । अत्र भावे प्रयोगः। राहित्यं = अभावः, दुरासदं = दुष्प्रापं, अनन्यविधेयत्वं = स्वस्वामित्वं दर्पः = गर्वः, अयुक्तः कालः = अकालः, निकृत्य = छित्वा. स्रुतिः = प्रवाहः. क्लिन्नं = आर्द्रं. ईयुः = प्रापुः. इयाय ईयतुः ईयुः, लिट्. पर. ब्रूमः = कथयामः. पायं पायं = पीत्वा पीत्वा. क्रियायाः पौनःपुन्यं अर्थात् आवृत्तिं सूचयितुं क्त्वाप्रत्ययस्य स्थाने अम् इति प्रत्ययोऽपि प्रयुज्यते । तदा धातोः स्वरविकाराश्च भवन्ति. नी-नायं नायं = नीत्वा नीत्वा, लिख-लेखं लेखं सिकता = sand. क्षतगात्राः = छिन्नशरीराः. भूयिष्ठं = अधिकं, किंस्वित्, किमु = किम्-प्रश्नार्थका एते शब्दाः. अस्, धतोः शतृप्रत्ययान्तं रूपमेव 'सत्' । तस्य प्रयोगेषु सुक्ष्ममर्थभेदं अधोदत्तैः उदाहरणैः परिचेतव्याः., स्नातो रामो भुक्तवान्—रामः स्नातः सन् भुक्तवान् । नृत्यन्ती सीता श्रान्ता अभवत्—सीता नृत्यन्ती सती श्रान्ताभवत । सावधानाः भवन्तः शृण्वन्तु-भवन्तः सावधानाः सन्तः शृण्वन्तु । अत्रेदं स्पष्टम्— यत्र 'सत्' विशेषणमनुप्रयुज्यते तत्र 'क्त्वा' प्रत्ययार्थः समापतति । यथा—स्नातः सन् = स्नात्वा । नृत्यन्ती सती = नर्तित्वा । सावधानाः सन्तः = अवधाय [सावधानाः भूत्वा] ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ अभ्यासः ॥

I प्रयोगान् विपरिणमयत— यथा (भावे) — रावणः बभूव = रावणेन बभूवे। (कर्मणि) पारसीकाः मधुपानं कुर्वन्ति = पारसीकैः मधुपानं क्रियते।

1) रघुः कौबेरीं दिशं प्रतस्थे। 2) दुधुवुर्वाजिनः स्कन्धान्।
3) रघुचेष्टितं बभूव। 4) अश्वसाधनः स गौरीगुरुं शैलं आरुरोह।
5) उत्सेकाः कोसलेश्वरं न विविशुः। 6) रघुः कांबोजान् अजयत्।

II ६६, ६७, ६९ इत्येतेषां पद्यानां पदानि विश्लेष्य लिखत।

III अन्त-विभक्तिलिंगादिकं लिखत। यथा— मधूनि— उका— न— प्र. द्वि-बहु.

1) रेणुभिः 2) तेषां 3) भर्तृषु 4) वाजिनः
5) उद्धरिष्यन् 6) अध्वनः।

IV पाठारम्भे दत्तं पद्यसंक्षेपं अनुवदत।

V अद्य पठितानां पद्यानां सारं संस्कृते संक्षिप्य लिखत।

IV शुद्धीकृत्य लिखत। (यथा-अयोध्ये दशरथो इति किश्चनः राजाः आसीत् = अयोध्यायां दशरथ इति कश्चन राजा आसीत्।)

यदा दुष्यन्ते तपोवनं प्रविष्टे तदा तत्र त्रीन् कन्यकः अदृश्यत्। ते कन्यकाः तत् तपोवने विद्यमानानि तरून् सिञ्चन् अवर्तत। शकुन्तला अनसूया प्रियंवदा इति तेषां नाम आसन्। दुष्यन्तस्य राजस्य तास्वन्यतमे शकुन्तलायां प्रेम अजनत्। अनसूयया उक्तवती शकुन्तलायाः कथा राजा आकर्णयत्। स तां गान्धर्वेण विधिना परिणयत। शकुन्तला गर्भं धरत्। पिता कण्वः एतां वार्तां अज्ञायत। स गर्भिं शकुन्तलां अनुमोदत। कण्वः स्वसुतां अनुग्रहीत्वा भर्तोः दुष्यन्त राजस्य राजधानी अप्रेषयत्। शाङ्गरवः शारद्वतः गौतमी च तां अनुगच्छत। यदा तेषु राजधानीं प्राप्तेषु तदा राजः तान् न अभिजानात्। राजा तस्याः अर्थनां तिरस्कृतः। मुनिकुमारौ च तां तत्रैव त्यक्तौ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अष्टाविंशो दिवसः

द्राक्षावलयभूमिषु विजयोत्सवं निर्वर्त्य पारसीकेभ्यो रघुरुत्तराभिमुखं प्रयियासतीति 'ततः प्रतस्थे' इति पद्येनाह। यथा सूर्यः दक्षिणायनात् उत्तरायणं प्रविशति तथैव रघोरुत्तरायणप्रवेशनमभूदिति कथ्यते। उत्तरायणकाले ग्रीष्मोऽन्तर्भवति खलु। तदा सूर्यस्य तीक्ष्णता वर्धते च। तीक्ष्णकिरणः सूर्यः स्वैः करैः तदा भूमेः जलांशानाकर्षति। सूर्योष्मणा बाष्पीभूतं जलमेव मेघः सम्पद्यते इति प्रसिद्धं च। तद्वत् रघुः शरैः औत्तराहाणां नृपाणां उन्मूलनार्थं तां दिशं प्रातिष्ठत।

अथ 'विनीताध्वश्रमाः' इति पद्येन स काश्मीरान् प्रापेति सूचयति। काश्मीरेषु सिन्धुनदी प्रवहतीति प्रसिद्धम्। तस्यास्तीरेषु रघोः सेना निविविशे। अश्वास्तु विश्रमोल्लासेन तस्या नद्याः पुलिनेषु लुलुठुः अर्थात् परिवर्तनं चक्रुः। तस्मात् तेषां मार्गक्लमो विनष्टोऽभवत्। सिन्धुनद्यास्तीरेषु कुंकुमवृक्षाः बहुलं प्ररोहन्ति। तेषां पुष्पकेसराः तस्मिन् पुलिने विकीर्णा भवन्ति। ते किञ्जल्काः वाजिनां सटानामन्तर्विशन्ति। तदा ते कुतकूतनास्वास्थ्यमनुभवन्ति। तत्परिहाराय ते स्कंधान् अकम्पयन्त। अत्र विकीर्णकेसराणां चालेख्यं तथा कुतकूतनावसरेषु वाजिनां स्कन्धकम्पनस्वभावं च कविरस्माकं पुरस्तादाविष्करोति।

सिन्धुनदीपरिसरेषु सन्ति हूणा नाम जनपदाः। तत्रत्यानां अन्तःपुरतरुणीनां दुर्दशैव "तत्र हूणावरोधाना"मिति पद्येन वर्णयति। रघुः हूणान् जनपदान् आचक्राम। तेन तत्रत्या नृपा अनायासमेव हताः। क्षणेन स जनपदः प्रशान्तो निभृतश्चासीत्। अथ च रघुः हूणान् आक्रामत; भीषणं युद्धं च संवृत्तं इत्यस्य किं नाम चिह्नम्। अस्ति तस्य व्यक्तं चिह्नम्। हूणानां अन्तःपुरतरुण्यः भर्तृनाशेन अनाथा अभवन्। ता इतस्ततः पलायिताः। उच्चैस्तरां विलेपुश्च। स्वकपोलेषु दुःखार्ताः ताः स्वयं कठिनमताडयन्। ऊष्मलं बाष्पं व्यसृजन्। एवं ताडनपीडनक्रन्दनादिभिः तासां कपोलाः अरुणा अभवन्। एवं अरुणाभाः कपोला एव "रघोर्विजयी विक्रमः तत्र संजात" इत्यस्य चिह्नमासीत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदनन्तरं काम्बोजान् जेतुं जगामेति ' कांबोजाः समरे सोढु 'मिति पद्येन कथयति । कम्बोजाः तमभियोद्धुमशक्ता अभवन् । प्रथमं ते तमभ्ययुध्यन्त । यदा ते रघोः शस्त्राणां रसमीषदीषदास्वदितुमारभन्त तदा ते नतशीर्षाः रघुं शरणं प्रापुः । तत्र काम्बोजेषु अक्षोटा नामात्युन्नता वृक्षाः सन्ति । तेषु सेनागजा बद्धा आसन् । गजानां कटघर्षणैः दन्ताघातैः श्रृंखलाकर्षणैश्च तेषां प्रकाण्डाः क्षता आसन् । अन्ते गजानां आघातोत्कर्षणादिकमसहमानाः ते अक्षोटाः भूमौ निपेतुः । अक्षोटवृक्षा इव काम्बोजाश्च शरैः क्षतगात्राः रघोः पादयोः प्रणेमुः । काम्बोजेषु द्वावेवोन्नतौ आस्ताम् । एको मनुजेषून्नतो राजवर्गः । अन्यस्तु वृक्षजातिषु उन्नतः अक्षोटवर्गः । प्रथमस्तु रघोः पादे निपपात । द्वितीयस्तु रघुसेनागजानां पादेषु च, इत्याशयः ।

काम्बोजा रघवे उपायनान्युपजह्रुरिति "तेषां सदश्वभूयिष्ठा" इति पद्येन वर्ण्यते । काम्बोजाः स्वं प्रभूतं सुवर्णादि सम्पत्संचयं तस्मै ददुः । तस्मादप्यमूल्याः असंख्येया अश्वाश्च तस्मै उपहृताः । विजिताः काम्बोजाः रघोरभीष्टं साधयन्तः परिचारका इवावर्तन्त । बहुमूल्या उपहाराश्च लब्धाः । रघुः सर्वत्र विजयी चावर्तत । एवं सज्जेष्वपि सर्वेष सौभाग्येषु स गर्वी नाभवत् । एतेनास्य स्वभाववैशिष्टयं व्यज्यते ।

अथ "ततो गौरीगुरु" मित्यनेन पद्येन हिमालयारोहणमाचष्टे । कांबोजविजयानन्तरं हिमालयान्तर्गतान् जनपदान् विजेतुं रघुरुद्युङ्क्ते स्म । हिमवतः श्रृंगाण्यारोढुं प्रायेण गजाः अशक्ता भवन्ति । तस्मात् स भूयिष्ठं गजसैन्यं तत्रैव विससर्ज । अल्पं गजसैन्यं भूयिष्ठं अश्वसैन्यं चादाय हिमालयमारुरोह । तस्य श्रृङ्गाणि मनःशिलागैरिकादिभिर्धातुभिः संकलितानि वर्तन्ते । तादृशानां श्रृङ्गाणां उपरि ते अश्वाः सञ्चरन्ति । तदा तेषां खुराघातेन ते धातवः चूर्णीभूता ऊर्ध्वमुत्पतन्ति । एवमुत्पततां गैरिकाणां रेणुसंघातं दृष्ट्वा कश्चित् सन्दर्शक आशङ्कते । "किमेतानि हिमवतः श्रृङ्गाणि जन्तव इव अभिवृद्धिं प्राप्नुवन्ति ? उप अग्निज्वालेव क्रमशः ऊर्ध्वं प्रसरन्ति ? " इति ।

अथ हिमालयवनवासिनां सिंहानां निर्भयप्रकृतेः परिचयं ददाति ।

72 शशंस तुल्यसत्त्वानां सैन्यघोषेऽप्यसंभ्रमम् ।
गुहाशयानां सिंहानां परिवृत्यावलोकितम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिंहाः खलु निर्भया मृगाः। अतिभीषणानामप्यन्यशब्दानां श्रवणेन ते न बिभ्यति। ततस्तेषां मनसोऽपि नास्ति चाञ्चल्यम्। असाधारणशब्दानां श्रवणेऽपि ते शयाना एव कण्ठं परिवृत्य निर्भयं विलोकयन्ति। "के नामास्माकं साम्राज्ये अस्मदाज्ञां विना पदं न्यस्यन्ति ?" इति बुद्ध्या ते वीक्षन्ते। "अहो, इमे क्षुद्राः प्राणिनः। ते यथागतं गच्छन्तु। अस्मद्गर्जनं सोढुमपि ते अशक्ता एव"। इति मत्वा ते यथापूर्वं शेरते। अयं किल मृगराजानां स्वभावः।

अत्र तु रघोः सेना सारवं साटोपं च हिमालयवनेन गच्छति। तदा मध्येमार्गं इतस्ततो गुहासु सिंहाः शयाना आसन्। ते रघोः सैन्येन तुल्यबलाः सन्ति। अतस्तेषां न कोपि संभ्रमः समजायत। ते शब्दश्रवणमार्गेण ग्रीवां परिवृत्यावलोकयामासुः। तद् अचञ्चलमवलोकनमेव तेषां संभ्रमराहित्यं प्रख्यापयामास।

अन्वयः—गुहाशयानां तुल्यसत्त्वानां सिंहानां परिवृत्य अवलोकितं सैन्यघोषे अपि असंभ्रमं शशंस।

गुहासु शेरते इति गुहाशयाः शी-शयनार्थो धातुः। शेते, शयाते, शेरते। तुल्यं सत्त्वं येषां ते। सत्त्वं = बलम्। शशंस = उवाच, स्पष्टीचकार। अवलोकितं = अवलोकनं.

सुखशीतलो वायुः मार्गे तं परिचचार।

73 भूर्जेषु मर्मरीभूताः कीचकध्वनिहेतवः।
गंगाशीकरिणो मार्गे मरुतस्तं सिषेविरे॥

रघुः ससैन्यो हिमालयमारोहति। तदा आरोहणक्लेशेन शरीरं स्विन्नं जायते। तस्मिन्नवसरे तस्य शीतलोपचार आवश्यकः। तत्रत्यो मारुतः तदा तस्य स्वेदापनयनरूपं परिचरणमाचचार।

हिमालयकाननेषु सुलभतया दृश्यमानाः वृक्षविशेषाः खलु भूर्जाः। तेषां पत्रेभ्यः मन्दमारुताः मर्मरशब्दमुत्पादयामासुः। तत्र कीचकानां अथवा वेणूनां पटलाश्च प्रभूतं प्ररोहन्ति। भ्रमरादिभिरुत्कीर्णैः तेषां सुषिरैः प्रविश्य मारुताः मुरलीनादमुत्पादयन्ति च। अपि च ते गंगाजलसंपर्केण शीतस्पर्शाश्च। तादृशाः वाताः तं मार्गे असेवन्त।

मर्मरः = पर्णध्वनिः, शीकरः = जलकणः. कीचकाः = वंशाः bamboos. मरुतः = (त. पु. प्र. ब.) वाताः. सिषेविरे = असेवन्त-सिषेवे—सिषेवाते—सिषेविरे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्वयः—भूर्जेषु मर्मरीभूताः कीचकध्वनिहेतवः गंगाशीकरिणः मरुतः तं मार्गे सिषेविरे ।

कीचकानां ध्वनिः । कीचकध्वनेः हेतवः । गंगायाः शीकराः गंगाशीकराः एषां सन्ति इति । शीकर+इन्=शीकरिन् ।

कस्तूरीमृगैः वासितेषु शिलातलेषु निविष्टाः सैनिकाः विश्रममलभन्त ।

74 विशश्रमुर्नमेरूणां छायास्वध्यास्य सैनिकाः ।
दृषदो वासितोत्सङ्गा निषण्णमृगनाभिभिः ॥

भूर्जा इव नमेरुनामकाः वृक्षविशेषाश्च हिमालये विद्यन्ते । ते सुरपुन्नागा इति च व्यवह्रियन्ते । तेषां विस्तृतासु छायासु शिलातलानि च विद्यन्ते । तेषु शिलातलेषु कस्तूरीमृगाः संधीभूय शेरते । शयानानां तेषां नाभिभ्यः कस्तूरीति प्रथितं सुरभिलं वस्तु बहिः निस्सरति । शयनानां तेषां नाभिसंपर्केण शिलाः सुरभिलाः संपद्यन्ते । तादृशीषु शिलासूपविष्टाः रघोः सैनिकाः तेषां नमेरूणां छायासु विश्रमसुखमन्वभवन् ।

वि+श्रम् (लिट्. पर. प्र. ब) (अधि+आस्+य) । दृषदः= शिलाः (द. स्त्री. द्वि. ब.) उत्संगः = परिसरः । नि + सद् + त= निषण्ण

अन्वयः—नमेरूणां छायासु निषण्णमृगनाभिभिः वासितोत्संगाः दृषदः अध्यास्य सैनिकाः विशश्रमुः ।

निषण्णाश्च ते मृगाश्च । मृगाणां नाभयः । वासिताः उत्संगाः यासां (दृषदां) ताः । दृषदः अध्यास्य=दृषत्सु आसित्वा. सीता शय्यां अधिशेते= सीता शय्यायां शेते ।

रात्रौ स्वयं ज्वलन्तीनां ओषधीनां परिचयं ददाति ।

75 सरलासक्तमातंगग्रैवेयस्फुरितत्विषः ।
आसन्नोषधयो नेतुर्नक्तमस्नेहदीपिकाः ॥

हिमवत्पर्वते ये ये विशिष्टा असाधारणाश्च पदार्थाः सन्ति तांस्तान् कविर्वर्णनावसरे न परित्यजति । तत्र पर्वतान्तरालेषु खद्योता इव रात्रौ स्वयंप्रकाशाः काश्चन ओषधयः अर्थात् लताविशेषाः सन्ति । रघोः सेनागजाः तत्र स्थितेषु सरलद्रुमकाण्डेषु बद्धा आसन् । तेषां गजानां ग्रीवानिबद्धासु शृंखलासु तासां ओषधीनां प्रभापूराः प्रतिफलन्ति स्म । प्रतिबिंबिता सा प्रभा परिसरेषु व्याप्ता चासीत् । तत्र सर्वत्र प्रसृता सा प्रभा रघोः रात्रौ तैलेन विना दीप्यमाना दीपिका आसीत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सरला: = देवदारुजातावन्तर्गता: तन्नामका वृक्षा:. आसक्त = बद्ध-मातङ्गः = गजः. ग्रैवेयं = कण्ठशृंखला. स्फुरित = प्रतिबिंबित. त्विट् = शोभा. नक्तं = रात्रौ. स्नेह: = तैलं. खद्योत: = Fire fly. रात्रौ स्वयं प्रकाशमान: कीटविशेष:. नेतुः = नायकस्य. आसन् + ओषधय: ।

अन्वय:—सरलासक्तमातङ्गग्रैवेयस्फुरितत्विषः ओषधयः नेतुः नक्तं अस्नेहदीपिकाः आसन् ।

सरलेषु आसक्तानां मातङ्गानां ग्रैवेयेषु स्फुरिताः त्विषः यासां ताः । न विद्यते स्नेह: यस्या: सा अस्नेहा । अस्नेहा: च ता दीपिका: ।

आ + सज् + त । आसन् + ओषधय: = आसन्नोषधय: इत्यत्र नकारस्य द्वित्वं विशेष: । ह्रस्वात् परस्य नकारस्य स्वरे परे द्वित्वं भवति । तस्मिन् + इति = तस्मिन्निति । वदन् + अयं = वदन्नयं. दिनरात्रपर्यायौ दिवा, नक्तं इति द्वे अव्यये स्त: ।

सैन्यगजानां औन्नत्यं किरातैरनुमीयते ।

76 तस्योत्सृष्टनिवासेषु कण्ठरज्जुक्षतत्वचः ।
गजवर्ष्म किरातेभ्यः शशंसुर्देवदारवः ॥

रघुः सेनां मार्गे तत्र तत्र सन्निवेश्य पुरोगच्छति । सन्निवेशस्थलस्य परिसरे देवदारवः समुन्नता अलक्ष्यन्त । तेषां प्रकाण्डेषु तस्य सेनागजा बद्धा आसन् । तत्र सेनानिवेशे रात्रिमुषित्वा प्रातः स ससैन्यः ततः प्रातिष्ठत । प्रस्थितेषु तेषु, शून्यं प्रदेशं किराताः पर्यटन्तः प्रापुः । सेनाभिरुषितां बिलक्षणां तां स्थलीं दृष्ट्वा ते इतस्ततः प्रैक्षन्त । निकटे तिष्ठतां देवदारूणां प्रकाण्डाग्रेषु तेषां दृष्टयः पेतुः । प्रकाण्डाग्रभागेषु त्वचो निष्पिष्टा दृष्टाः । त्वचां तन्निष्पेषणं तु सेनागजकण्ठरज्जूनां घर्षणं स्यात् तर्हि कीदृशं स्यात् तेषां प्रजानामौन्नत्यमिति ते साश्चर्यं ददृशुः ।

उत्सृष्ट = त्यक्त. गजवर्ष्म = गजानां गात्रप्रमाणम् . शशंसुः = कथयामासुः, ज्ञापयामासुः ।

अन्वय:—तस्य उत्सृष्टनिवासेषु कण्ठरज्जुक्षतत्वचः देवदारवः किरातेभ्यः गजवर्ष्म शशंसुः ।

उद् + सृज + त. उत्सृष्टाश्च ते निवासाश्च. कण्ठानां रज्जुभिः क्षता त्वचः येषां ते । गजानां वर्ष्म । शंस् (लिट् प., प्र. ब.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रघुः पर्वतीयैर्गणैस्सहायुध्यत ।

77 तत्र जन्यं रघोर्घोरं पर्वतीयैर्गणैरभूत् ।
नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलम् ।।

हिमालयान्तर्गतानां सप्तजनपदानामधीशाः पराक्रमशीला अवर्तन्त । ते सप्त पर्वतीया गणा उत्सवसंकेता इति नाम्ना व्यवह्रियन्ते स्म । ते प्रथमं न विधेया बभूवुः न च पलायनं चक्रुः । ते योद्धुकामाः रघुमभ्यगच्छन् । तेषां शस्त्राणि न साधारणानि । नाराचा नाम अग्रे सूच्याकाराः बाणविशेषाः । रिपुं लक्षीकृत्य प्रक्षिप्यमाणाः दण्डविशेषा एव क्षेपणीयाः । अश्मानः = शिलाखण्डाः- तानि क्षिप्त्वापि ते युध्यन्ते । युद्धे तुमुले प्रवृत्ते, द्वयोरपि सैन्ययोरन्तराले तैः मुक्ताः शस्त्रविशेषाः परस्परं संघट्टनं प्राप्ताः । तदा संजातसंघर्षेभ्यस्तेभ्योऽग्निः उत्पन्नः । इत्थं रणाङ्गणे अग्निमुत्पादयद्भिरायुधैः पक्षप्रतिपक्षभटाः परस्परं अयुध्यन्त ।

जन्यं = युद्धं. निष्पेषः = संघट्टनम्, घर्षणं.

अन्वयः—तत्र रघोः पर्वतीयैः गणैः नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलं घोरं जन्यमभूत् ।

नाराचानां क्षेपणीयानां अश्मनां च निष्पेषेण उत्पतितः अनलः यस्मिन् तत् (जन्यं) ।

पर्वतीया गणाश्च पराजिता अभूवन् ।

78 शरैरुत्सवसंकेतान् स कृत्वा विरतोत्सवान् ।
जयोदाहरणं बाह्वोर्गापयामास किन्नरैः ।।

उत्सवसंकेतान् तान् पर्वतीयगणान् स रघुः शरवर्षैः जिगाय । तथा तान् आनन्दरहितान् चकार । ततः स जेता स्वभुजविजयवार्तानिबद्धं गीतं किन्नरैः गापयामास । किन्नराणां गाने प्रावीण्यमस्तीति प्रसिद्धम् । किन्नराः पर्वतीयगणेष्वन्यतमाः ।

जयोदाहरणं = जयवार्तानिबद्धं गीतम्. बाह्वोः = भुजयोः. गापयामास = गानं कारयामास ।

वि + रम् + त. विरताः उत्सवाः येषां ते. (विरामः, रति रमण अभिराम रमणीय) अत्र गापयामास किन्नरान् इति पाठभेदोस्ति; सोऽपि साधुः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

केवलम्	प्रयोजकम्
किन्नराः जयोदाहरणं गायन्ति ।	रघुः किन्नरैः जयोदाहरणं गापयति । अथवा, रघुः किन्नरान् जयोदाहरणं गापयति ।
किन्नराः जयोदाहरणं जगुः ।	रघुः किन्नरैः जयोदाहरणं गापयामास । रघुः किन्नरान् जयोदाहरणं गापयामास ।

[आलेख्यं = चित्रं निभृतः = निःशब्दः. = रसं ईषद् ईषद् आस्वदितुं. ईषद् = किञ्चित्, उपायनं = उपहारः. धातुः = mineral, संघातः = समूहः बिभ्यति = भीता भवन्ति (भी-बिभेति-बिभीतः-बिभ्यति). स्विन्नं = स्वेदार्द्रं. अपनयनं = दूरीकरणं उत्कीर्णैः = विद्धैः. प्रथितं = प्रसिद्धं. उपविष्टाः = आसीनाः. अलक्ष्यन्त = अदृश्यन्त. उषित्वा = वासं कृत्वा. वस् + इत्वा = उषित्वा. प्रस्थितेषु तेषु = यदा ते प्रस्थिताः तदा. वस् + त = उषित, इत्थं = एवं. परिवृत्य = turning back.]

॥ अभ्यासः ॥

I निर्दिष्टरीत्या वाक्यानि विपरिणमयत—

क) यथा—बालाः **गजानां दर्शनाय** अधावन् । बालाः **गजान् द्रष्टुं** अधावन् । सर्वे **आत्मानं पोषयितुं** यतन्ते । सर्वे **आत्मनः पोषणाय** यतन्ते ।

1) वयं पर्वतानां आरोहणे समर्थाः । 2) पुस्तकानि पठितुं छात्राः इच्छन्ति । 3) रमा जलस्य पानाय अगच्छत् । 4) जनाः अन्नं भक्षयितुं गताः । 5) सत्कर्माणि कर्तुं सज्जना इच्छन्ति । 6) वयं पुष्पाणां आहरणाय यास्यामः ।

ख) यथा—तस्य **बुद्धिरस्ति, तस्मात्** सः विजयमलभत । तस्य **बुद्धिमत्त्वात्** स विजयमलभत । आकाशे **नक्षत्राणि सन्ति तस्मात्** तत् सुन्दरं दृश्यते । आकाशस्य **नक्षत्रवत्त्वात्** सुन्दरं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दृश्यते। तटाके **जलमस्ति**, जनाः सुखं स्नान्ति। तटाकस्य **जलवत्त्वेन** जनाः सुखं स्नान्ति।

1) गृहे अन्धकारोऽभवत्; तस्मात् बालाः आक्रन्दन्।

2) मनसि भयमस्ति; तस्मात् नाहं तत्र गमिष्यामि।

3) सूर्यस्य दीप्तिरस्ति; तस्मादाकाशं शोभते।

4) सरसि कमलानि सन्ति तेन तत् कमलिनीति कथ्यते।

5) गजस्य करः अस्ति; तेन स करी भवति।

ग) यथा — बालेन **जलं** पीयते — बालेन **पीयमानं** जलम्।

1) मरुता वृक्षाः चाल्यन्ते। 2) रघुणा शैलः आरुह्यते।
3) सूर्येण लोकाः प्रकाश्यन्ते। 4) जनैः नद्यः विलोक्यन्ते।
5) वरेण वधूः दृश्यते।

II वाक्यानि रचयत—

1) अवलोक्य 2) नक्तं 3) लिखेः
4) पश्यत 5) ईक्षेय।

III पाठारंभे कृतं पाठसंक्षेपं अनुवदत।

IV अद्य पठितानां पद्यानां संक्षेपं संस्कृतभाषायां लिखत।

—o—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकोनत्रिंशो दिवसः

ह्यः पठितचरं पद्यषट्कं पुनरपि विव्रियते सुखबोधाय। सिंहानां स्वभावविशेषं कविरुदाहरति 'शशंस तुल्यसत्त्वानां' इति पद्येन। हरिणादयो वन्यमृगाः केवलं वृक्षदलमर्मरं श्रुत्वाऽपि भीता धावन्ति। ते मृगाः स्वभावतो भीरवो दृश्यन्ते। कुतः? अन्ये मृगाः तान् आक्रामन्ति। किंतु सिंहानां न तादृशी भीतिः। न ते अन्यमृगैः पराभवितुं शक्यन्ते; यतस्ते स्वयं मृगराजाः वर्तन्ते। ते अन्यान् मृगान् आक्रामन्ति, न त्वन्यैः ते आक्रम्यन्ते। ते धीरं गुहासु शेरते। अयं सिंहानां स्वभावः। यदा रघोः सैन्यघोषं ते अशृण्वन् तदा तेषां न कोपि संभ्रमः समजनि। ते केवलं ग्रीवां परिवृत्य तान् सकृदैक्षन्त। "कोऽयं कोलाहलः अस्माकं सुखभञ्जकः" इति मत्वेवेत्यर्थः। "रे अस्मत्प्रभावमजानानाः दुर्बलाः, युष्मासु मे अनुकम्पा जायते। अधुना गच्छत" इत्याज्ञां दृष्ट्यैव दिशन्तः तत्र तथैवाशेरत।

अथ गंगाजलस्पर्शिनं मन्दमारुतं वर्णयति 'भूर्जेषु मर्मरीभूते' त्यादिना। वायोः आकर्षकाः त्रयो गुणाः सन्ति। शैत्यं मान्द्यं सौरभ्यं च। शीतजलसंपर्केण शैत्यं, मन्दगत्या मान्द्यं कुसुमस्पर्शेन सौरभ्यं च जायते। तेषु द्वौ गुणौ अत्र वर्ण्येते। शैत्यं मान्द्यं, च। तत्रत्या वाताः भूर्जपत्रेष्वाघातेन मर्मरशब्दमुत्पादयन्ति। कीचकानां अंकुरणानन्तरं आदिमदशायां ते मृदुला दृश्यन्ते। तदा भ्रमराः तेषां काण्डेषु सुषिरान् निर्माय तदन्तर्भागे वसन्ति। यदा ते वेणवः क्रमशो दृढा भवन्ति तदा ते सुषिरास्तथैव वर्तन्ते। तैः सुषिरैः यदा वायुः प्रविशति तदा ते मधुरं स्वनन्ति। एवं वातः वेणुषु नादमुत्पादयन्ति। गंगा हिमवतः पार्श्वे शिलाभिः संघट्टनेन विकीर्णा विशीर्णा च प्रवहति। ततो जलकणाः परितः प्रसरन्ति। तथा प्रसरतां जलकणानां संपर्कः वातेन लभ्यते। एवं मर्मरशब्दमुत्पादयन्तः वेणुनिनदैः प्रोत्साहयन्तः सुखशीतलाः वाताः रघोः सैन्यानां च पर्वतारोहणेन जातान् स्वेदकणान् विलोप्य तमसेवन्त।

अथ 'विशश्रमुर्नमेरूणा'मिति पद्येन कस्तूरीमृगाणां सान्निध्यमाधिक्यं च हिमालयेऽस्तीति सूचयति। नमेरवो बहुशाखाः निबिडच्छाया वृक्षविशेषाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिमालये प्रभूतं दृश्यन्ते। तेषामधस्तात् विस्तृताः शिलाः सन्ति। कस्तूरी-मृगाः मध्याह्नेषु तासु शिलासु शयाना विश्रमं लभन्ते। मध्याह्नापगमे कठिनातपशमनात् ते ताः शिला मुक्त्वा दूरं गच्छन्ति। यदा ते शेरते तदा तेषां नाभिस्पर्शेन ताः शिला मृगमदलिप्ता भवन्ति। ततस्ताः सुरभिलाश्च जायन्ते। तथा सुरभिलासु शिलासु निषण्णाः रघोः सैनिकाः यथेष्टं विश्राम-सुखमलभन्त।

अथ 'सरलासक्ते'ति पद्येन कविः ओषधिविशेषाणां परिचयं ददाति। हिमालये दिवा निष्प्रभाः नक्तं सप्रभाः काश्चन ओषधयः सन्ति किल। नक्तं तासां प्रकाशः प्रसरति। रघोः सैनिकगजाः सरलवृक्षकाण्डेषु बद्धा अवर्तन्त। तेषां गजानां ग्रीवासु शृंखलाः विद्यन्ते। तासु शृंखलासु तासां ओषधीनां प्रभापूरः प्रतिफलति। तथा प्रतिबिंबनेन समन्तात् वर्तमानं सर्वमपि भास्वरं भवति। एषा प्रतिबिंबिता प्रभा रघोः रात्रिकाले तैलेन विना दीपिता दीपिका संजातेति भावः।

अथ रघोः सैनिकगजानां आकारप्रमाणं 'तस्योत्सृष्टनिवासेषु' इति पद्येन विवृणोति। रात्रौ कस्मिंश्चन सुवासे प्रदेशे स सेनां निवेशयामास। निकट-वर्तिनां देवदारुद्रुमाणां स्कन्धेषु सैनिका गजा अबध्यन्त। गजानां कण्ठरज्जु-घर्षणेन देवदारूणां प्रकाण्डा अंकिता आसन्। प्रभाते ते तन्निवेशाभोगं परित्यजन्ति। ततः तत् शून्यं च भवति। किराताः तेन मार्गेण गच्छन्ति। ते सेनानिवेशस्थले सर्वमपि विषमं विपर्यस्तं च पश्यन्ति। यदृच्छया तेषां स्कन्धेषु गजग्रैवेयैरंकिता भागा लक्ष्यन्ते। तद्दर्शने तु ते विस्मयस्तब्धाः तिष्ठन्ति। "अहो! कियत्प्रमाणा अमी सेनागजाः स्युः तादृशा गजा अस्माभिरेतावत्पर्यन्तमवलोकिताः" इति।

अथ "तत्र जन्यम्" इति पद्यमवशिष्टं वर्तते। हिमालयान्तर्गताः सप्तजन-पदा एवात्र पर्वतीया गणाः। ते एव उत्सवसंकेता इति प्रसिद्धाः। तैः सह तस्य भीमं युद्धमभूत्। कुतस्तस्य भीमता? उच्यते। तेषां आयुधानि विचित्राण्यासन्। नाराचाः क्षेपणीयाः अश्मानश्च तेषामायुधानि। ततो रघोः सैन्यैरपि तान्येवायुधान्युपयुक्तानि। एतैः ते परस्परमयुध्यन्त। तान्यस्त्राणि रणाङ्गणे परस्परसंघट्टनं कृत्वा अग्निमुत्पादयामासुः। तथा युद्धभूमौ अग्न्युत्पाद-कमभूत्तेषां युद्धमिति भावः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पर्वतीयैर्गणैः सह नाराचादिभिः भीषणं युद्धमभूदिति कथितम् । ततः "शरैरुत्सवसंकेतानि" इत्यनेन पद्येन तेषां पराजयं रघोराज्ञावर्तित्वं च कथ्यते । सप्त पर्वतीयगणा उत्सवसंकेता इति कथितं खलु । रघुस्तैः सह युद्ध्वा पराजितान् चकार । तस्मात् तेषां आनन्दमयं जीवितं प्रणष्टमभूत् । रघुः तावतैव न विरराम । तस्यः अन्यः कश्चनाभिलषश्चाजनि । "किन्नरा नाम गानालपननिपुणाः । तैः स्वीया विजयवार्ता गापनीयाः" इति मत्वा स्वबाहुवीर्यमधिकृत्य निबद्धानि कीर्तिगानानि स विजेता तैः मधुरमगापयत् ।

रघुः किन्नराश्च परस्परं एकैकेषां महत्त्वमजानन् ।

79 परस्परेण विज्ञातस्तेषूपायनपाणिषु ।
राज्ञा हिमवतः सारो राज्ञः सारो हिमाद्रिणा ॥

उत्सवसंकेताः किन्नराः विशिष्टरत्नभूयिष्ठानि वस्तूनि रघवे उपजहुः । तदा रघुः हिमालयस्य अतुलभरत्नरूपं सारं विज्ञातवान् । "अहो ईदृशानि अनर्घाणि रत्नानि अस्मिन् हिमाद्रौ किमु सुलभानि ?" इत्यद्भुतपरतन्त्रो रघुरभवत् । किन्नराश्च इदंप्रथमतयैव अन्यस्मै उपायनान्युपाहरन्ति । ततः तेषामप्यजनि विस्मयरूपो विकारः । "अहो ईदृशः कोपि राजा अस्मिन् लोके जीवति किम् ?" एवं रघोः प्रभावरूपः सारो हिमाद्रिणापि विज्ञातः । यथा पूर्वं अपरान्तमहीपालानां पश्चिमसमुद्रस्य च अभेदः कल्पितः, तथैव अत्र पर्वतीयगणानां हिमालयस्य चापि अभिन्नता भाविता ।

अन्वयः—तेषु उपायनपाणिषु सत्सु राज्ञा हिमवतः सारः, हिमाद्रिणा राज्ञः सारश्च परस्परेण विज्ञातः ।

उपयनानि पाणिषु येषां ते । उपायनं = उपहारः । सारः = शक्तिः, महत्त्वं । यदा ते उपायनपाणयः अभवन् तदा = तेषु उपायनपाणिषु (सत्सु) ।

हिमालयजनपदेषु येषां स्वकीर्तिं निक्षिप्य स प्रतिन्यवर्तत ।

80 तत्राक्षोभ्यं यशोराशिं निवेश्यावरुरोह सः ।
पौलस्त्यतुलितस्याद्रेरादधान इव ह्रियम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स रघुः तत्र हिमाद्रौ अन्यैरधृष्यं अचञ्चलं यशःपुञ्जं निवेश्य तस्मात् दक्षिणां दिशं प्रति न्यवर्तत । यशोराशिः कैलासपर्वतस्यापि लज्जामादधे । सत्कीर्तिः शुभ्रवर्णा दुष्कीर्तिः श्यामवर्णा चेति कविसंकल्पः इति पूर्वमुक्तमेव । कैलासः सन्ततहिमावृतत्वात् शुभ्रवर्णः रघोः यशोराशिः कैलासपर्वतादप्यधिकतरां पुञ्जतां चावहत् । ततः कैलासः सलज्जो बभूव । " अहं सर्वशुभ्रः सर्वोन्नतश्चासम् । अधुना तु मत्तोऽप्युन्नततरः शुभ्रतरश्च यशोराशिर्दृश्यते । उन्नतोऽहमधुना नम्रः संजातः । शुभ्रोऽहमधुना विवर्णः संभूतः ।" इति चिन्तया स पर्वतः ह्रीणः अर्थात् लज्जितोऽभूत् । एवं रघुः कैलासस्य लज्जामापादयन् प्रतिन्यवर्तत ।

अक्षोभ्यं = क्षोभयितुमशक्यं = अधृष्यं. ह्रियं = लज्जां. पौलस्त्यः = रावणः. पुरा रावणः कैलासं बाहुनोत्पाटयन् तुलयति स्मेति कथा पुराणेषु विद्यते । तत्कथासंबन्धेनैवात्र पौलस्त्यतुलितस्याद्रेरित्यस्य कैलासस्येत्यर्थः सिध्यति ।

अन्वयः—तत्र सः पौलस्त्यतुलितस्य अद्रेः ह्रियं आदधानः इव अक्षोभ्य यशोराशिं निवेश्य अवरुरोह ।

यशसां राशिः । पौलस्त्येन तुलितः. क्षुभ् + य = क्षोभ्य. नि + विश् + य. अव + रुह् + अ (लिट्). पुलस्त्य + अ (तद्धितान्तः) आ + धा + आन (शानच्) ह्रीशब्दस्य स्त्रीशब्दवद् रूपाणि ।

स लौहित्यानदीं उत्तीर्य प्राग्ज्योतिषान् प्राप ।

81 चकम्पे तीर्णलौहित्ये तस्मिन् प्राग्ज्योतिषेश्वरः ।
तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः ॥

स रघुः लौहित्यां नाम नदीं उदतरत् । ततः स प्राग्ज्योतिषान् नाम जनपदान् प्राप । प्राग्ज्योतिषाणां राजा रघोः आगमनवृत्तान्ताकर्णनादेव भयादकम्पत । प्राग्ज्योतिषेषु कालागुरवो नाम वृक्षा सुलभा विद्यन्ते । तेषां काण्डेषु रघोः गजा अबध्यन्त । एवं ते वृक्षाः आलाना अर्थात् गजबन्धनवृक्षकाण्डाः संजाताः । गजानां मदोद्रेकात् मस्तकघर्षणेन ते द्रुमाः चकम्पिरे । प्राग्ज्योतिषाणामीश्वरः तत्रत्या अगुरुवृक्षाश्च सममेव अकम्पन्तेत्यर्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्वयः—तस्मिन् तीर्णलौहित्ये सति प्राग्ज्योतिषेश्वरः तद्गजालानतां प्राप्तैः कालागुरुद्रुमैः सह चकम्पे ।

तीर्णा लौहित्या येन सः । प्राग्ज्योतिषाणां ईश्वरः । तस्य गजानां आलानानि । आलानतां प्राप्तैः आलानीभूतैः ।

पुत्रः दरिद्रतां प्राप्तः, (गतः), पुत्रः दरिद्रीभूतः, पुत्रः दरिद्रः अभवत् ।

तातः क्रुद्धतां प्राप्तः (गतः), तातः क्रुद्धीभूतः, तातः क्रुद्धः अभवत् ।

कम्प् (लिट्. आ. प्र. ब.), तॄ+त=तीर्ण । प्र + आप् +त=प्राप्त ।

प्राग्ज्योतिषेश्वरः तस्य सेनापरागदर्शनेनापि भीतोऽभवत् ।

82 न प्रसेहे स रुद्धार्कमधारावर्षदुर्दिनम् ।
रथवर्त्मरजोऽप्यस्य कुत एव पताकिनीम् ॥

रघोः रथमार्गात् रजांसि उत्पतन्ति स्म । रजःप्रसरणात् आकाशं आच्छन्नमभूत् । ततः सूर्यप्रकाशाभावात् मेघावरणाभावेऽपि तद्दिनं वर्षाधारा-भिर्विनाऽन्धकारितं दुर्दिनमभवत् । तादृशानां रजसामाक्रमणमपि प्राग्ज्योतिषेश्वरः सोढुं शक्तो नाभवत् । एवं तर्हि कथं सः तस्य सेनां अभियोद्धुं पारयति ?

दुर्दिनं = मेघच्छन्नं दिनम् । पताकिनी = सेना. वर्त्मन् = मार्गः कुत एव = पुनः कथं.

अन्वयः—सः रुद्धार्कं अधारावर्षदुर्दिनं अस्य रथवर्त्मरजः अपि न प्रसेहे । कुत एव पताकिनीं प्रसेहे ।

रुद्धः अर्कः यस्मिन् तत् । न विद्यते धारावर्षः यस्मिन् तत् । अधारावर्षं च तत् दुर्दिनं च । रथानां वर्त्म । रथवर्त्मनः रजः ।

प्र + सह् + ए (लिट्. आ. प्र. ए.); रजः (स. नपु. द्वि. ए.) ।

रघुः कामरूपेश्वरं जिगाय ।

83 तमीशः कामरूपाणां अत्याखण्डलविक्रमम् ।
भेजे भिन्नकटैर्नागैरन्यानुपरुरोध यैः ॥

प्राग्ज्योतिषाणां विजयानन्तरं स विजेता कामरूपान् नाम जनपदान् अभि प्रतस्थे । तत्र कामरूपाधिपः तस्य रघोर्विधेयोऽभवत् । स गजा-नादाय रघुमाश्रितवान् । गजानां गण्डतलेभ्यो मदजलं प्रस्रवदवर्तत । तैरेव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गजैः स कामरूपेशः पूर्वमन्यान् शत्रून् जिगाय । तादृशगजरूपमुपहारं दत्वा स स्वयं विधेयोऽभूदित्यर्थः ।

तं + ईशः । आखण्डलः = इन्द्रः, कटः = कपोलः, नागः = गजः,

अन्वयः— यैः अन्यान् उपरुरोध तैः भिन्नकटैः नागैः कामरूपाणां ईशः अत्याखण्डलविक्रमं तं भेजे ।

आखण्डलस्य विक्रमः । अतिक्रान्तः आखण्डलविक्रमः येन सः । भिन्नाः कटाः येषां ते । कटान् भित्वैव मदजलं प्रस्रवति । भज् (लिट्. आ. प्र. ए.) उप + रुध् + अ (लिट्. प. प्र. ए.) ।

[समजनि = समजायत, सञ्जातः. सकृद् = एकवारं- मत्वा = विचिन्त्य अजानानाः = अजानन्तः, अबोधन्तः. दृष्ट्या एव. दिशन्तः = यच्छन्तः. अशेरत = शयिताः. अधस्तात् = अधः, निषण्णाः = आसीनाः, समन्तात् = परिसरे. विपर्यस्तं = व्यत्यस्तं, असाधारणं कियत्प्रमाणाः = कियदौन्नत्यवन्तः. अश्मानः = शिलाः, अभिलाषः च अजनि = अजायत, अनर्घं = अमूल्यं इदंप्रथमतया एव = प्रथमत एव, सन्ततं हिमेन आवृतः अस्ति, अतः = सन्ततहिमावृतत्वात्. मत्तः = मत् (अस्मद्. पं. ए.) उत्पाटयन् = समूलमुद्धरन्. उद्रेकः = आधिक्यं. लाञ्छनं = आवृतं].

॥ अभ्यासः ॥

I निर्दिष्टरीत्या वाक्यानि विपरिणमयत ।

क) यथा—मेघेषु वर्षत्सु भूमिः क्लिन्ना भवति ।
यदा मेघाः वर्षन्ति तदा भूमिः क्लिन्ना भवति ।
यदा दिलीपः वनं अगच्छत् तदा रघुः राज्यं अरक्षत् ।
दिलीपे वनं गते रघुः राज्यं अरक्षत् ।

1) अश्वेषु शैलमारोहत्सु शृंगाणि अवर्धन्त इव । 2) यदा सैन्यघोषः श्रुतः अभवत् तदा सिंहानां संभ्रमो नाभवत् । 3) निवासेषु सैन्यैः उत्सृष्टे किराताः प्रापुः । 4) केरलयोषित्सु धावन्तीषु रघुः ताः अलञ्चकार । 5) तस्मिन् तीर्णलौहित्ये प्राग्ज्योतिषेश्वरः चकम्पे ।

ख) यथा—वनिताभिः भूषणानि उदसृज्यन्त । वनिताभिः उत्सृष्टानि भूषणानि । पाण्डयैः प्रतापः न विसोढः । पाण्ड्यैः प्रतापः न विषेहे ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

1) तैः मुक्तासारः अदीयत । 2) योधैः पीतः नालिकेरासवः । 3) आत्मा सुधीभिः संरक्षितः । 4) तेन जयस्तंभाः निखाताः । 5) तेन नद्यः सुप्रतराः अक्रियन्त । 6) अस्माभिः पत्राणि लिख्येरन् । 7) द्विजैः पाठ्याः वेदाः । 8) त्वया आम्राणि खाद्यन्ताम् ।

ग) यथा—द्रुमाः आलानतां गताः=द्रुमाः आलानानि अभवन् ।

रघोः कीर्तिः अनश्वरः अभवत्=रघोः कीर्तिः अनश्वरतां गता ।

1) सूर्यस्य किरणाः तीक्ष्णतां गताः (प्राप्ताः) । 2) भवान् परीक्षायां प्रथमः अभवत् । 3) जानकी साहित्ये समर्थतां गता । 4) अलसः सर्वदा पराजितत्वं प्राप्नोति । 5) रघोः गजाः मत्ततां अगच्छन् ।

II पाठारंभे दत्तं पद्यानां संक्षेपं अनुवदत ।

III पदानि विश्लेष्य लिखत । यथा—यद्यप्यसावत्रागतस्तथाप्यमुमहं नापश्यम् । यदि, अपि, असौ, अत्र, आगतः, तथा, अपि, अमुं, अहं न अपश्यम् । रथगजतुरगैर्विजितशत्रुगणस्सदिलीपसूनुर्हिमालयमारुरोह । रथगजतुरगैः, विजितशत्रुगणः, सः, दिलीपसूनुः, हिमालयं, आरुरोह ।

पुरा चन्द्रवंशे दुष्यन्तो नाम कश्चिद्राजाजायत । स आत्मजानिव प्रजा अरक्षत् । मृगयालोलुपोऽसावेकस्मिन्दिनेऽरण्यमगच्छत् । स तस्मिन्वने वसतोऽनेकान् सत्त्वान्हन्ति स्म । कश्चिद्धरिणो रविमिवोज्ज्वलन्तमवलोक्य भयेनाधावत् दुष्यन्तस्त्वेनं मृगमेवानुगच्छन्नरण्यान्तरविशत् । एवं धावतोस्तयोर्मध्ये कश्चनर्षिकुमार आगच्छत् । स मृगमनुधावन्तन्तन्नृपमेवमवदत् । भो राजन्नेष मृगः कण्वेनर्षिणात्मज इव रक्ष्यते । 'भवतैष न हन्तव्यः' । राजाब्रवीत् । 'मुनिकुमार, तवाज्ञां शिरसा वहता मया बाणः प्रतिसंहृतः' । तच्छ्रुत्वा मुनिकुमारस्तं 'सम्राजं पुत्रं लभस्व' त्यन्वगृह्णाच्च ।

IV अथ पठितानां पद्यानां संक्षेपं संस्कृतभाषायां लिखत ।

॥ अवधेया विषयाः ॥

सन्धिर्द्विधा—नित्यसन्धिः अनित्यसन्धिरिति । नित्यसन्धिरवश्यंभावी । अनित्यसन्धिस्तु वक्तुरिच्छामनुसृत्य विकल्पेन भवति । अत्रेदं प्रमाणम् :—

संहितैकपदे नित्या, नित्या धातूपसर्गयोः ।
नित्या समासे, वाक्ये तु सा विवक्षामपेक्षते ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनेन पद्येन नित्यसन्धेरनित्यसन्धेश्चावकाशा विविच्यन्ते अर्थात् विभज्यन्ते। संहिता = परमसामीप्यं, सन्धानं, सन्धिकार्यं। संहिता एकपदे नित्या भवति। अतः 'बाले', 'अभवत्' इत्यादीनां स्थाने 'बाल इ', 'अ भू अ त्' इत्येवं विभज्य न वक्तव्यम्। तथा धातूनामुपसर्गाणां च सन्धिरपि नित्यः। अतः 'सीता राममन्वगच्छत्' इत्यस्य स्थाने 'सीता रामं अनु अगच्छत्' इति न प्रयोक्तव्यम्। समासेऽपि तथा। 'मनोगत'मित्यस्य स्थाने 'मनस् गतं' इति च न वक्तव्यम्। एते नित्यसन्धेरवकाशाः। अनित्यस्य सन्धेरवकाशस्तु वाक्ये भवति। तत्र वक्तुर्विवक्षामनुसृत्य पदानि सन्धाय न सन्धाय च प्रयोक्तव्यानि। 'रामस्सीताम्पर्यणयल्लक्ष्मण ऊर्मिलाञ्च' 'रामः सीतां पर्यणयत् लक्ष्मणः ऊर्मिलां च' इति सन्धाय विभज्य च प्रयोगो दृश्यते। उभयमपि सम्मतमेव।

साध्यदशा सिद्धदशा च।

अस्माकमुपयोगयोग्यानां सर्वेषामपि वस्तूनां द्वे दशे स्तः; सिद्धदशा साध्यदशा चेति। सिद्धदशां प्राप्तान्येव वस्तून्यस्माभिरुपयुज्यन्ते। पुस्तकं सिद्धदशायां वर्तते। पत्रसूत्रादिकं तस्य साध्यदशायां वर्तमानानि वस्तूनि। दालघृतसितादिकं लड्डूनामकस्य मोदकस्य साध्यदशा। तेषां सिद्धदशैव लड्डू। शिलाकाष्ठादिकं गृहस्य साध्यदशा। तेषां सिद्धदशैव गृहम्। तथैव बालेषु इत्येतत् बाल सु इत्यनयोः सिद्धं पदम्। सिद्धमेव पदमस्माभिः प्रयुज्यते। न तु बाल सु इति। निष्प्रयोजनता इति सिद्धदशायां स्थितस्य पदस्य साध्यदशा निस् प्र युज् अन ता सु इत्येवं भवति।

पदच्छेदः।

पदच्छेदः अथवा पदविश्लेष इत्यनेन सिद्धदशायां वर्तमानानां पदानां विश्लेषणमेव विवक्षितं; न तु साध्यदशायाम् वर्तमानानां। अतः "कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः" इत्यस्य "कुर्वन् एव इह कर्माणि जिजीविषेत् शतं समाः" इत्येव पदच्छेदः, न तु "कृ, अत्, सु, एव, इदम्, इ, कर्मन्, इ, जीव् स ईत्, शत, अम्, सम, अः" इति।

— ० —

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रिंशो दिवसः

अतीते दिने पठितपूर्वाणां पद्यानां सारः संक्षिप्यते । पर्वतीयेभ्यः स उपायनानि स्वीचकारेति "परस्परेण विज्ञात" इति पद्येन उच्यते । ते पर्वतीयाः स्वपाणिषु उपायनान्यादाय रघुमुपागताः । यदा ते तान् उपहारान् रघवे समर्पितवन्तः तदा स विजेता हिमालयस्य सारं विदितवान् । 'कीदृशान्यमूल्यानि रत्नान्यस्य पर्वतस्यान्तर्निक्षिप्तानि स्युः !; मया तु ईदृशानि रत्नानि नैव दृष्टपूर्वाणि' इति विचिन्तयन् स साद्भुतस्तत्र तस्थौ । ते जानपदाश्च साश्चर्या बभूवुः । कुतस्तेषामाश्चर्यम् ? अस्ति तेषामाश्चर्ये हेतुः । तावत् पर्यन्तं नैतादृशः पराजयस्तेषां संभूतः । 'अहो अस्य वीर्यमज्ञातचरमेव' इति तस्य वीर्यस्य तत्त्वतो ज्ञानं तेषां चाभवत् ।

अथ 'तत्राक्षोभ्यं यशोराशि'मिति पद्येन तस्य हिमालयात् निवर्तनारंभः कथ्यते । हिमालयान्तर्गतेभ्यो जानपदेभ्यः स उपायनानि स्वीकृतवान् । तर्हि स तेभ्यः किं नाम प्रत्यर्पितवान् ? उच्यते । स परैरधृष्यं यशोराशिं तत्र निचिक्षेप । पुञ्जीभूता सा कीर्तिः कैलासपर्वतादपि धवलतरा उन्नततरा चासीत् । कैलासो रजतगिरिरिति प्रसिद्धं खलु । सततं हिमावृतत्वात् तस्य सदा धावल्यम् रजतप्रभत्वं च स्वाभाविकमेव । कैलासः परमशिवस्यावासपर्वत इति च प्रसिद्धम् । पुरा खलु रावणः कैलासमुत्पाट्य शिवं तोषयामासेति च पौराणिकी कथा विद्यते । तदा सकृत् तस्य गिरेः सौभाग्यमदो मग्न आसीत् । अधुना तु द्वितीयो मानभङ्गः; यतस्तस्मादपि पृथुलो धवलश्च रघोः कीर्तिराशिः तत्र पुञ्जीभूतोऽदृश्यत । तदा देवादिभिरभिष्टुतः समाश्रितश्च स पर्वतो नितरां लज्जितोभूत् । 'देवाः किमतः परं मामवगणय्य रघुयशोराशिमाश्रयेरन् ! तर्हि मम का गतिः स्यात् ? अहं तेषां समक्षमल्पसौभाग्यः स्याम् । किमर्थमेवं जीवेयम् ।" इति खिन्नस्य तस्य गिरेः मनःक्षतिमादधानः स रघुः हिमालयादवारोहत् ।

अथ तस्य प्राग्ज्योतिषाभिमुखं प्रस्थानं कविः वर्णयति "चकम्पे तीर्णलौहित्ये" इत्यादिना पद्येन । उत्सवसंकेतान् प्राग्ज्योतिषान् चान्तरा लौहित्या नाम नदी प्रवहति । यदा स हिमालयादवतीर्य लौहित्यामुदतरत् तदैव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राग्ज्योतिषेश्वरः कम्पितुमारभत । तस्य कम्पनप्रकारं कविरुदाहरति । तत्र कालागुरुद्रुमाः समुन्नताः प्रचुरं विद्यन्ते । तेषां काण्डेषु रघोः सेनागजाः बद्धा आसन् । मदलहरीमसहमानाः ते गजाः दन्तैः करैः मस्तकैश्च तान् अगुरून् गुरुतरं निजघ्नुः । तेन ते सदैव कम्पमाना आसन् । एवं प्राग्ज्योतिषेशं कम्पनविषये बहवोऽगुरुद्रुमाः अन्ववर्तन्त । रघौ प्राग्ज्योतिषान् प्रविष्टे सति स्थावरा जंगमाश्च सममेव चकम्पिरे इति भावार्थः ।

प्राग्ज्योतिषेश्वरः तेन सह योद्धुं न शक्तोऽभूत् इति 'न प्रसेहे स रुद्धार्क' इत्यादिपद्येन कथयति । यदा रघुस्तं जनपदं प्राविशत् तदा रथमार्गादुत्पन्नैः परागपटलैः अन्तरिक्षं व्याप्तमभूत् । तैः सूर्यकिरणप्रसरः आव्रियत । ततः तद्दिनं मेघच्छन्नं अथवा दुर्दिनमिवासीत् । तं परागपटलमपि सोढुं प्राग्ज्योतिषेश्वरो न प्राभवत् । एवं स्थिते तस्य सेनामभिमुखीकर्तुं प्राग्ज्योतिषेश्वरः कथं प्रभवति ? सेनारेणुपुञ्जं दृष्ट्वैव स राजा रघोर्विधेयोऽभवदिति भावः ।

ततः कामरूपविजययात्रा 'तमीशः कामरूपाणा'मित्यनेन पद्येन वर्ण्यते । रघुरिन्द्रादपि विक्रान्तो वीरश्चासीत् । तादृशे तस्मिन् कामरूपान् प्रविशति सति कामरूपाधिपः नतशीर्षः सन् रघुमुपजगाम । तस्य प्रीतये मत्तगजरूपाण्युपायनानि च समर्पयामासुः । मदजलं स्रवद्भिस्तैरेव गजैः कमारूपेश्वरः ततः पूर्वं अन्यान् शत्रून् जिगाय । स्वराज्यसंरक्षकान् तान् गजान् सः स्वस्वामिने उपाहरत । रघोः रक्षकत्वे स्वीकृते, किमर्थं तेषां गजानां पालनपोषणादि क्रियते इति मत्वैत्यर्थः ।

विजितः विजेतारमर्चयति ।

84 कामरूपाधिपस्तस्य हेमपीठाधिदेवताम् ।
रत्नपुष्पोपहारेण छायामानर्च पादयोः ॥

रघुः कामरूपाणामीश्वरं जित्वा तस्य कनकसिंहासनमधिरूढवान् । तदा कामरूपेशः तस्य रघोः पादतले रत्नान्युपाजहार । रघोः पादलक्ष्मीं रत्नरूपैः पुष्पैः स पूजितवानिति भंग्यन्तरेण कथितम् ।

हेम = स्वर्ण. छाया = लक्ष्मीः. आनर्च पूजयामास. रत्नान्येव पुष्पाणि, तेषां उपहारेण ।

अन्वयः —कामरूपाधिपः हेमपीठाधिदेवतां तस्य पादयोः छायां रत्नपुष्पोपहारेण आनर्च ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्च् + अ (लिट्. प. प्र. ए.) मध्ये नकारागमो विशेषः । आनर्च आनर्चतुः, आनर्चुः ।

9711

जैत्रयात्रामुपसंहरति ।

85 इति जित्वा दिशो जिष्णुर्न्यवर्तत रथोद्धतम् ।
रजो विश्रामयन् राज्ञां छत्रशून्येषु मौलिषु ॥

उक्तप्रकारेण स जयशीलो रघुः निर्दिष्टपूर्वान् सर्वानपि प्रदेशान् विजिग्ये। ततः विजितानां नृपाणां छत्रशून्येषु नग्नेषु शिरस्सु रथसमुद्भूतानि रजांसि विन्यस्य स्वां पुरीं न्यवर्तत ।

जिष्णुः = जयशीलः (जि + स्नु) इष्णु, स्नु इतिप्रत्ययौ कर्तुरर्थे प्रयुज्येते इति पूर्वमुक्तम् । रथैः उद्धतं । मौलिषु = किरीटेषु ।

अन्वयः—जिष्णुः स इति दिशो जित्वा रथोद्धतं रजः छत्रशून्येषु राज्ञां मौलिषु विश्रामयन् न्यवर्तत ।

नि + वृत् (लङ् आ. प्र. ए) उद् + हन् + त = उद्धत ।

रघुः विश्वजिन्नामकं यज्ञं आहृतवान् ।

86 स विश्वजितमाजह्रे यज्ञं सर्वस्वदक्षिणम् ।
आदानं हि विसर्गाय सतां वारिमुचामिव ॥

स्वपुरीनिवर्तनानन्तरं स रघुः विश्वजिन्नामकं यज्ञं कर्तुमारभत । राज्ञा तावत्पर्यन्तं यत् स्वायत्तीकृतं तत् सर्वं तस्मिन् यागे दक्षिणात्वेन दीयते । ततः स अकिञ्चनो अथवा निर्धनो भवति । उचितेषु पात्रेषु समर्पणार्थमेव स अन्येभ्यः धनं आदत्ते । यथा मेघः अन्यत्र वर्षणार्थमेव समुद्रात् जलमादत्ते । तथैव रघुरपि शत्रुसमूहात् सम्पदमादाय उत्तमपात्रेष्ववर्षदिति भावः ।

अन्वयः—सः सर्वस्वदक्षिणं विश्वजितं यज्ञमाजह्रे । वारिमुचामिव सतां आदानं विसर्गाय भवति हि ।

आ + हृ + ए (लिट्. आ. प्र. ए.) = समाहृतवान् । सर्वस्वं दक्षिणा यस्मिन् तत् । वारि मुञ्चति । वारिमुचां = मेघानां. वारि + मुच्. चकारः ककारो भवति । यथा वाक् वाचौ वाचः इत्यत्र चकारः कवर्गो जायते तथा । वारिमुक् वारिमुचौ वारिमुचः । विसर्गः = त्यागः, सतां = सज्जनानां ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रघुः यागावसाने सामन्तनृपान् निवर्तयामास ।

87 सत्रान्ते सचिवसखः पुरस्क्रियाभिः
गुर्वीभिः शमितपराजयव्यलीकान् ।
काकुत्स्थश्चिरविरहोत्सुकावरोधान्
राजन्यान् स्वपुरनिवृत्तयेऽनुमेने ॥

यागोऽवसितः । जैत्रयात्रायां ये राजानो रघुणा विजिताः ते सर्वेऽपि यागमहामहे सन्निहिता आसन् । यज्ञेऽवसिते तान् सामन्तनृपान् स्वं स्वं जनपदं निवर्तयितुं रघुरुद्युङ्क्ते स्म । निवर्तनात् पूर्वमेव रघुः मन्त्रिभिः समन्वितः तेभ्यः उचितान् पुरस्कारान् ददौ । पराजयेन यद् दुःखं तेषां समुत्पन्नं तत् रघुणा दत्तैः पुरस्कारैः अपाक्रियत । यज्ञारंभात् पूर्वमेव सन्निहिता राजानः यावदवभृतस्नानं तत्रैवावसन् । तावत्कालं ते अन्तःपुरजनैः विरहिता अवर्तन्त । तास्तु तरुण्यः स्वप्राणनाथान् प्रतीक्षमाणाः उत्कण्ठाकुलाः स्वराजधानीष्वेव यथाकथञ्चित् कालं यापयन्त्यः स्युः । एते सामन्तनृपाश्च तासां समागमायोत्सुकांश्च भवेयुः । एवं चिराय विरहदुःखमनुभवतो नृपान् ' गच्छत, सुखा भवतां पन्थानः सन्तु, एवं पुनर्दर्शनाय ' इत्यादिभिरनुकूलैर्मृदुलैर्वचनैरालप्य स निवर्तनायानुमतिं दत्तवान् ।

अन्वय :— काकुत्स्थः सत्रान्ते सचिवसखः सन् गुर्वीभिः पुरस्क्रियाभिः शमितपराजयव्यलीकान् चिरविरहोत्सुकावरोधान् राजन्यान् स्वपुरनिवृत्तये अनुमेने ।

पुरस्क्रिया = पुरस्कारः. व्यलीकं = दुःखं. अवरोधः = अन्तपुरांगनाः. राजन्याः = राजपुत्राः, क्षत्रियाः ।

काकुत्स्थः = उन्नतराजवंशजः (रघुः) ककुदि तिष्ठति इति काकुत्स्थः । ककुदि सर्वेषामप्युच्चकोट्यां तिष्ठति इत्यर्थः । सत्रं = यज्ञं. सचिवानां सखा अथवा सचिवा एव सखायः यस्य सः = सचिवसखः. राजन्, सखि, अहन्, उक्षन्, इत्यादयः कतिचन शब्दाः समासेषूत्तरपदस्थाः राज, सख, अह, उक्ष इत्येवं अकारान्ताः संपद्यन्ते । महान् च असौ राजा च = महाराजः. प्रियसखः. त्र्यहः. महोक्षाः ।

शमितं पराजयव्यलीकं येषां ते । चिरविरहेण उत्सुकाः अवरोधा येषां ते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजानः प्रस्थानावसरे रघुं प्रणेमुः ।

४४ ते रेखाध्वजकुलिशातपत्रचिह्नं
सम्राजश्चरणयुगं प्रसादलभ्यम् ।
प्रस्थानप्रणतिभिरंगुलीषु चक्रुः
मौलिस्रक्च्युतमकरन्दरेणुगौरम् ॥

यज्ञे संमिलिताः नृपाः निवर्तितुमारभन्ते । सार्वभौमो रघुः चरणौ भूमौ विन्यस्य कनकसिंहासने तिष्ठति । जिगमिषवो नृपाः एकैकशः तस्य पादयोः प्रणमन्ति । तदा तै धृतानां शिरोमाल्यानां पुष्पमकरन्दपरागपतनेन रघोः चरणांगुल्यः गौरवर्णाः संपद्यन्ते । तच्चरणपतनसौभाग्यं तु न साधारणैर्लभ्यते । कतिपयैर्भाग्यवद्भिरेव तल्लभ्यते । रघोश्चरणौ तु विशिष्टलक्षणयुक्तौ चास्ताम् । ध्वजकुलिशातपत्ररूपा रेखाः तयोः पादयोरदृश्यन्त ।

अन्वयः—ते रेखाध्वजकुलिशातपत्रचिह्नं प्रसादलभ्यं सम्राजः चरणयुगं प्रस्थानप्रणतिभिः अंगुलीषु मौलिस्रक्च्युतमकरन्दरेणुगौरं चक्रुः ।

कुलिशं = वज्रम्. स्रक् = माला. च्युत = स्रस्त, पतित. ध्वजः च कुलिशं च आतपत्रं च ध्वजकुलिशातपत्राणि । रेखाः एव ध्वजकुलिशातपत्राणि रेखाध्वजकुलिशातपत्राणि । तेषां चिह्नानि यस्मिन् तत् । चरणयोः युगं । प्रसादेन लभ्यं । प्रस्थानस्य समये कृताः प्रणतयः । (मध्यमपदलोपी) मौलीनां स्रग्भ्यः च्युतैः मकरन्दैः रेणुभिः च गौरं ।

अथेदमन्तिमपद्यपञ्चकमप्यत्रैव संक्षिप्यते । जैत्रयात्रान्ते रघुः स्वपुरीं न्यवर्तत । विश्वजिन्नामकयागस्यानन्तरं सामन्तनृपाः स्वां स्वां पुरीं निवर्तितुकामा अभवन्; ते निववृतिरे च, इत्ययमत्र संक्षेपः । तत्र 'कामरूपेश्वरस्तस्य' इति पद्ये कामरूपेशेन रघुरपूज्यतेति कथ्यते । रघुः कामरूपाधिपं जित्वा तस्य स्वर्णसिंहासनमधिरूढवान् । तदा तस्य सिंहासनस्याभूतपूर्वा श्रीरवर्धत । तां श्रियं कामरूपेशः अर्चयामास । कैः ? रत्नैरेव पुष्पैः । अर्चनाय पुष्पाण्यावश्यकानि खलु । अत्र तु पुष्पाणां स्थाने रत्नान्यासन् । तत्त्वतः कामरूपेशः बहून्यमूल्यानि रत्नानि रघवे उपजहार । रघवे तेषां रत्नानां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समर्पणं तस्य सिंहासनाधिदेवतायाः श्रियः पादयोः पुष्पार्चनमेवासीदिति भावः ।

एवं सर्वानपि नृपान् विजित्य स विजयी रघुः स्वां पुरीं प्रति न्यवर्तत । युद्धयात्रायामेव सेनाकोलाहलाः श्रूयन्ते, परागा उद्धूयन्ते च । युद्धानन्तरं तु न तावान् धूलिपटलः संजायते, यावान् सति युद्धे वर्तमाने । तदा तु परागाः स्वयमेव शाम्यन्ति । रजसां तत् शमनं कविरुत्प्रेक्षते । यदा रघुः सम्राडभवत् तदा स एकच्छत्राधिपतिर्जातः । तदा अन्येषां नृपाणां शिरांसि छत्रशून्यान्यासन् । रघुस्तु तानि शिरांसि नग्नीभूतान्यभवन्निति मत्वा स्वसेना-परागानाहूय एवमाज्ञापयामास । "हे परागाः युष्माकमतः परं अस्मत् सेना-सहवासो न कार्यः । अतोऽधुना यूयं गच्छत । अस्मदधीनराज्येषु नग्नशीर्षाः सामन्तनृपाः सन्ति । तत्र गत्वा तेषां नग्नशिरसामावरणं कुरुत ।" "यथाऽऽज्ञापयति भवान्" इति सादरं तामाज्ञां शीर्षेण गृहीत्वा ते परागाः तथैवाकुर्वन् । रजसां स्वतःशमनमेतया रीत्या कविना वर्णितम् ।

नगरं प्राप्य स विश्वजितं यज्ञमाजहार । दिग्विजयानन्तरं सार्वभौमैरनुष्ठीयमानो याग एव विश्वजित् । जैत्रयात्रायां विजितेभ्यो राजभ्यो यद् आदत्तं तेन सह स्वकीयं सर्वस्वमपि तस्मिन् यज्ञे दक्षिणारूपेण दीयते । तथा स विस्वो भवति । चारित्रशुद्धेरग्निपरीक्षैवायं यागः । समस्तसुखभोगाना-मुपरिस्थितस्य राज्ञः स्वमनसैव निःस्वतावरणं न खलु लघ्वी साहसिकता । यदि मनसोऽन्तस्तले स्वार्थस्य भोगासक्तेर्वा लवोऽपि स्यात् तर्हि कदापि न तेन तादृशं कर्म कर्तुं शक्यते । प्राचीनानां धर्मिष्ठानां राज्ञामिदमुत्तममुदाहरणम् । ते स्वार्थलाभार्थं न किमपि कर्माचरन्ति । सर्वमपि कृतं परार्थनिर्वहणार्थम् । उक्तमुदाहरति । सज्जनास्तु मेघसदृशा दृश्यन्ते । ते समुद्रात् लवणदूषि-तमपि सलिलमादाय शुद्धीकृत्य तृषितेषु प्रदेशेषु वर्षन्ति । एवमेव रघुः तत्र तत्र पुंजीभूताः संपदः स्वकरबलेनादाय सत्पात्रेष्ववर्षत् ।

अथ यागावसाने स रघुः स्वपुरमागतान् सामन्तनृपान् तत्तन्नगरं प्रति निवर्तयामास । तेषां मनांसि पराजयेन नितरां दूनान्यासन् । रघुः स्वहस्तेन प्रदत्तैस्तैस्तैः महद्भिः पुरस्कारैः तान् प्रीणयामास । तेन तेषां हृदयानि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रसन्नान्यभवन् । ते राजानश्च यागसंभारार्थं चिराय स्वपुरेभ्यो निर्गताश्च । तेषां अन्तःपुरांगनाः 'मम प्राणनाथः अद्य आगमिष्यति, श्वः आगमिष्यति' इत्यौत्सुक्यादाकुलाः तत्तन्नगरेष्वेव निवसन्ति । तासां विरहवेदनामनुभवन्तीनां अन्तःपुरांगनानां स्मरणेन ते राजानश्च प्रतिनिवर्तनायोत्कण्ठाकुलाः अवर्तन्त । तादृशानां तेषामेते पुरस्काराः स्वनगरनिवर्तनानुमतिश्चेति द्वयं महान्तमानन्दमजनयत् ।

निवर्तनावसरे ते सम्राजं एकैकशः पुनः पुनः प्रणेमुरित्यन्तिमं पद्यं विशदयति । राज्ञः पादयोः सार्वभौमलक्षणानि अविद्यन्त । ध्वजस्य कुलिशस्य आतपत्रस्य चाकारैर्विचित्रा रेखा तयोरदृश्यन्त । तादृशयोर्लक्षणयुक्तयोः पादयोस्ते प्रणेमुः । तस्य पादतलपतनसौभाग्यमपि न सर्वेषां सुलभम् । तस्य सार्वभौमस्य प्रसादपात्रीभूतानामेव तत् सुलभम् भवति । प्रस्थानावसरे तेषां केशभाराः पुष्पमालाभिरलंकृता आसन् । यदा ते प्रणेमुः तदा ताभ्यो मकरन्दः परागाश्च रघोः पादांगुलीषु लग्ना अभवन् । तस्माद् अरुणास्ता अंगुल्यः गौरवर्णाः समपद्यन्त ।

[अधृष्यं = अनाक्रमणीयं. पृथुलं = बृहत्. अभिष्टुत = स्तुत. अतःपरं = अस्मादनन्तरं, खिन्नः = दुःखितः. मनःक्षतिः = मनोभंगः- अन्तरा = मध्ये, अन्ववर्तन्त = अन्वकुर्वत. निजघ्नुः = निहतवन्तः, निजघान—निजघ्नतुः—निजघ्नुः (लिट्. पर). मत्वा+एव+इति+अर्थः । नम्रीभूतानि + अभवन् + इति । आजहार = आहृतवान्, प्रवर्तयामास । निःस्वतावरणं = दारिद्र्यस्वीकरणं । दूनानि = दुःखितानि. इति+औत्सुक्यात्+ आकुलाः, प्रणनाम —प्रणेमतुः प्रणेमुः ।]

॥ अभ्यासः ॥

I) निर्दिष्टरीत्या वाक्यानि विपरिणमयत —

क) लिङो लृङो वा रूपेषु विपरिणमय्य वाक्ययुग्मकानि एकीकुरुत ।

यथा —रामः भवनं गच्छति ; स अन्नं लभते ।

यदि रामः भवनं गच्छेत् स तर्हि अन्नं लभेत अथवा, रामः भवनं गच्छेत् चेत् अन्नं लभेत ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आतपः प्रसरति ; शैत्यं शान्तं भवति । यद्यातपः प्रासरिष्यत् तर्हि शैत्यं शान्तमभविष्यत् । अथवा आतपः प्रासरिष्यत् चेत् शैत्यं शान्तमभविष्यत् ।

1) त्वं मधुरं गायसि, अहं आकर्णयामि । 2) बालाः पाठान् पठन्ति, ते विजयं लभन्ते । 3) कन्दुकं लभे, क्रीडामि । 4) मया फलानि खाद्यन्ते, क्षुधा शाम्यति । 5) ताराभिः प्रकाश्यते, आकाशं दर्शनीयं भवति ।

खे) प्रयोजकरूपेषु विपरिणमयत—

यथा—दीपः प्रकाशते ; कन्या दीपं प्रकाशयते ।
त्वं मार्गेण चरसि, जनाः त्वां मार्गेण चारयन्ति ।

1) बालः पठति । 2) भृत्याः कर्म कुर्वन्ति । 3) शिशुः गच्छति । 4) त्वं चन्द्रं पश्यसि । 5) वयं अन्नं भक्षयामः ।

II अद्य पठितस्य पद्यपञ्चकस्यार्थं संस्कृतभाषायां लिखत ।

III पाठारंभे दत्तं पद्यसंक्षेपं मातृभाषायां अनुवदत ।

—o—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकत्रिंशो दिवसः

अथात्र संभाषणशैलीपरिचयार्थं 'एकभारतं' नाम किमपि नवीनं नाटकमवतार्यते।

॥ कथासंक्षेपः ॥

[नाटकस्यास्य इतिवृत्तं (कथा) केवलं सङ्कल्पसमाकलितं; न खलु पुराणादिभ्यः समुद्धृतम्। हिमालयादीनां पर्वतानां गङ्गादीनां नदीनां मरुमहारोगादीनां च मूर्तगुणारोपात् (Personification) एवात्र कथापात्रसृष्टिर्निरुह्यते।

पितुर्हिमालयस्य द्वे पुत्र्यौ स्तः। ज्येष्ठा सिन्धुः कनिष्ठा गंगा च। सिन्धुः माहम्मदैः अपहृता सती परधर्मं स्वीचकार। (सा पाकिस्तान् प्रदेशेन प्रवहति खलु) गंगां तु पिता हिमालयः सागराय ददौ। सा तु स्वभर्तुः सागरात् सततं बिभ्यती अवर्तत। विशङ्कटाकारः स भर्ता सदा गर्जनबाहुमुन्नमय्याट्टहासं कुर्वन् तां अभ्यापतति। परं तु हिमालयो जामातुः सागरस्य विशालतां अगाधतां च सम्यग् जानन् अवर्तत। एते सर्वेऽपि भारतस्याभिवृद्धये निरन्तरं यतमाना अवर्तन्त।

अत्र मरुः प्रतिनायकः। तस्य महिषी किल मरीचिका प्रकम्पनः पुत्रश्च। महारोगादयस्तस्य सखायः। ते भारतभूमेरस्या नाशाय प्रयतन्ते। अन्ते नायकप्रतिनायकपक्षयोः परस्परं संघट्टनं संभवति। पराजितो मरुस्तिरोभवति। सर्वत्र सस्यश्यामलं च जायते।]

॥ एकभारते प्रथमोऽङ्कः ॥

नान्दी

1 ब्रह्मेत्याहुर्यदीयामविरतिमृषयो राजसीं सर्गशक्तिं
स्थित्यर्थां सत्त्वशक्तिं सकलसुखकरीं विष्णुरित्यामनन्ति।
धत्ते संज्ञां यदीया मृड इति विषमा तामसी ध्वंसशक्तिः
नित्यः सत्यः स मूर्तित्रयमयविभवः पातु वो विश्वरूपः॥

टीका (Note)

नान्दी = नाटकादीनामादौ क्रियमाणा प्रार्थना।

पद्यम् 1. सारः—ऋषयो यस्य सर्गशक्तिं ब्रह्मा इति आहुः, सत्त्वशक्तिं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(नान्द्यन्ते प्रविशन्ति धृतकुमारिकारूपाः एककण्ठतालपदविन्यासं गायन्त्यो नद्यः ।)

संघगानम्

भुवन-पावनी — भरत-मेदिनी
विजयतां कलयतां भविकमखिल-तनुभृताम् ।
तुहिन-शैल-रजत-मुकुट-तल्लजाभिशोभिनी
नद-नदी-कदंब-धवल-हार-हृदयहारिणी (भुवन-पावनी....)
उपरि पुष्करं — नित्यभास्वरम् —
तव तनोति विरतिहीनमवनमुदितभास्करम्
मृदुल-मलय-पवन-मन्द-वीजनाद्विहर्षिणी
विवश-निखिल-जन्तु-जाल-जीवनाभिवर्षिणी । (भुवन-पावनी....)

विष्णुः इति आमनन्ति, ध्वंसशक्तिः मृड इति संज्ञां धत्ते, स विश्वरूपः वः पातु । अन्यानि विशेषणपदानि यथोचितं योजनीयानि ।

ब्रह्म + इति + आहुः + यदीयां + अविरतिं + ऋषयः । विष्णुः+ इति + आमनन्ति । आहुः = वदन्ति. यदीयां = यस्य. अविरतिं = अविरामां. आमनन्ति = मन्यन्ते. धत्तं = दधाति. विषम × सम. मृडः = शिवः. ध्वंसः = नाशः. मूर्तित्रयमयः विभवः यस्य सः सृष्टिस्थितिसंहारात्मिकाः तिस्रो मूर्तय एव तस्य वैभवं इत्यर्थः । 'मय'-प्रत्ययः 'तस्य विकारः' 'इत्यर्थे प्रयुज्यते । यथा मृन्मयं पात्रं । करुणामयी देवी ।

यदीय — 'ईय' इति प्रत्ययः षष्ठ्यर्थे पुरुषसर्वनामभिः सह प्रयुज्यते । तादृशानि पदानि विशेषणविभागे अन्तर्भवन्ति । ततः तानि विशेष्याणां (नाम्नां) लिंगवचनादिकमनुसरन्ति । मम भार्यायाः = मदीयायाः भार्यायाः । तस्याः भर्त्रे = तदीयाय भर्त्रे. अस्माकं भवनेषु = अस्मदीयेषु भवनेषु. युष्मदस्मद्-शब्दयोः एतादृशेषु रूपेषु वैविध्यमस्ति. मदीय = मामक or मामकीन युष्मदीय = यौष्माक or यौष्माकीण ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हृदय-विमलतां—स्फुटयतीव ताम्
स्फटिक-विशददीर्घिकागणस्तवेह सुमहिताम् ।
परिचरत्यनर्धविकच-सुमगणैश्च मधुरिमा-
ममल-मञ्जुलस्मितैश्च शरदनूनमधुरिमा । (भुवन-पावनी....)
जलनिधिर्भुजे—मौक्तिकीं निजे
दधदजस्रमर्चतीव तावकांघ्रिपंकजे ।
तरु-कदंब-मृग-निरन्तराद्रिविपिन-शालिनी
ऋषि-गणाभिगीत-पूत-महिम-भारभासिनी । (भुवन-पावनी...)

'पा' धातुः पानार्थे रक्षणार्थे च प्रयुज्यते । पानार्थे सार्वधातुकरूपेषु 'पिब' इत्यादेशो भवति । अयमेव विशेषः । पाति = रक्षति, पिबति = पानं करोति. पास्यति = रक्षिष्यति, पानं करिष्यति. अन्यत्रापि विशेषो दृश्यते. पात्वा = रक्षित्वा. पीत्वा पानं कृत्वा. पातः, पीताः । निपीय ।

संघगानम्—'भुवनपावनी .... तनुभृताम् ।' सारः — भारतभूमिः विजयताम् । सा अखिलजनानां शुभं विदधातु कलयतां = विदधातु, तनोतु. भविकं = शुभं तनुभृतां = (त. पु. ष. ब.) = जनानां. 'तुहिन... हारिणी'. सारः—सा हिमालयरूपेण उत्कृष्टरजतकिरीटेन नितरां शोभते । तथा नदीसमूहरूपैः शुभ्रहारैः मनोहारिणी च वर्तते । तुहिनं = हिमं. रजतं= रूप्यं तल्लज. प्रकाण्डं इत्येतौ उत्कृष्टार्थे प्रयुज्येते. मुकुटतल्लजः = उत्कृष्ट मुकुटं. पुरुषं प्रकाण्डं = उत्कृष्टः पुरुषः. नदः = जलप्रवाहः कदंबः = समूहः. धवलहारः = शुभ्रमौक्तिकमाला । 'उपरि....भास्करम् ।' सारः— सूर्योदयेन नित्यभास्वरं आकाशं तव अविरतं रक्षणं कुरुते । पुष्करं = आकाशं तनोति = करोति. विरतिहीनं = विरामरहितं. अवनं = रक्षणं. उदितः भास्करः यस्मिन् तद् । 'मृदुल....वर्षिणी' । सारः—मलयानिलस्य वीजनसुखमनुभूय सन्तुष्टा सा सफलजीविनां जीवितं जलं च वितरन्ती वर्तते । जीवनात् + विहर्षिणी । जालः = समूहः. जीवनं = जीवः जलं च. 'हृदय .... महिताम् । ' सारः—इह भारते स्फटिकस्वच्छतटाकाः तव महितं मनोनैर्मल्यं स्पष्टीकुर्वन्ति इव । इह = अत्र. दीर्घिकागणः + तव +

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(गानमन्तरा प्रविशति गंगा)

गंगा—(विलोक्यात्मगतं) अहो ! अयमत्र गानमेलावसरः । ममागमनेऽत्र विलंबः समापतितः । अथवाऽस्यां कर्मभूमौ सर्वत्रापि स्वातन्त्र्यदिनमुद्घुष्यते खलु ।

गोदावरी—(विलोक्य) अये ! ज्येष्ठा गंगा समागता ।

गंगा—वत्से, अप्यवसितो युष्माकं कार्यक्रमः ?

गोदा—नन्ववसित एव । तथाप्यस्मत्प्रतीक्षा न विफलीकृता ।

गंगा—कथमिव ?

गोदा—यतोऽन्ते सम्मिलिताऽसि ।

गंगा – अये कीदृशोऽभूदत्रत्य उत्सवः । श्रोतुमुत्सुकास्मि ।

गोदा—तर्हि शृणु ।

2 धर्मः सभापतिरभूदखिलागमज्ञः,
रंगोऽभवच्च समता जनचित्तहारी ।
स्वातन्त्र्यमुन्नमितवच्छबलां पताकां,
सत्यं तथाकुरुत भाषणमर्थगर्भम् ।

इह. दीर्घिका = तटाकः. 'परिचर...मधुरिमा' । सारः—इह उत्कृष्ट-विकसितपुष्पसमूहैः वसन्तः इमां भारतभूमिं परिचरति । अन्यूनमाधुर्यवती शरत् निर्मलमधुरमन्दहासैश्च इमां सेवते । परिचरति = सेवते. अनर्घ = उत्कृष्ट. विकच = विकसित. मधुः + इमां. मधुः = वसन्तः. शरद् + अनूनमधुरिमा = अन्यूनमाधुर्यवती. मधुरिमा = माधुर्यं. 'जलनिधिः... पंकजे ।' सारः—समुद्रः स्वहस्ते मुक्तामणीन् धृत्वा सर्वदा तावकचरणकमले अर्चतीव । निजे भुजे = स्वहस्ते. मौक्तिकीं = तरंगरूपं मुक्ताहारं. दधत् = दधानः, धरन्. अजस्रं = सदा. अंघ्रिः = चरणः. 'तरु ..भासिनी' । सारः—तरुगणैर्निबिडैरद्रिभिः मृगनिबिडैः वनैश्च राजन्ती मुनिजनगीतेन परिशुद्धमहिम्ना भासमाना च भारतमाता विजयताम् । निरन्तर = निबिड, अवकाशरहित. पूत = परिशुद्ध ।

विलंबः = delay. समापतितः = संभूतः. अपि + अवसितः. अपि = किम् ? अपि कुशलं ? = किं कुशलं ? ननु+अवसितः. कथमिव =

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गंगा—हन्त ! असुलभोऽयमवसरो नष्टः । तथापीदं वो निवेदनीयमस्ति । सन्ति युष्माकमितोऽप्यधिकानि कर्तव्यानि । मया तु प्रतिजनपदं पर्यटन्त्या बह्ववलोकितमनुभूतं च । हन्त ! भारतांबाया विचित्रोऽयमधुनातनो दशाविशेषः । तथा हि—

3. असारैर्जलधीकृते जनपदे मेघो वरीवृष्यते
देशानूष्मलितानशीतकिरणैर्दन्दह्यतेऽहस्करः ।
लक्ष्यन्ते निबिडाः परं जनपदा भूयोऽपि सान्द्रा जनैः
यन्नापेक्षितमस्ति यत्र, ननु तद् तत्रैव पुञ्जीकृतम् ॥

कथं ? अत्रत्यः = अत्र संभूतः, तत्रत्यः, कुत्रत्यः, कुतस्त्यः, आदिपद्यम् - 2. गोदावरी कार्यक्रमे संबद्धान् विशिष्टातिथीन् परिचाययति । सारः—सकलशास्त्रपारंगतः धर्मः सभायां अध्यक्षपदमलंचकार । समत्वं जनहृदयाकर्षको रंग आसीत् । स्वातन्त्र्यं वर्णशबलां पताकां उन्नमितवत् अर्थात् पताकोन्नमनकर्म स्वातन्त्र्येण कृतम् । तथा सत्येन भाषणं च कृतम् । आगमः = वेदः. उन्नमितवत् = उन्नमयति स्म. शबला = विविधवर्णयुक्ता ।

वः = युष्माकं इतोऽपि = अस्मादपि. बहु + अवलोकितं.

पद्यम्—3. आसारैः .... पुञ्जीकृतम्. सारः—भारते प्रतिग्रामं पर्यटनं कृतवती गंगा स्वानुभवं विवृणोति । यत्र प्रदेशे यद् न आवश्यकमस्ति तत्र तदेव सुलभं दृश्यते । इममाशयं आदिमपादत्रयेणोदाहरति । यो नाम ग्रामः जलधारापरैः समुद्रः संजातः तस्मिन् ग्रामे मेघः पुनरपि वर्षति । ऊष्मलितान् देशान् सूर्यः स्वैरुष्णैः किरणैः पुनरपि दहति । स्वतः सान्द्रा जनपदाः अनुदिनं जायमानैर्जनैः पुनरपि सान्द्रा दृश्यन्ते । किं बहुना ? यत्र यद् न अनपेक्षितं वर्तते तत्र तदेव पुञ्जीभवति । आसारः = धारावर्षः, वरीवृष्यते = नितरां अथवा पुनः पुनर्वर्षति. अशीतकिरणैः = उष्णरश्मिभिः. दन्दह्यते = नितरां अथवा पुनः पुनर्दहति. अहस्करः = सूर्यः, लक्ष्यन्ते = दृश्यन्ते. निबिडाः = सान्द्राः. भूयोऽपि = पुनरपि. यद् + न + अपेक्षितं तद् + तत्र + एव ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पर्णाशा—आह ! सत्यभाषिणि गंगे किमेवं भणसि ? स्वातन्त्र्य-लाभादनन्तरं अस्मद्राष्ट्रमृद्ध्या सिद्ध्या च समध्यासितमिति त्वयैवासकृत् कथितम् । किमस्मानधुना परिहससि ?

गंगा—किमयं विषयः परिहासस्य ? वत्से, यत्सत्यमस्माकं स्वातन्त्र्य-मुपलब्धम् । तथापि तदन्यूनं कर्तुमस्मिन् भारतवर्षे बहवः प्रमेयाः समाधातव्याः । पश्यास्मद्राष्ट्रस्याधुनिकीं दशाम् :—

4. भाषा-धर्म-वसु-प्रान्त-वर्णादिभिरुपाधिभिः ।
एकसूत्रोच्चितेष्वस्मास्वेकैकोपि विभाजितः ॥

एवं च स्वातन्त्र्येण विभक्तमपि विविधैरुपाधिभिर्बहुधाऽविभक्तं इमं भारत-वर्षमेकीकर्तुं शक्ताः प्रशस्ताश्च कतिचन मार्गा मार्गणीयाः । तत्रैतौ प्रमुखौ । एकस्त्वान्तरोऽन्यो बाह्यश्च । अत्राद्यो नैसर्गिकः सजातश्च यः खलु बाह्यप्रकृति-भिरयथातथीकर्तुमशक्यः । पश्य,

5. लोकायालोकदात्री जयति दिविषदां भारती भारतेऽस्मिन्
प्रायः सर्वत्र सर्वा जनततिरिह संदृश्यतेऽध्यात्मनिष्ठा ।
आचारास्ते समन्तादपगतकलुषाश्चार्षसिद्धान्तमूलाः
एकैकाभिर्विभक्तास्तनुभिरपि सदा चित्तमस्माकमेकम् ॥

भणसि = वदसि. अस्मद्राष्ट्रं + ऋद्ध्या. सिद्धिः = लाभः समध्यासितं = समधिष्ठितं त्वया + एव + असकृत् = अनेकशः, बहुवारं. यत्सत्यं = सत्यमेव. पश्य + अस्मद्राष्ट्रस्य + आधुनिकीं ।

पद्यम्—4. सारः—वयं एकसूत्रे ग्रथिता अपि भाषाधर्मप्रान्तादिभि-र्हेतुभिः परस्परं विभक्ताः । वसु = धनं. उपाधिः = धर्मः, विशेषः. एकसूत्रोच्चितेषु अस्मासु एकैकः अपि । उच्चित = ग्रथित.

प्रशस्ताः = उत्कृष्टः. मार्गणीयाः = अन्वेषणीया. नैसर्गिकः = स्वाभाविकः. अयथातथीकर्तुं = अन्यथा कर्तुं. एकः तु आन्तरः अन्यः बाह्यः च ।

पद्यम्—5. सारः—बाह्यप्रकृतिभिः अन्यथाकर्तुमशक्यं भारतस्य नैसर्गिकमैक्यं गंगा विशदयति । लोकाय प्रकाशं ददती देवभाषा अस्मिन्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयस्तु जटिलः। यद्यस्माकमखिलैः कर्मभिस्तदर्थैरेव भूयते तर्हि स लघु समाधातुं शक्यः। समृद्धमन्नं सुलभं वस्त्रं सुदृढं भवनं च एकैकस्याप्यावश्यकं; प्रायशस्तन्निष्ठैव एकता दृढा भवति।

सिप्रा—तथ्यमेव ज्येष्ठा भणति।

गोदा—अये अविरतमिवास्याः कथितव्यम् प्रतिभाति।

पर्णाशा—कथयत्वार्या।

गङ्गा—अपिच किमु न श्रुतं युष्माभिः यत् किल भारतस्यैक्ये बाधामापादयन्तः केचन भीमाकारा इह सर्वत्राहिण्डन्त इति।

6 तेषां ननु प्रमुख एव मरुर्यदाज्ञां
मूर्ध्ना वहन्त्यखिलनाशकराः करालाः।
वात्याऽतिवृष्टिरतिभीषणचक्रवात-
स्तीव्राभितापजननी मृगतृष्णिका च॥

भारते आसेतुहिमाचलं विजयते। अत्र सर्वेऽपि जनसमुदाया अध्यात्मनिष्ठा वर्तन्ते। आचारास्तु आर्षसिद्धान्ते अधिष्ठिता एव। एवं च वयं शरीरैर्विभिन्ना अपि अस्माकं हृदयं एकमेव। देवभाषा, आध्यात्मिकवीक्षणस्वभावः, आचाराः, हृदयविकाराश्च अस्माकं स्वाभाविकमैक्यं वर्धयन्ति। ईदृशमान्तरबन्धं बाह्यप्रकृतिर्निहन्तुं न शक्नोति।

आलोक = प्रकाशः. दिविषदां = देवानां. प्रायः = प्रायेण. ततिः = समूहः. अध्यात्मनिष्ठा = आध्यात्मिककार्येष्वधिष्ठिता. समन्तात् = सर्वत्र. अपगतकलुषाः = कालुष्यरहिताः. एकैकाभिः विभक्ताः तनुभिः अपि।

जटिलः = सङ्कुलः, विषमः. कर्मभिः तदर्थैः भूयते = कर्माणि तदर्थानि भवन्ति (भावे प्रयोगः) लघु = द्रुतं. तन्निष्ठाः = तेषु अधिष्ठिताः. तथ्यं = सत्यं. अये . . . . भाति = अस्या वक्तव्यं नावसितं, किञ्चिदवशिष्टमिव ज्ञायते। प्रतिभाति = ज्ञायते, seems. बाधा = विघ्नः. आपादयन्तः = कुर्वन्तः. आहिण्डन्ते = अटन्ति, सञ्चरन्ति।

पद्यम्—6. सारः— भारतस्यैक्ये बाधामुत्पादयन्तः के के वर्तन्ते इत्येतद् गङ्गा विशदीकरोति। तेषां विनाशकानां प्रमुखः मरुः। तस्याज्ञां वात्या अतिवृष्टिः चक्रवातः मरीचिका च मूर्ध्ना वहन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोदा—सत्यमेवार्यया कथितम्। अधुना त्वतिवृष्ट्या क्लिन्नाः क्लिष्टाश्च केचन पाण्ड्याः मदुपान्तेष्वटन्तो दृश्यन्ते। ते तु,

7. भाण्डैर्महाप्रमाणैः कुब्जितगात्राः सगृह्यमृगवृन्दाः।
आबालादावृद्धाद् जना वलन्ते विशीर्णजीर्णपटाः॥

सिप्रा—अस्ति च मदुपान्तप्रदेशेषु सर्वसंहारी प्रकम्पनपिता मरीचिकाजानिर्महामरुः।

स तु मत्पार्श्वभूमिमसस्यश्यामलामप्राणिसञ्चारां च कर्तुमुद्युक्त इव दृश्यते। तथा हि,

8. बाष्पप्रायास्तिग्मतिग्मांशुतप्ताः वात्याघातैर्दूरमुत्सारिताभ्राः।
ज्वालाजालैः खेचरान् खेदयन्तः संदृश्यन्ते मारवास्ते प्रदेशाः॥

गंगा—वत्से सर्वमपि मया दृग्गोचरीकृतम्। वयं तु भारतस्यैक्यतृष्णातो व्याकुलाः स्मः। इदं तु राष्ट्रं वर्णप्रान्तादिभिः शतधा विभक्तम्। तदप्येकमेतदविभक्तमस्माकं प्रतिभाति। तदैक्यस्य विघ्नमापादयन्त एते रन्ध्रप्रहारिणः सर्वेऽप्युच्चाटनीयाः।

यदाज्ञां = यस्याज्ञां. मूर्ध्ना = शिरसा. अखिलनाशकराः = सर्वसंहारकाः. करालः = भीकराः. वात्या = प्रचण्डवातः. चक्रवातः = चक्राकृत्या परिभ्रमन् वातः. मृगतृष्णिका = मरीचिका।

क्लिन्नाः = जलार्द्राः. मदुपान्तेषु = मत्परिसरेषु. अटन्तः = चरन्तः।

पद्यम्—7. सारः—गोदावरी स्वानुभवं प्रस्तौति। तस्याः तीरप्रदेशेषु पाण्ड्याः सञ्चरन्ति। तेषां शरीराणि बृहदाकारान् भाण्डान् समुह्य कुब्जितानि अर्थात् भुग्नानि (नतानि) सन्ति। ते आबालवृद्धं गृह्यमृगगणैः सह जीर्णपटानि परिधाय पर्यटन्ति।

मरीचिकाजानिः = मरीचिका जाया यस्य सः = मरीचिकाया भर्ता इत्यर्थः। जानकीजानिः = रामः. कौसल्याजानिः = दशरथः. असस्यश्यामलां अप्राणिसञ्चारां।

पद्यम्—8. सारः—सिप्रा स्वानुभवं विवृणोति। मत्परिसरेषु अत्यूष्मला मरुप्रदेशा वर्तन्ते। ते कठिनसूर्यकिरणसंतप्ताः सन्ति। चण्डवातानामाघातैः मेघान् दूरमुत्सारयन्ति। ते स्वीयज्वालाभिः खगान् तारकाश्च खेदयन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

9 यं वा मरुः स्वबलतः खलतीकरोति
तं कुर्महे स्थलममुं पुलकांकुराक्तम् ।
चण्डातिवृष्टिरपि यं जलधीकरोति
तं तन्महे लघु पिपीलिकयाऽपि गम्यम् ।।

ततः सर्वा यूयमधुना भारतस्यैकतार्थमेकतानहृदयाः साधुकृतकर्तव्या भवत ।

10 कृष्णा त्वान्ध्राननूनाधिकजलसुभगान्, नर्मदा हैहयांस्तान्,
कावेरी चोलपाण्ड्यान् कलयतु, मुरला केरलान् केरपूर्णान् ।
ब्रह्मावर्तान् शतद्रुः सरिदथ, कपिशा चोल्कान्, दण्डकान्तान्,
गोदावर्यप्यवन्तीन् समधिकविभवान् निर्मलापा च सिप्रा ।।

तिग्मः = अत्युष्णः. तिग्मांशुः = सूर्यः. दूरं उत्सारितानि अभ्राणि यैः ते । अभ्रं = मेघः. खेचरान् = गगनचारिणः. मारवाः = मरुप्रदेशसंबन्धिनः. दृग्गोचरीकृतं = दृष्टम्. ऐक्यतृष्णातः = ऐक्याभिलाषात्. तदपि = तथापि एकं + एतद्. रन्ध्रप्रहारिणः = अवसरे प्रहर्तुमुद्यताः-उच्चाटनीयाः = निष्कासनीयाः ।

पद्यम्—9. सारः—मरुः यं प्रदेशं स्वशक्त्या वृक्षलतादिरहितं करोति, तं वयं सस्यादिकान् प्ररोप्य रोमाञ्चितान् कुर्मः । तथा यं देशं अतिवृष्टिः समुद्रसदृशं करोति तं पिपीलिकाभिरपि चरितुं शक्यं तन्मः । तनोतिगणे गणचिह्नं उत्तमपुरुषे द्विबहुवचनयोः क्वचित् लुप्यते । तनुमः, तन्मः । तन्महे, तनुमहे. कृधातोस्तु नित्यं लोपः । कुर्वः कुर्वहे, कुर्मः, कुर्महे । स्वबलतः = स्वशक्त्या. खलतीकरोति = लुप्तसस्यं करोति. खलतिः = लुप्तकेशः (bald) आक्त = सहित. चण्ड = भीकर. पिपीलिका = ant. एकतार्थं = ऐक्याय. एकतानहृदयाः = एकाग्रचित्ताः. साधु कृतकर्तव्याः = सम्यक् कर्तव्यं कृतवत्यः ।

पद्यम्—10. सारः—ज्येष्ठा गंगा स्वकनिष्ठाः कृष्णानर्मदाद्याः स्वस्वकर्तव्येषु नियुंक्ते । कृष्णा अन्यूनाधिकजलदानेन आन्ध्रप्रदेशं सुभगं करोतु । नर्मदा हैहयप्रदेशं कावेरी चोलपाण्ड्यप्रदेशं च अनूनाधिकजलसुभगं करोतु । तथा मुरला केरलदेशं केरवृक्षैः समृद्धं कलयतु । अथ शतद्रुनदी ब्रह्मावर्तान्, कपिशा उत्कलान्, गोदावरी दण्डकारण्यपरिसरान् तथा निर्मलजला सिप्रा अवन्तीन् च समृद्धविभवान् करोतु ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोदा—यथाऽदिशत्यार्या ।

गङ्गा—अपि चास्मिन् कर्मणि पिता पितृव्याश्चास्मन्मार्गदर्शकाः साहाय्यं करिष्यन्ति । तथा हि,

11· रोगान् पिता ह्योषधिभी रुरुत्सुः
वात्यां च विन्ध्यस्तरुबाहुदण्डैः ।
चण्डातपं चन्द्रिकया समानं
कुर्याच्च सह्यो मलयानिलेन ।।

(एकैका नद्यः प्रतिज्ञां कुर्वन्ति ।)

12 गङ्गा—कुर्वे सर्वान् प्रदेशान् फलनिवहसमासुग्नशाखद्रुमाढ्यान्
गोदा—प्रत्याकृष्टैः प्रवाहैः परिमितसलिलान् स्वावकाशान्
विदध्याम् ।
सिप्रा—क्षेत्राण्यक्षामसस्यान्यविफलकृषकव्रातवाच्छानि चाहं,
पर्णाशा—यत्रेष्टं तत्र पाथोभरणविधिषु चाप्यप्रमत्ता भवेयम् ॥

॥ यवनिका ॥

हैहयान्+तान्. च+उत्कलान्, गोदावरी+अपि+अवन्तीन्, निर्मलाः आपः यस्याः सा=निर्मलापा. आपः=जलम्, 'अप्' शब्दः बहुवचने एव प्रयुज्यते. अस्य बहुवचनरूपाणि यथा—आपः अपः अद्भिः अद्भ्यः अद्भ्यः अपां अप्सु । आदिशति=आज्ञापयति. पितृव्याः=पितुः भ्रातरः ।

पद्यम्—11· सारः—कथं पिता पितृव्याश्च साहाय्यं करिष्यन्तीति विव्रियते । पिता हिमालयः ओषधिभिः रोगान् रोद्धुमिच्छति । विन्ध्यः उन्नतैः तरुबाहुभिः चण्डवातं रुन्धन् वर्तते । सह्यस्तु मलयानिलेन चण्डातपं चन्द्रिकया समानं च कुर्यात् । ओषधिभिः+रुरुत्सुः=ओषधिभी रुरुत्सुः । क्वचित् रेफात् पूर्वो विसर्गो लुप्यते । तत् पूर्वः स्वरः दीर्घो भवति च । हरिः+रमते=हरी रमते,

पद्यम्—12· सारः—अहमिदं करोमि, अहमिदं करोमि इति प्रतिज्ञां सर्वाः कुर्वन्ति । गंगा प्रतिजानीते—अहं मत्परिसरेषु वृक्षान् फलभरनम्रान् करिष्यामि । गोदावरी - अहं स्वकीयेष्ववकाशेषु अतिवेगं जलप्रवहं प्रति-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निवर्त्य सलिलव्याप्तिं परिमितां करिष्ये । सिप्रा—अहं क्षेत्रेषु सस्यानि संवर्ध्य कर्षकाणां अभिलाषान् सफलान् कुर्याम् । पर्णाशा—अहं आवश्यकेषु स्थलेषु जलसंभरणे दत्तावधाना च भवेयम् ।

फलानां निवहैः समाभुग्नाभिः शाखाभिः सहितैः द्रुमैः आढ्यान् । समाभुग्नः = आकुञ्चितः, आनम्रः. आढ्य = युक्त. प्रत्याकृष्ट = प्रतिनिवर्तित. परिमितं सलिलं येषु तान्. क्षेत्राणि + अक्षामसस्यानि + अविकल . . . . । अक्षामाणि सस्यानि येषु तानि. अक्षाम = अक्षीण. व्रातः = समूहः. वाञ्छा = आग्रहः. अविकलाः कृषकव्रातवाञ्छाः येषु तानि. पाथस् जलं. च + अपि + अप्रमत्ता = प्रमादरहिता ।

प्रथमोऽङ्कः

।। अभ्यासः ।।

1) अद्यपठितं एकभारतप्रथमाङ्कमनुवदत (Translate).

2) प्रथमाङ्कस्य कथासारं संस्कृतभाषायां संक्षिप्य लिखत ।

3) कमपि विषयमधिकृत्य पुत्रेण सह मात्रा कृतं संवादं स्वभानानुसरं संस्कृतभाषायां लिखत ।

4) अधोनिर्दिष्टानां पद्यानां अन्वयं लिखतः—

1) ब्रह्मेत्याद्य . . .   2) आसारैर्जलश्री . . . ।

3) लोकायालोकदात्री . . . ।

5) प्रथमद्वितीयपाठयोः पुनरावर्तनं (Revision) कृत्वा पठितपूर्वाः विषयाः स्थिरीक्रियन्ताम् ।

6) अधोदत्तस्य पद्यस्य अन्वयमर्थं च लिखत—

[क्रिस्तोः पश्चात् सप्तमे शतके वर्तमानः कश्चिन्महाकविरासीद् भवभूतिः । स स्वरचितेषु नाटकेषु नवनवकल्पनातत्पर आसीत् । अतः स परम्परापथविरसानामन्येषां शुष्कपण्डितानां कवीनां च अवज्ञाया अवगणनायाश्च पात्रमभूत । ईदृशानां निन्दाशतानां शरव्यं भूत्वापि स आत्मधैर्यं (confidence) न विजहाति । (शरव्यं = लक्ष्यं. विजहाति = त्यजति)]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्ति ते किमपि, तान् प्रति नैष यत्नः ।
उत्पत्स्यते च मम कोपि समानधर्मा,
कालो ह्ययं निरवधिर्विपुला च पृथ्वी ॥

इह = अत्र, अस्मिन् लोके. प्रथयन्ति = प्रसारयन्ति. अवज्ञा = निन्दा. किमपि = किञ्चित् 'something'. न + एषः उत्पत्स्यते + जनिष्यते. समानधर्मा = तुल्यगुणः. समानः धर्मः यस्य सः. बहुव्रीहिसमासे अन्तिमो धर्मशब्दो नकारान्तो भवति । हि + अयं । विपुला = विशाला । पृथ्वी = भूमिः ।

—o—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वात्रिंशो दिवसः

एकभारते द्वितीयोऽङ्कः

(ततः प्रविशति रोषारुणाक्ष उच्चैस्तरमारटन् मरुः)

मरुः—क इमे पाटच्चराः। कस्तेषां विक्रमः। सर्वेऽप्येकीभूताः भारतवर्षाद् मां उत्सारयितुमुत्सहन्ते। (किञ्चिद्विचिन्त्य) अस्ति मे मरीचिका महिषी। सा तु सर्वानपि वशीकर्तुं प्रभवति। (नेपथ्याभिमुखमवलोक्य) अयि, मरीचिके, क्वासि प्रेयसि? अरी मत्प्राणाधिके सर्वचराचरप्रतारण-निपुणे आयाह्यायाहि। त्वां प्रतीक्षमाणस्य मे क्षणाः वत्सरीभूताः। (कर्णं दत्त्वा) किं कथितम्? "वत्सः प्रकम्पनः सुदूरं गत" इति? तर्हि स आयातु। तावत् स्वकलायामेव व्यापृता वर्तस्व। (परिक्रम्य पुनरपि कर्णं दत्त्वा) आः मत्प्रियसखः महारोग आयतीव। अयं कांस्यतालसदृशस्वनं कासमाम्रेडमानः शंखशकलसदृक्षं श्लेष्मनिष्ठीवमुदगिरमाणः भल्लातफलसंकाशैः स्फोटकदंबैः पूयशोणितस्रोतोभिः अनन्तरशरीरान्तरः श्वासधारा - विस्फारित - पार्श्वास्थिबन्धो महारोग इत एवागच्छति।

(यथानिर्दिष्टवेषः महारोगः प्रविशति।)

॥ द्वितीयोऽङ्कः ॥

रोषारुणाक्षः = रोषेण अरुणे अक्षिणी यस्य सः, कोपरक्तनयनः। अक्षिशब्दः = बहुव्रीहौ अकारान्तो भवति। आरटन् = गर्जन्. के + इमे. पाटच्चराः। चोराः। उत्सारयितुं = निष्कासयितुं. प्रभवति = शक्नोति. नेपथ्यं = Green room. क्व + असि. प्रतारणं = वञ्चना. आयाहि + आयाहि = आगच्छ. कर्णं दत्त्वा = दूरात् मरीचिकायाः शब्दः श्रूयते इति नटित्वा. स्वकला = परवञ्चनकला. आयाति + इव. कांस्यतालः = a drum made of brass. स्वनः = शब्दः. कासः = cough. आम्रेडमानः = आवर्तमानः. सदृक्षं = सदृशं. श्लेष्मा = कफः. निष्ठीवः = spittle. श्लेष्मन् + निष्ठीवः = श्लेष्मनिष्ठीवः। समासे पूर्वपदानां अन्तिमो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मरुः—(उपसृत्य) अहो नु खलु भोः कासीः प्रियसख ! कस्को वार्ता-विशेषः । आयाह्यास्यताम् ! (इति हस्तसङ्केतं करोति)

महारोगः—(आसीनः) प्रभो, अयमत्रभवते सप्रश्रयः प्रणामः । अत्रभवतः कृपया यच्चिन्त्यते तत्तथैव प्रायशः साधितं भवति । तथा हि—

13 मद्रेष्वद्य विषूचिका विसृमरा जागर्ति, कर्णाटके-
षूत्सृष्टाः कठिनार्बुदा, नयनरुग्जालानि चावन्तिषु ।
काश्मीरेषु विषज्वरा विदधते सांहारिकं ताण्डवं
यं देशं प्रविशामि सोऽतिकरुणं व्याक्रोशतीवानिशम् ।

अपि च—

नकारो लुप्यते. यथा—राजन् + पुरुषः = राजपुरुषः । व्यञ्जनप्रत्ययविषयेऽपि नलोपो भवति. यथा—महात्मन् + भिः महात्मभिः. धनिन् + सु = धनिषु. उद्गिरमाणः = उद्गमन्. + भल्लातकं = marking nut. संकाश = सदृश. स्फोटः = व्रणं पूयं = pus. शोणितं = रक्तं स्रोतस् = प्रवाहः. अनन्तरशरीरान्तरः = व्याप्तशरीरः. श्वास . . . . वन्वः यस्य श्वासोच्छ्वासमये पार्श्वास्थीति विकसन्ति सङ्कुचन्ति च सः । विस्फारित = विकसित. उपसृत्य = समीपं गत्वा. अहो नु खलु भोः = आश्चर्यादिविकाराधिक्यद्योतनार्थं एतानि निपातानि एकीकृत्य प्रयुज्यन्ते । क + आसीः. कः + कः कस्कः विस्मयातिविकाराणामाधिक्ये किंशब्दस्थविसर्गस्य सकारादेशोऽत्र विशेषः । कुतः + कुतः = कुतस्कुतः. आयाहि + आस्यताम्. हस्तसङ्केतं करोति = हस्तेन सूचयति. 'अत्रभवान्', 'तत्रभवान्' इत्यादरातिशयार्थं प्रयुज्यते. भवान् इत्यर्थः । सप्रश्रयः = सविनयः ।

पद्यम्—13. सारः—महारोगः स्वविजयवार्तां निवेदयति । मद्रराज्ये विषूचिका व्याप्ता वर्तते । कर्णाटकेषु कठिनार्बुदाः प्रसारिताः । अवन्तिषु नेत्ररोगाश्च विसृष्टाः । कश्मीरेषु विषज्वराः संहारताण्डवं तन्वन्ति । अहं यत्र गच्छामि स देशः अतिदीनं रोदितीव अर्थात् क्रन्दति इति मन्ये ।

विसृमरा = व्यापिनी. जागर्ति = सोल्लासं वर्तते, जागरूका वर्तते । उत्सृष्टाः = विसृष्टाः. रुग्जालानि = रोगसमूहाः. व्याक्रोशति = रोदिति. अनिशं = सदा. वि + सृ + मर. शतृ, शानच्, तृच्, प्रत्ययानां स्थाने

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

14 भर्ता पश्यति नो प्रियामभिमुखं कोठाङ्कुरैर्दूषितां
पत्नी नैव तथा पतिं गणयति प्रक्षुब्धयक्ष्मामयम् ।
बालव्याधिहतान् स्तनंधयशिशून् रात्रिंदिवंक्रोशतः
शप्त्वा स्थण्डिलके क्षिपन्ति विकलाः पामातुरा मातरः ॥

मरुः—सखे विध्वंसकात्मकस्य भगवतः कृपया सर्वमप्यस्मत् कुशलायैव । कुतः ।

15 दुर्भिक्षमस्ति मदभीष्टनिदेशकारि
वामा चकास्ति निपुणा च मरीचिका मे ।
आज्ञाकरोऽस्ति सविधेऽखिल भूतचक्र-
विभ्रामणेऽतिनिपुणो मम चक्रवातः ॥

अपि चैतन्मे महद्भागधेयं; यदत्र,

अर्थात् वर्तमानाङ्गक्रियार्थे अधोनिर्दिष्टाः प्रत्यया अपि प्रयुज्यन्ते । 1) अक, निन्द्—निन्दक=निन्दत्. हिंसक, क्षेपक, लेखक आस्वादक आदयः । 2) अन, चल्—चलन=चलत्. कम्पन=कम्पमान. कोपन, कौसल्यानन्द-वर्धनः । 3) उक, पत्—पातुक=पतत्. भावुक, कामुक । 4) मर, सृ—सृमर=सरत्. अद्मर घस्मर । 5) वर, जि—जित्वर=जयत्. पीवर, स्थावर । 6) उर, विद्—विदुर=विदत्. भासुर, बन्धुर । 7) र, दीप्—दीप्र=दीप्यमान. कम्र, कम्प्र । 8) आलु, स्पृह्—स्पृहयालु=स्पृहयत्. दयालु, निद्रालु । 9) इष्णु, वृध्—वर्धिष्णु=वर्धमान. सहिष्णु, उत्पतिष्णु ।

पद्यम्—14. सारः—रोगाः तत्र तत्र जाग्रतीति कथितं । (जागर्ति जागृतः जाग्रति) अपि च तत्रत्यानां जनानां भार्याभर्तृपुत्रादिबन्धमपि छेत्तुमहं प्राभवमिति वर्ण्यते । कुष्ठादित्वग्रोगदूषितां प्रियां भर्ता अभिमुखं न पश्यति । क्वचित् पत्नी क्षयबाधापीडितं स्वभर्तारं नैव वीक्षते च । इतरत्र तु पामा-तुरा मातरः विवशाः सत्यः बालव्याधिपीडनेन दिवानिशं क्रन्दतः शिशून् अङ्कात् उद्धृत्य निर्दयं भूतले विक्षिपन्ति ।

कोठः = कुष्ठं. यक्ष्मा = क्षयरोगः. व्याधिहतान् = रोगपीडितान् । स्तनन्धयः = स्तनं पिबन्. रात्रिन्दिवं = अहोरात्र. विकलाः = विवशाः । पामन्=scab विध्वंसकात्मकः = नाशात्मकः. सर्वं + अपि + अस्मत्+ कुशलाय+एव ।

पद्यम्—15. सारः—स्वकृत्यनिर्वहणे मम बान्धवाः सुहृदश्च सर्वथा साहाय्यं कुर्युरिति मरुः स्वयमाश्वसिति. मदभीष्टनिर्वहणे तत्पर दुर्भिक्षं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

16 साहाय्यं कुरुते सर्वरोगाणमाकरो भवान् ।
नैराश्येऽपजये क्लेशे तेजोहानावनाकुलम् ।

महारोगः—तथापि प्रभो, क्वचन मे बाधाश्च संभवन्ति ।

मरुः—कीदृशी तव बाधा ?

महारोगः—यत्राहं रोगाणां बीजमावपामि तत्र तदपोहनैकतानाः काश्चन महौषधयः कृतसन्निधानाः दृश्यन्ते ।

मरुः—का नाम ताः ? कुत एतत् ? कथमेतत् ?

महाः—तदेव ममाप्यद्भुतमादधाति । तास्तु काश्चन मूलैः काश्चन फलैः काश्चन पत्रैः कुसुमैश्च तान् परिचरन्ति । मयोप्तानि कोटिशो बीजानि तत्क्षण एव नश्यन्ति । तथाहि—

17 लुठन्ति ये परिगतयातनाकुलाः
क्षमातले विलपनमन्दजल्पनाः ।
महौषधैः परिचरितास्त्वनुत्तमैः
भवन्ति ते सुखमसृणाः क्षणान्तरे ॥

मदन्तिके वर्तते । वञ्चनानिपुणा मरीचिका मे पत्नी सर्वथा मम स्वाधीनास्ति । सर्वचराचराणां चक्रभ्रमणकर्मणि अतिनिपुणः चक्रवातो ममाज्ञानुवर्ती च विराजते ।

मदभीष्टं=मम अभीष्टं. युष्मदस्मच्छब्दयोः समासे एकवचनस्य 'त्वत्' 'मत्' इत्यादेशो भवति, तव गृहं=त्वद्गृहं. मम पिता=मत्पिता. निदेशः= आज्ञा. चकास्ति=शोभते. सविधे=समीपे. अपि+च+एतत्+मे ।

पद्यम्—16 सारः—यत्र यत्र पराजयो भवति तत्र तत्र महारोगः मरोः सहायो भवतीति कथ्यते । आकरः=निधानं. सर्वरोगाणामाकरः भवान् नैराश्ये, अपजये, क्लेशे, तेजोहानौ अनाकुलं साहाय्यं कुरुते ।

तदपोहनैकतानाः=तेषां अपोहने दूरीकरणे बद्धश्रद्धाः. वप्+त= उप्त sown. कृतसन्निधानाः=सन्निहिताः ।

पद्यम् 17 सारः—ये नाम मदाक्रमणेन पीडिताः ते फलमूलादीनां परिचरणेन क्षणादेव सुखं प्राप्नुवन्ति । सर्वाङ्गेषु व्याप्तया कठिनवेदनया

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मरुः—अहो नु खलु भोः कास्ताः क्षुद्रौषधयोऽस्मत्प्रतिद्वन्द्विन्यः। यदि सन्ति तादृश्यस्तर्हि ता अपि शोषयितुं अस्मत्कलत्रं अलंभवति। अथवा, अस्ति मे वत्सः प्रकम्पनः। स ताः उन्मूलयिष्यति। (नेपथ्याभिमुखमवलोक्य) अरी सुन्दरि, सर्वाकर्षिणि सकलापकर्षिणि चञ्चलस्वभाविनि कुत्रासि त्वं महामाये। आयाह्यायाहि। (दूरत आयान्तीं मरीचिकां दृष्ट्वा)

18 नृत्यन्ती सा रोदसोरन्तराले
तृष्णामुष्णोत्तापिनीं वर्धयन्ती।
आयात्यस्मत्प्रेयसी साधुशीला
वत्सस्योन्नद्धांसके न्यस्तहस्ता॥

(ततः प्रविशति वत्सप्रकम्पनेन सह मरीचिका)

मरीचिका – (उपसृत्य) जयतु जयत्वार्यपुत्रः।

विवशा ये जनाः विलप्य विलप्य मन्दीभूतभाषणशक्तयः भूतले लुठन्ति अर्थात् इतस्ततः परिवर्तनं कुर्वते ते एव अनुत्तमैः महौषधैः परिचरिताः क्षणान्तरे एव सुखस्निग्धा भवन्ति। परिचरिताः + त + अनुत्तमैः = अत्युत्कृष्टैः अस्मादुत्तमं न किञ्चिदस्तीति. लुठन्ति = परिवर्तनं कुर्वन्ति (roll) परिगत = सर्वाङ्गेषु व्याप्त.

क्षुद्र = निस्सार. तादृश्यः + तर्हि. कलत्र = भार्या. मित्रकलत्रशब्दौ नपुंसके एव प्रयुज्येते. अलंभवति = शक्नोति. अपकर्षिणी = नाशिनी।

पद्यम्—18 सारः—मरुः दूरादायान्तीं मरीचिकां वर्णयति। अहो! अस्मत्प्रेयसी आयाति। कथम्? आकाशस्य भूमेश्च अन्तराले नृत्यन्ती उष्णेन अन्तर्बहिश्च तृष्णां वर्धयन्ती वत्सस्य प्रकम्पनस्य उन्नते अंसे हस्तं विन्यस्य सा साधुशीला मत्प्रेयसी मां आयाति।

रोदसोः = द्यावापृथिव्योः भूमेराकाशस्य चान्तराले. उन्नद्धांसके = उन्नतस्कन्धे. अंसः = shoulder. न्यस्तहस्ता = न्यस्तः हस्तः यया सा, हस्तं न्यस्तवती. न्यस्त = अर्पित. उपसृत्य = समीपं गत्वा. विक्रियाविशेषः = कर्माणि. समुन्मीलिताः = समुन्मिषिताः। नयनगोचरीभूतः = नयनयोर्गोचरोऽभवत्, दृष्टः। गोचरः = विषयः। मंक्षु = द्रुतं. जर्जरितः =

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मरुः—अहो नु खलु भोः, आगतास्माकं प्रेयसी! अयमस्माकं वत्सः प्रकम्पनः। आयाहि वत्स आयाहि। अङ्कं उपविश। अद्य किं किमद्भुतं कर्म कृतम्?

मरीचिका—कथमेतत्कथनीयम्? कियन्तस्तस्य विक्रियाविशेषाः। शैशवसाधारणैः चापलैस्समुन्मीलितास्ते द्रष्टॄणां कौतुकमादधति।

मरुः—प्रिये वत्सः कथयतु।

प्रकम्पनः तात, अद्याहं बहुदूरं गतः। मध्येमार्गं कश्चन कोलाहलाकलितो ग्रामो नयनगोचरीभूतः। स मया मंक्षु जर्जरितः। बहवोऽर्भकाः जरठाश्च गृहभित्तिकानामन्तः प्रविष्टाश्च। अहो कियान् श्रवणमधुरोऽसावार्तनादः। कियदाकर्षकं तदुदग्राट्टालकनिकर - विपाटन - कटकटायमानमारटितम्। अहं तु क्वचन नृत्यन् कुहचनाट्टहासं कुर्वन् कुत्रचिन्निरन्तरं निघ्नन् हन्त! तात कीदृशी तदाऽसीत् सा मम जैत्रयात्रा!

मरुः—सुष्ठु कृतं वत्स। एवं सर्वघातुकः सन् चिरं जीव।

मरीः—ततोऽपि कथय वत्स किं किं संवृत्तमिति।

प्रकः—अथ च श्रूयतां तात! ततो मया मध्येमार्गं काचन सवयाः कुमारिका दृष्टा। नाम्ना साऽतिवृष्टिरिति प्रथिता। हन्त! कीदृशं तस्या रूपसौभगम्। सा त्वकस्मादेव—

19 उच्चावचोद्भट-तटित्-प्रकटाट्टहासा
मत्तद्विपेन्द्रकरसन्निभतीव्रधारा।
उत्कर्दमाऽन्धतमसीकृतचक्रवाला
चित्तं जहार कबलीकृतभानुबिंबा॥

भग्नः। अर्भकाः = शिशवः। जरठाः = वृद्धाः। प्रविष्टाः = मृदिताः। उदग्र = उन्नत अट्टालका = सौधं. निकरः = समूहः। विपाटनं = ध्वंसनं कटकटायमानं = कटकटेति शब्दायमानं, आरटितं = शब्दः। उन्नतसौधानां ध्वंसनेन जातः कटकटशब्दः। क्वचन = कुत्रचित्, निघ्नन् = प्रहरन्। सुष्ठु = सम्यक्, घातुकः = नाशकः। सवयाः (स. स्त्री. प्र, ए.) समानवयस्का, नाम्ना अतिवृष्टिः इति प्रथिता = अतिवृष्टिरिति नाम. राजा दशरथो नाम्ना or नाम्ना दशरथो राजा = दशरथो नामा राजा. तु + अकस्मात् = यदृच्छया।

पद्यम्—19 सारः—सा अतिवृष्टिः मम हृदयमाचकर्षेति संक्षेपः। कथं? क्रमरहितैः उज्ज्वलैर्विद्युद्भिः प्रकटमट्टहासं कुर्वती, मत्तगजकरप्रमाणां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततश्च तात अहं तु तया सहेतस्ततो विक्रीडन् बहुषु जनपदेषु क्षणमात्रेण व्यचरम्। यन्मयोत्पाटितं तद् न चिरादेव साऽप्लावयत्। समग्राणि क्षेत्राणि सपरिच्छदानि गृहाणि युगपदेव प्रणष्टानि। निरन्तं निरालंबं निराशं च सर्वत्रापि मानुष्यकमदृश्यत। हा हन्त। तात किं जानाति, कियद्वा मे मनसश्चारितार्थ्यम्?

मरुः—वत्स! चिरंजीव। पितृहितानुवर्ती वर्तस्व। (मरीचिकां प्रति) अयि चण्डिके अद्यावामरिभिरप्यनतिक्रमणीयस्यातिथेयौ संवृत्तौ। तं कैश्चन पदविन्यासैर्गानालापैश्च रमय। वत्स! प्रकम्पन त्वमपि मातुर्द्वितीयो भुव।

मरीः—(वत्सं हस्ते गृहीत्वा नृत्यन्ती)
धिंधिमिद्धिमि धिंधिमिद्धिमि धिंधिमिद्धिमिधैः।

जलधारां वर्षन्ती, सर्वत्र पङ्कमुत्पादयन्ती, दिगन्तरालं अन्धतमसावृतं तन्वती, सूर्यबिंबं कबलीकृत्य अभिमुखमायान्ती सा अतिवृष्टिः मम चित्तमाचकर्ष।

उच्चावच=विषम, क्रमरहित, मत्तद्विपेन्द्रः=मत्तगजः। सन्निभ=सदृश, कर्दमः=पङ्कः। उत्कर्दमा=पङ्कमुत्किरन्ती. अन्ध...वाला=चक्रवालं अन्धतमसं कृतवती। भानुबिंबं कबलीकृतवती। सह+इतस्ततः। उत्पाटितं=जर्जरितं, नचिरात्=झटिति, अप्लावयत्=प्रवाहयति स्म। मातुः द्वितीयः=मातुः सहायः।

पूयशोणित इत्यादिगानस्य सारः—इदं जगत्त्रयं पूयैः रक्तैश्च दुर्गन्धि भवतु। सर्वेषामपि जनानां दन्ताः पतन्तु। सर्वेऽपि खलतयः पलिताः जर्जराश्च भवन्तु। सर्वत्र पिटकाः कासाः पीनसाश्च विलसन्तु। पूयः=pus. पूतिगन्धि=दुर्गन्धि, नितान्तं=नितरां. च्युतिः=भंगः। आक्रुष्टा=क्रोधात् गर्जन्ती, गलित=स्रस्त, पतित. दशनः=दन्तः। मुखशतं=बहूनि मुखानि. खलतिः=bald. पलितः=शुभ्रकेशः। भान्तु=लसन्तु. पिटकः=ulcer. कासः=cough. पीनसः=catarch. cold. दग्धं=(दह्+त) भस्मीभूतं दुर्भिक्षं इव आयाति. इतोमुखं=अस्मदभिमुखं. दर्शनीया एव अस्य आकृतिः। दुर्भिक्षं=दारिद्र्यं; मरोः सखा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकम्पनः — (भ्रष्टताललयं गायन् नृत्यंश्च)

(धिंधिमिद्धिमि धिंधिमिद्धिमिधैः ।)

मरीचिका — पूय शोणित पूतिगन्धि नितान्तमस्तु जगत्त्रयम् ।

प्रकम्पनः — (तदेव पठन् नृत्यति)

मरीचिका — (क्वचित् क्वचित् पादविन्यसनतालादीनां च्युतेराकुष्टा वत्स तर्जयन्ती)

गलितदशनमुखशतमथ खलतिपलितजर्जरम् ।

प्रकम्पनः — (तदेव पठन् नृत्यति)

मरीचिका — भवतु, भान्तु सर्वतोऽपि पिटककासपीनसाः ।

प्रकम्पनः — (तदेव पठन् नृत्यति)

द्वावपि — धिंधिमिद्धिमि . . . . धैः ।

(नेपथ्ये) अहो ! सर्वमपि दग्धं विदग्धम् ।

मरु — (कर्णं दत्वा) अये कस्यायं स्वरविशेषः । दुर्भिक्षमित्रायाति ।

(नेपथ्ये) अहो सर्वमपि नष्टं प्रणष्टम् ।

महारोगः — अस्मदनुकूलमिव निवेदनम् ।

प्रकम्पनः — (प्रविश्य) तात मातुलो दुर्भिक्षमितोमुखमेवायाति ।

मरु — आयातु वत्स आयातु । आशास्महे तस्मै पूर्णविजयम् ।

(उपसरद् दुर्भिक्षं दृष्ट्वा) अहो नु खलु भोः दर्शनीयैवास्याकृतिः । यतः,

20 जीर्णैः शीर्णविवर्णवस्त्रशकलैराच्छादिता नग्नता
उन्नभ्रास्थिनि गण्डके परिगतास्ते केशकूर्चाः खराः ।
स्वेदासारकपूतिगन्धि च वपुः क्षीणं च साकल्यतो
भो दुर्भिक्ष परं व्यनक्ति विजयोदन्तांस्तवैवाकृतिः ॥

पद्यम् — 20 सारः — दुर्भिक्षमभिसंबोध्य मरुर्वक्ति । हे दुर्भिक्ष, तवाकृतिरेव विजयवार्तां स्पष्टीकरोति । कथमित्युदाहरति — दुर्भिक्षस्य नग्नता जीर्णैः शीर्णैर्विवर्णैश्च वस्त्रखण्डैः आवृता वर्तते । गण्डयोः द्वे अस्थिनी उन्नते दृश्येते । तादृशयोः गण्डस्थलयोः परुषाः जटिलाश्च केशाः प्रसृता दृश्यन्ते । स्वेदप्रवाहेण क्षीणमार्द्रं च शरीरं दुर्गन्धं वमति । अतः हे दुर्भिक्ष तव आकृतिरेव विजयवार्तां स्पष्टीकरोति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुर्भिक्षम्—(उपसृत्य हस्तौ प्रसार्य) विजितम् प्रभो विजितम् ।

मरुः—किं नाम विजितम् ?

दुर्भिक्षम्—फलितम् प्रभो फलितम् ।

मरुः—किं नाम फलितं, भण । किं ते शीर्षपिण्डम् ?

दुर्भिक्षम्—श्रूयताम् । अहमितो गत्वा मध्येमार्गं हत्यामाकारितवान् । सां तु सहसैव,

21 विसारि-रसनारुण-क्रकच-दारुणा, दंष्ट्रिका-
परस्पर-विघर्षण-स्फुरित-तीव्र-दावानला ।
कराञ्चलविघट्टनैः स्तनितमुग्रमातन्वती
विशंकटकलेवरा धृतरसाऽभ्ययान्निर्भया ॥

मरुः—अहो नु खलु भोः, निपुणः खल्वसि । ततस्ततः ?

दुर्भिक्षम्—ततस्तया सह गतवता प्रतिजनपदं मया विक्रीडतम् । यो मयाऽर्धप्राणीकृतः स तया गतप्राणीकृतः । केचन हताः केचन सपरिवारं पलायिताश्च । किं बहुना ।

शीर्ण = जर्जर. उन्नम्र = उन्नत. गण्डके = कपोले । परिगताः = व्याप्ताः । कूर्चः = जटा. खराः = परुषाः । आसारकः = प्रवाहः । वपुः = गात्रं. साकल्यतः = सर्वतः । व्यनक्ति = व्यक्तीकरोति. विजयोदन्तान् + तव + एव + आकृतिः । प्रसार्य = वितत्य After stretching. आकारितवान् = आहूतवान् , आह्वानं कृतवान् , शब्दापयामास ।

पद्यम्—21 सारः—भयङ्कराकारिणी सा हत्या मम समीपमागतवती इति संक्षेपः । कथम् ? बहिःप्रसृतया क्रकचसदृश्या रक्तवर्णया जिह्वया अतिभीषणा, दंष्ट्रयोः परस्परघर्षणेन दावानलमुद्दीपयन्ती करतलयोः संघट्टनेन कठोरं मेघनिर्घोषमुत्पादयन्ती अत्युग्रस्वरूपिणी सा हत्या निर्भया सती मां सरसमभ्यागच्छत् ।

विसारिरसना = विशालजिह्वा. क्रकच = saw. दारुणा = भीषणा. दंष्ट्रिकयोः परस्परविघर्षणेन स्फुरितः तीव्रदावानलः यया सा । दावानलः =

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

22 प्रायो निर्वसनीकृताखिलजनाः निर्दग्धकेदारकाः
अन्नालाभरुजार्तनादविकलप्राणोत्तपद्दारकाः ।
निष्प्राणीकृत-गोत्रजा निरुदकप्रोच्छुष्क-कूपान्तराः
वन्ध्यीभूत-विनष्ट-सस्यविभवाः ग्रामाः सरूपान्तराः ॥

मरुः—सखे सुष्ठु कृतं त्वयापि । सर्वसंहारकः सन् चिरं जीव । सर्वतोमुखविजया वयं प्रवर्धामहे । तथापि सर्वे सावधानाः भवन्तु । भारतवर्षमिमं समृद्धं कर्तुं यतमानाः केचनात्र सन्दृश्यन्ते । अस्ति कश्चिद्धिमालयो यः खलु महौषधीभिर्महारोगं उच्चाटयन् वर्तते । तस्यास्ति काचिद्दुहिता गंगा नाम या जलसंभरणादिभिः मत्पदाक्रमणायोत्सहते । एवं तस्य कनिष्ठाश्च वर्तन्ते, विन्ध्यसह्यादयः । तेषां च सन्ति दुहितरः गोदावर्यादयः । सर्वेऽपि ते अस्मदुन्मूलने रन्ध्रान्वेषिणो वर्तन्ते । यद्यस्माकमायोजनासु किञ्चनापि स्खलितं, तर्हि पुनरस्मद्गन्धोपि नावशिष्टः स्यात् । ततः सखायः सावधानाः भवन्तु ।

वन्यवह्निः । स्तनितं = मेघगर्जनं. उग्रं = कठिनं आतन्वती = तन्वाना, उत्पादयन्ती. विशङ्कटकलेबरा = भीषणगात्री. धृतरसा + अभ्ययात् = निर्भया. अभि + अ + या + त्. पलायिता = धाविता. किं बहुना = बहुना वर्णनेन किं प्रयोजनं, अतः संक्षिप्य कथ्यते इत्याशयः ।

पद्यम्—22 सारः—मम हत्यायाश्च साहसिकविनोदेन सर्वेऽपि ग्रामा रूपान्तरं प्राप्ताः । कथमेतत् संभूतम् ? ग्रामेषु प्रायशः सर्वेऽपि जना वस्त्ररहिताः कृताः । क्षेत्राणि भस्मीकृतानि । सर्वत्र शिशवः अन्नं अलब्ध्वा सञ्जातया रुजया सार्तनादं क्रन्दित्वा विवशाश्च वर्तन्ते । गोत्रजाः प्राणरहिताः कृताः । कूपा जलशून्याः शुष्काश्च कृताः । सस्यसम्पदो विफलाः विनष्टाश्च जाताः; एवंरीत्या पूर्वं सम्पन्नाः समृद्धाश्च ग्रामा अधुना रूपान्तरं गता दृश्यन्ते ।

निर्वसनीकृताः अखिलजनाः येषु ते (ग्रामाः) एवं अन्यत्रापि बहुव्रीहिसमासः । निर्वसनः = वस्त्ररहितः । केदारः क्षेत्रं. अन्न - अलाभरुजा आर्तनाद - विकलप्राण - उत्तपद् - दारकाः । रुजा = दुःखं, दारकाः = शिशवः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

23 यस्मिन् रुजो नरगणान् परिमथ्नतेऽथ
वात्या च यं भ्रमणतो विषमीकरोति।
कालानलो दहति यं कटुयातनाभि-
राक्रंस्यते स विषयो मरुणा तदैव॥

(पुत्रमालिङ्ग्य) वत्स प्रकम्पन, त्वं गच्छ। वृष्ट्या दावानलेन च सह प्रतिजनपदमटन् पितुस्साम्राज्यं विशालं कुरु। महारोग! त्वमपि दुर्भिक्ष-द्वितीयो भूत्वा स्वकृत्यं अविलुप्तं कुरु। अये, प्रेयसि मरीचिके, त्वं सर्वेषामपि भ्रान्तिमापादयन्ती मद्रुपान्त एव वर्तस्व।

गोव्रजः = गोकुलं. निरुदक = निर्जल. प्र उद् शुष्क = प्रोच्छुष्क। वन्ध्यीभूत = विफलीभूत. सरूपान्तराः = रूपान्तरं प्राप्ताः। समासे पूर्व-पूर्वपदानां प्रत्ययाः तथा अन्तरान्तरा पदानि च लुप्यन्ते इत्यस्य अत्रत्यानि समस्तपदान्युदाहरणानि भवन्ति। यथा-अन्नस्य अलाभेन जातया रुजया संभूतेन आर्तनादेन विकलप्राणा उत्पन्नाः च दारकाः; येषु ते = अन्नालाभ.... दारकाः। अत्र जात - उद्भूत इत्यादिपदानि समस्तदशायां न दृश्यन्ते। रन्ध्रान्वेषिणः = अवकाशं मार्गयमाणाः। स्खलितं = प्रमादः।

पद्यम्—23 सारः—यत्र प्रदेशे अस्माकं जनाः पदं कुर्वन्ति तत्र तत्र ममापि सान्निध्यं नियतमेव स्यात् इति मरुः प्रतिज्ञां करोति। मरुणा स प्रदेश आक्रंस्यते। कीदृशः प्रदेशः? तद् विव्रियते। यस्मिन् प्रदेशे रोगाः नरगणानां मथनं कुर्वते, चण्डवातः भ्रमणं कृत्वा यं प्रदेश सङ्कुलं करोति। प्रलयाग्निसदृशः चण्डातपो यं प्रदेशं कठिनयातनाभिर्दहति स प्रदेशो मरुणा आक्रंस्यते।

रुजः = रोगाः। रुक् रुजौ रुजः। रुज् दिश् तृष् इत्यादयो हलन्त-शब्दाः आकारान्ता अपि प्रयुज्यन्ते। रुक् = रुजा, दिश्-दिक्षु = दिशासु, तृट्-तृषा = तृषया. निट्-निशि = निशायां. विषयः = देशः। अविलुप्तं = लोपरहितं, अविकलं। मद्रुपान्ते = मत्समीपे. अटन् = सञ्चरन्. आपादयन्ती = जनयन्ती।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

24 विदूरगान् साधु विलोभयन्ती
वितन्वती स्वाभिमुखान् हताशान् ।
अनन्तदिङ्मार्गविहारिणि त्व-
मनन्तरायं विजयस्व नित्यम् ॥

॥ यवनिका ॥

पद्यम्—24 सारः—मरुः स्वपत्न्याः मरीचिकाया विजयमाशंसते । हे आकाशमार्गविहारिणि मरीचिके त्वं विदूरे गच्छतो जनान् यथेच्छं विलोभय । स्वाभिमुखमागतान् जनान् निराशान् कुरु । एवं निर्विघ्नं निरन्तरं विजयस्व ।

विदूरे गच्छन्ति = विदूरगाः । हताशान् = निराशान्, अन्तरायः = विघ्नः ।

द्वितीयोऽङ्कः समाप्तः

—०—

॥ अभ्यासः ॥

I अधोनिर्दिष्टानि अव्ययानि संयोज्य वाक्यानि रचयत ।

यथा—किन्तु । सीता परिशुद्धैवेति रामो जानीते । किन्तु लोकापवादभयं स गुरुतरमगणयत् ।

1) एवं 2) असकृत् 3) कच्चित् 4) तथापि 5) नाम ।

II अद्य पठितानां एकभारतपद्यानां अन्वयं लिखत ।

III एकभारतस्य द्वितीयमङ्कम् अनुवदत । (Translate)

IV पाठशालाया आगच्छन्तीनां मालिनी-राधिका-माधवीनां कमपि विषयमधिकृत्य परस्परसंवादं स्वभावनानुसारं लिखत ।

V तृतीय - चतुर्थपाठानामावर्तनं (Revision) कृत्वा सर्वे विषयाः दृढीक्रियन्ताम् ।

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रयस्त्रिंशो दिवसः

एकभारते तृतीयोऽङ्कः

(यवनिकोत्क्षेपणे प्रविशति निपीतमद्यो मदमन्थर इतस्ततः प्रस्खलन् फेनपुञ्जमुद्गिरन् समुद्यतभुजः समुद्रः)

समुद्रः—(अविस्पष्टाक्षरम्) कुत्र सा गंगा। कुत्र सा गोदावरी। क्व गता सा पर्णाशा। न खलु तासां दास्याः पुत्रीणां मद्गता चिन्ता। ता न जानते अहं कीदृशः प्रभुरस्मीति। अरी गंगे,

25 मत्पेटिकासु रत्नानि विद्यन्ते विविधानि ते।
न दद्यामेकमपि ते यावत् त्वं न मरिष्यसि॥

(परिक्रम्य) अरी, पतिव्रतासु कुलटे, कुलटासु पतिव्रते, त्वं वक्रं गच्छसि कुटिलं च गच्छसि। किन्तु मां नायासि।

तृतीयोऽङ्कः

निपीतमद्यः = मद्यं पीतवान्, मन्थरः = मन्दः। प्रस्खलन् = अस्थिरपदविन्यासः staggering. फेनः = froth. उद्गिरन् = वमन्. समुद्यतभुजः = ऊर्ध्वं उत्सारितबाहुः। दास्याः पुत्री = पित्रा विना जाता स्त्री, जारजा. इदमतिनिकृष्टं पदं नाटकादिषु नीचाः भाषन्ते। मद्गता = मां विषयीकृत्य।

पद्यम्—25 सारः— समुद्रो मद्यपानां स्वभावेन भाषया च निरर्थकं प्रलपति; स्वपत्नीः प्रलोभयति च। मत्पेटिकासु अर्थात् मदन्तर्भागे विविधानि रत्नानि विद्यन्ते। यावत् त्वं न मरिष्यसि तावत् तेष्वेकमपि ते न दद्याम्। तव मरणानन्तरमेव दास्यन्ते इति भावः। मां नायासि = मां न उपागच्छसि। न + आयासि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

26 विकचकुचे घनजघने सितसिकते चञ्चलालकाञ्चलिके ।
गंगे भंगासंगे चपले विमले क्व वाऽसि तनुतरले ॥

(उच्चैः) अरी उलूककोकिलकलालापिनि त्वं किमित्येवं दर्पं करोषि? अस्ति किं ते तावान् जलविभवो यावान् ममास्ति? तव तु जलमंगुलीपरिमाणान् मत्स्यान् वहति। मम तु द्वीपपरिमाणान्। (किंचिद् स्मृत्वेव) आह! कीदृशः स मत्स्योपदंशः!,

27 मन्दाग्निना युवतिभिर्मृदु पाचितः स
खण्डः परं मरिचधूलि - विरूषितश्च ।
आलोडितश्च लशुनादिभिरुग्रगन्धैः
लालां प्रवाहयति वक्त्रगुहान्तरान्मे ॥

(त्फू त्फू इति निष्ठीवति) (पुनरपि स्मृत्वेव) किं कथयसि मया मद्यं पीतमिति। तर्हि त्वं मम बाह्वोरालिंगनायासिनी भूत्वा मामधिक्षिपसि? अथवा नायमधिक्षेपः। मम योग्यतासमापिणी वाणी। तथाहि —

पद्यम् - 26 सारः—समुद्रः गङ्गामभिसंबोध्य कथयति। मम प्राणनाथे गंङ्गे त्वं कुत्र वा वर्तसे. सम्यग् विकसितस्तने गुरुतरजघने सिकताभिः स्मितं कुर्वाणे वीचिकाभिः अलकमसङ्कुर्वति तरंगैः भ्रूभङ्गं रचयन्ति तरलशरीरिणि चपले विमले त्वं कुत्रासि?

विकच = विकसित, जघनः=शरीरस्य मध्यभागः। सिकता=sand. अलकः = चूर्णकुन्तलः, curls. भंगः = तरंगः। उलूकः = पक्षिविशेषः, owl. कोकिलः = पिकः। उलूक इव पिक इव च मधुरमालपन्ति। दर्पः= गर्वः। अंगुलीपरिमाणान् = अंगुलीप्रमाणान्. मत्स्योपदंश = मत्स्येन विरचितं व्यञ्जनं Fishcurry.

पद्यम् — 27 सारः—तस्य मत्स्योपदंशस्य केवलं स्मरणमेव मम वक्त्रे जलं प्रस्रावयतीति संक्षेपः। स मत्स्यखंडः वक्त्रकुहरात् लालां प्रवाहयति। कीदृशः खंडः? युवतिभिर्मन्दाग्निना अतिमार्दवेन सम्यक् पाचितः, मरिचचूर्णैः सम्यग् मेलतः उग्रगन्धैः लशुनादिभिः संपृक्तः स मत्स्यखण्डः मम मुखगुहान्तरे प्रभूतं जलं उत्स्रावयति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

28 हन्त ! सुधांशौ राजत-
कलशाद् विकिरति सुरां सुधाधवलाम् ।
भुवनेऽत्र को मनस्वी
न खलु पिबेत्, न स्खलेत्, न वा जल्पेत् ॥

अरी, गंगे, कृष्णे, सिप्रे, अहं पुनः पुनराकारयामि । न खलु यूयं शृणुथ । (किञ्चित् स्मृत्वेव) अहो अन्यत् सर्वमपि स्मृतेरन्तर्हितम् । तदेकमेव मद्यसारे फेनपुञ्ज इव उद्गीर्णम् । यूयमिदानीं देशसेवां कुर्वत्यः स्वच्छन्दं पर्यटथ । तर्ह्यटत । सर्वतोऽप्यटत । वयमधुना तदर्थमनुजानीमः । अयि प्रेयसि गंगे, त्वमेवाग्रेसरा भव ।

29 अट निकटं स्फुटविकटं पृथुलघटे संकटे जटे जरठे ।
चल चपलं छलतरलं मधुरजले चञ्चले कले सकले ॥

(इति निरर्थकं जल्पन् प्रस्खलन् निष्क्रामति)

(ततः प्रविशति गंगा)

विरूषितः = मिश्रितः । आलोडितः = संपृक्तः । लशुनः = garlic. लाला = स्वादिष्टानां भोज्यानां दर्शनेन वक्त्रान्तरात् प्रस्रवत् जलम् । निष्ठीवति = spits. आलिंगनायासिनी = आलिंगनसुखमनुभवन्ती. योग्यताप्रमापिणी = योग्यताया मानदण्डः अर्थात् सूचिका. मद्यपानं मम योग्यतामापक्रमित्यर्थः ।

पद्यम् —28 सारः —अस्मिन् समये ये न पिबन्ति ते मूढा एव । चन्द्रोदये सर्वेऽपि पिबेयुः, प्रस्खलेयुः, जल्पेयुश्च । अत्रोदाहरति चन्द्र एव स्वकीयात् राजतकुंभात् सुधाशुभ्रं मद्यं विकिरति । एवं स्थिते ? अस्मिन् लोके को नाम न पिबेत् न स्खलेत् न वा जल्पेत् ? सर्वेऽपि पिबेयुः प्रस्खलेयुः जल्पेयुश्चेत्यर्थः । सुधांशुः = चन्द्रः । सुधांशौ सुरां विकरति = सप्तम्याः विशेषप्रयोगः । यदा सुधांशुः सुरां विकिरति तदा । विकिरति (त. पु. स. ए.) अत्र = अस्मिन्. मनस्वी (न. पु. प्र. ए.) = धीरः । प्रस्खलेत् = भ्रष्टपदन्यासं चरेत्. जल्पेत् = निरर्थकं प्रलपेत्. आकारयामि = शब्दापयामि. शृणुथ = आकर्णयथ. अन्तर्हितं = अप्रत्यक्षीभूतं उद्गीर्णं = उद्गतं, बहिर्गतं. स्वच्छन्दं = यथेष्टं, तर्हि + अटत. अनुजानीमः = अनुज्ञां दद्मः । अग्रेसरः = प्रमुखः । नेत्री = मार्गनिर्देशिका. नेतृ = ई ।

पद्यम् —29 सारः —समुद्रः गंगाया यथेष्टसञ्चारार्थं अनुज्ञां ददाति इति धारणया किमपि जल्पति. अस्य पद्यस्य न कोऽपि विशेषार्थः । अट =

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गंगा आर्यपुत्र, क्व गतो भवान्! मामाकारितवान्? अहमधुना विसृष्टनिखिलकृत्या भवत्सविधमुपागतास्मि। आज्ञापयतु किं करणीयमिति। (परिक्रम्य) हन्त! अत्रापि न दृश्यते। अलब्धार्थो गतः स्यात्? किमहं करवाणि। मया यदाचरितम् तत् तत्रभवते न रोचते! यन्मया प्रियमिति कृतं तत् प्रतिकूलम् फलति। यदाऽहं तत्रभवन्तमुपसरामि तदा स मदभिमुखं निष्ठीवति; दोर्दण्डमुद्यम्याहन्ति; कर्णकठोरं गर्जति च। किं मयात्र करणीयम्। हन्त मत्पितुर्दौर्भाग्यम्। द्वे अपि दुहितरावस्य दुःखायैव। यतः,

30 व्यथां ज्येष्ठा सिन्धुर्जनयति तुरुष्कैरपहृता
कनिष्ठा त्वाश्लिष्टा सततचपलेनांबुनिधिना।
तदप्यन्याक्रान्तेर्भरतवसुधारक्षणविधौ
धुरीणो जागर्ति प्रसृमरविशालोन्नततनुः॥

अपिच,

सञ्चर. विसृष्टनिखिलकृत्या = निखिलकर्तव्यानि परित्यज्य। सविधं = समीपं परिक्रम्य = इतस्ततश्चरित्वा. अलब्धार्थः = प्रयोजनमलब्धवान्. करवाणि = कुर्यां, तनवानि (लोट्. पर. उ. ए)। उपसरामि = उपगच्छामि. दोर्दण्डम् = करदण्डं. उद्यम्य = उन्नमय्य, ऊर्ध्वं प्रसार्य. आहन्ति = प्रहरति. दुहितरौ अस्य दुःखाय एव. 'दोस्' सकारान्तो हस्तपर्यायः। दोः दोषौ दोषः। दोषं दोषौ दोषः or दोष्णः। दोषा or दोष्णा दोर्भ्यां दोर्भिः दोषे, दोष्णे etc. अर्थात् स्वरप्रत्यययोगे दोस् इतिशब्दः विकल्पेन दोषन् इति नकारान्तश्च जायते।

पद्यम्—30 सारः—स्वपुत्र्योः सिन्धुगंगयोरसुभगजीविते परितप्तोऽपि पिता हिमालयः लोकोपकारायैव प्रवर्तते इति संक्षेपः। तुरुष्कैरपहृता ज्येष्ठा सिन्धुः पितुर्व्यथां जनयति। कनिष्ठा गंगा तु सततचपलेन अम्बुनिधिना आश्लिष्टा च। तथापि पिता हिमालयः अन्येषां आक्रमणात् भारतभूमेः संरक्षणविषये धुरन्धरो भूत्वा विशालां उन्नतां च तनुं प्रसार्य सदा जागरूको वर्तते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

31 अवन्ध्यो विन्ध्योऽसौ जनपदशतानामवनतः,
प्रकृष्टां सह्योऽयम् कलयति च सेवामवनतः ।
कनिष्ठानामग्रयौ मम पितुरभिन्नोज्वलगुणौ
परं तौ कुर्वन्तौ सुलभविभवां भारतधराम् ।।

हन्त ! अहमीदृशी मन्दभाग्या संवृत्ता (इति रोदिति)

(ततः प्रविशति हिमालयः)

हिमालय :— (गङ्गां दृष्ट्वा) वत्से किमेवमेकाकिनी भूत्वा किमपि प्रलपन्ती विलपन्ती च तिष्ठसि ? किं ते कदन-निमित्तम् ?

गङ्गा—(उपसृत्य) तात वन्दे । मम तु,

तुरुष्कैः = माहम्मदैः । व्यथा = दुःखं. अंबुनिधिः = समुद्रः । आश्लिष्टा = संबद्धा. तदपि = तथापि. आक्रान्तेः (इ. स्त्री. पं. ए.) = आक्रमणात्. धुरीणः = भारवाही. प्रसृमरा विशाला उन्नता च तनुः यस्य सः. जागर्ति = जागरूको वर्तते. अपि च = न केवलमेतत् किन्तु अन्यदप्यस्तीत्यर्थः ।

पद्यम्—31 सारः— हिमवतः कनिष्ठौ विन्ध्यः सह्यश्च यथाशक्ति भारतस्य सेवां तन्वाते । तथाहि, अयं विन्ध्यपर्वतः ग्रामशतानां रक्षणात् सफलः कृतकृत्यश्च वर्तते । असौ अवनतः अर्थात् विनीतः सह्योऽपि प्रकृष्टां सेवां करोति । मम पितुः समानगुणौ कनिष्ठेषु प्रधानौ तौ द्वावपि पर्वतौ इमां भारतभूमिं विभवसमृद्धां कुर्वन्तौ साभिमानं वर्तेते ।

अवन्ध्यः = सफलः, सप्रयोजनः । जनपदशतानां + अवनतः = अवनात्, रक्षणात् । कलयति = कुरुते. सेवां + अवनतः = नम्रः । आद्यपादे अवन + तः इति तसिलन्तमव्ययम्. द्वितीये तु अव + नम्+त इति क्तान्तः शब्दः । 'तसिल्' प्रत्यये 'तस्' शिष्यते । स प्रत्ययः प्रायशः पञ्चमीविभक्तेः स्थाने प्रयुज्यते, वृक्ष + तस्=वृक्षतः । वृक्षतः=वृक्षात् वृक्षाभ्यां अथवा वृक्षेभ्यः । राजतः = राज्ञः राजभ्यां अथवा राजभ्यः । अग्रयौ=मुख्यौ. अभिन्नाः उज्ज्वलाश्च गुणा ययोस्तौ. कदनं=दुखं ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

32 कदनं खलु शाश्वतः प्रवाहः सिकता हर्ष इवान्तरान्तरा तम् ।
गहने विपिने निराश्रयाहं रुदती हन्त ! नये दिनं कथञ्चित् ॥

हिमालयः—वत्से, शान्ता भव । न खलु देशसेविकानामिदं कातर्यमुचितम् । मोदाः खेदाश्च ता न विकुर्वन्ति । सर्वदैव ताभिः परार्पितसर्वस्वाभिर्भवितव्यम् । तासां तु सरणिः संकटा, प्रायशो मनोरथाश्च विकला भवन्ति । तथापि ता अविचलितचित्तवृत्तय एव दृश्यन्ते । त्वमधुना कदनाभिभूता दृश्यसे । कुतस्ते तादृशी धैर्याभिघातिनी व्याकुलता जाता । कथय विस्रब्धम् ।

गङ्गा—अद्याहं वंगदेशावधीनां विषयाणां अनावृष्टिसंजातां तृष्णां निर्वापयितुं गता । सन्नान् केदारान् प्रसन्नान् कुर्वती सन्तप्तान् कृषीवलान् संतृप्तानातन्वती निर्जलान् जलाशयान् सुलभजलानाकलयन्ती प्रतिग्रामं प्रतिजनपदं पर्यटन्त्यासम् । तदा आर्यपुत्रः आगत्य मामाकारितवान् । यदाहं तच्छ्रवणादितोमुखी न्यवर्ते तदा तत्रभवानितोऽपि विनिर्गतः । धिङ् मामसुलभसौभगां भर्तुरनुवर्तने । (रोदिति)

हिमालयः—(दुहितरं सान्त्वयन्) वत्से,

पद्यम्—32 सारः—गंगा स्वानुभवं प्रस्तौति । मम जीविते निरन्तरः शाश्वतश्च यः प्रवाहोऽस्ति स प्रवाहो मम मनसि सर्वदा वर्तमानम् दुःखमेव । तत् प्रवाहमध्ये तत्र तत्र नैमित्तिका हर्षा इव काश्चन सिकताश्च दृश्येरन् । किन्तु मम शाश्वतरूपम् दुःखमेव । एवम् दुःखात्मकप्रवाहरूपिण्यहम् अतिगहनेषु काननेषु निराश्रया भूत्वा विलपन्ती कथञ्चिदपि दिनानि नयामि ।

शाश्वतः=सनातनः, निरन्तरः । सिकता=नदीप्रवाहमध्ये तत्र तत्र विद्यमानाः अल्पतमाः द्वीपाः । small sandy lands. तमन्तरा = तस्य मध्ये । गहने = सान्द्रे. कातर्यं = भीरुत्वं, विकुर्वन्ति = विकारकारणानि भवन्ति, ताभिः परार्पितजीविताभिः भवितव्यं = ताः परार्पितजीविताः भवेयुः । सरणिः = मार्गः । संकटा = विषमाः विकलाः = अपूर्णाः । अविचलिताः चित्तवृत्तयः यासां ताः । अभिभूताः = परभूताः । धैर्याभिघातिनी = धैर्यनाशिनी, व्याकुलता = परवशता. विस्रब्धम् = सविश्वासं. विषयः = देशः । अनावृष्टिः = वर्षाभावः । निर्वापयितुम् =

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

33 सुमुखि रुदिहि मैवं बद्धवात्सल्यभावम्
जनकहृदयमेवं मा कृथा निष्प्रभावम् ।
प्रशमयितुमभूवं यः क्षमः शत्रुदावं
विसृजति स निकामं धीरमामस्वभावम् ॥

अथ च वत्से त्वया स्वपतिं प्रति नैवं संकोचः कार्यः । यत् सत्यं, स मे जामाता सदा प्रक्षुब्धः सततं चञ्चलश्च दृश्यते । तथापि तस्य तद्गाम्भीर्यं अस्मद्राष्ट्रमन्यैरप्रधृष्यं करोति । अपि च पश्य वत्से, स कदापि नातिक्रान्तमर्यादो वर्तते । परिघसदृशान् बाहुदण्डानुन्नमयन् आकाशमुद्भेदयन्निव उच्चैर्गर्जन् अरिकुलं विभीषयन् सोऽस्माकं कर्मभूमेरंगरक्षको भूत्वा सेवामातनुते । त्वं तस्य बहिश्चाञ्चल्यमेव जानीषे । नास्य गाम्भीर्यं महिमानं वा । पश्य,

---

दूरीकर्तुं, नाशयितुं. सन्नान्=क्षीणान्. आतन्वती=कुर्वती. पर्यटन्ती+आसं. आकारितवान्=आहूतवान्, शब्दापितवान्. इतोमुखी=इदंस्थानमभिमुखीकृत्य. धिक्+मां. 'धिक्' इत्यव्ययं द्वितीयान्तेन सह निन्दार्थे प्रयुज्यते. धिङ्मां=अहं निन्दनीया, अथवा मम जीवितं निन्द्यम् । मातुः कृतघ्नं पुत्रं धिक्=मातुः कृतघ्नः पुत्रो निन्द्यः ।

पद्यम्—33 सारः—हे वत्से रोदनेनालम् । धीरमपि मां मैवमधीरं कुरु । न खलु त्वयैवं रोदनं कार्यं । यद्येवं रुद्यते तर्हि वात्सल्ययुक्तमिदं तव पितुश्चित्तं दुर्बलं स्यात् । योऽहं शत्रुरूपं दावानलमपि प्रशमयितुं शक्तोभूवं सैष तव पिता अधुना रुदतीं त्वां दृष्ट्वा स्वाभाविकमात्मनो धैर्यं मुञ्चति ।

रुदिहि=विलप (लोट्. पर. म. ए.), क्रन्द । बद्धः वात्सल्यभावः यस्मिन् । कृथाः (लुङ्. आ. म. ए.) मा इति प्रतिषेधार्थकमव्ययम् । एतद्योगे क्रियाया भूतकालसूचक अकारो लुप्यते । अतः अकृथाः इत्येतत् कृथाः इत्यवशिष्यते । अभूवं=अभवं. क्षमः=शक्तः । शत्रुदावः=शत्रुरूपो दावाग्निः । विसृजति=त्यजति. निकामम्=नितराम् ।

यत् सत्यं=सत्यमेव. जामाता=पुत्र्याः भर्ता. अस्मद्राष्ट्रं+अन्यैः+अधृष्यं=अनाक्रमणीयम्. नातिक्रान्तमर्यादः=सीमानमनुल्लंघितवान्. मर्यादा=सीमा. परिघः=अर्गलः, Iron beam used for shutting huge palace gate. जानीषे=जानासि. उद्भेदयन्=विदारयन्.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

34 द्वीपानामयुतं बिभर्ति यदयं नित्यंचलो निश्चलं
क्रय्याणां यदितस्ततः प्रणयनैर्लोकानयं सेवते ।
यज्जातोऽयमनुत्तमोन्नतकुले यस्मात् स्म सञ्जायते
शान्ताम्भोधिरपीह तच्छ्वशुरतामापाद्य तुष्याम्यहम् ॥

(नेपथ्ये गानं श्रूयते)

जनगण-रमणी भारतधरणी जयति निरन्तर-मङ्गल-जननी ।
तव मन्द्रं जय वाद्यविशेषं प्रथयति जलनिधिरसदृशघोषम् ॥
(जनगणरमणी........)

पद्यम्—34 सारः—बहुविधा लोकसेवाः कुर्वतस्तस्य समुद्रस्य श्वशुरो भूत्वा अहं तुष्टोऽस्मीति संक्षेपः । सदा चञ्चलोऽयं समुद्रः चलन-रहितान् अनेकान् द्वीपान् वहति । क्रयविक्रयवस्तूनां इतस्ततः प्रेषणैः अयं लोकसेवां कुरुते । यस्मात् समुद्रवंशात् शान्तसमुद्रोऽपि जातः तस्मादेव वंशात् तव भर्ता वङ्गसमुद्रोऽपि समजायत । तादृशस्य परोपकर्तुः कुलीनस्य समुद्रस्य श्वशुरपदं प्राप्य अहं अतितरां तुष्यामि ।

अयुतम्=दशसहस्रं. बिभर्ति=धरति, यत्=यस्मात्, क्रय्याणां=क्रयविक्रयवस्तूनाम्. प्रणयनैः=प्रेषणैः । यत्+जातः+अयं+अनुत्तम.... अनुत्तम=अत्युत्कृष्ट. तस्य श्वशुरतां, तत्+श्वशुरतां=तच्छ्वशुरतां. आपाद्य=प्राप्य ।

गानम्—जनगणरमणी=जनानानन्दयन्ती । तव मन्द्रं........घोषम=समुद्रः तव जयवार्तां तरंगरूपं वाद्यमाहत्य प्रख्यापयति । प्रथयति=विस्तारयति. च+आयातः+इव । कुसुमैः........कलितैः । वृक्षसमूहः सुगन्धिभिः मधुसङ्कलितैः पुष्पैः भारतमातरमर्चति. अविरल=अनल्प । द्वीपम्.......वितानम=यस्याः असदृशं सुमहितं विस्तृतं च धर्ममहत्त्वं प्रतिद्वीपं प्राप. अयात्=ययौ. मानुष........दक्षान्=या भारतमाता अत्रत्यान् सर्वान् मानुष-समूहान् सम्यक् शिक्षितान् कृत्वा तत्तत् कर्मसु समर्थान् अकरोत्. अविकला (पूर्णा) शिक्षा येषां ते । अकृत=अकरोत्. अकृत, अकृषातां, अकृषत (लुङ् आ.) समान्=सर्वान, दक्षान=समर्थान्. विदलितजनगणमानसदोषा=जनगणमानसदोषान् दूरीकृतवती ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गङ्गा—(कर्णं दत्त्वा) सिप्रा पर्णाशा चायात इव ।

(पुनरपि नेपथ्ये)

कुसुमैरविरल-परिमलमिलितैस्तरुततिरर्चति नवमधुकलितैः ।
द्वीपं द्वीपमयादसमानं यस्यास्सुमहितधर्मवितानम् ॥
(जनगणरमणी...)

(सिप्रा पर्णाशा च गायन्त्यौ प्रविशतः)

मानुषलक्षानविकलशिक्षानकृतसमान् या कर्मसु दक्षान् ।
सा राजति भुवनैकविभूषा विदलितजन-गणमानस-दोषा ॥
(जनगणरमणी......)

हिमालयः—अहो श्रवणसुखं गानम् । श्रुत्वा सर्वमपि विस्मर्यते । अयं खलु गानस्य प्रभावः ।

35 व्यावर्तितेन्द्रियगणं विषयान्तरेभ्य-
श्चित्तं करोत्यविरतात्मसुखानुविद्धम् ।
निद्राति यद्विकसति प्रविलीयतेऽथ
विभ्राजते विहसति क्षणमन्तरेण ॥

पर्णाशा—(हिमालयं निरीक्ष्य सादरमात्मगतम्)

36 बाह्यैः शुभांगैरवदातभावं तथान्तरंगेण गभीरभावम् ।
व्यनक्ति, यद्यप्ययमप्रधृष्योऽप्याभाति सर्वैस्सतताभिगम्यः ॥

पद्यम्—35 सारः—गानं अलौकिकेनानन्देन चित्तं मोहयति । तद् श्रोतॄणां इन्द्रियाणि अन्यविषयेभ्यो व्यावर्त्य चित्तं सन्ततपरमानन्दनिलीनं करोति । तत्तादृशं चित्तं गानश्रवणसमये कदाचिद् निद्रातीव कदाचिद् विकासं प्राप्नोतीव कदाचिद् विलयं प्राप्नोतीव उज्ज्वलतीव विहसतीव । गानश्रवणेन चित्तमीदृशं विकुरुते । व्यावर्तिता इन्द्रियगणा येभ्यः तद् (चित्तं) व्यावर्तित = परावर्तित. विषयः = इन्द्रियैर्गृह्यमाणं वस्तु. नेत्रस्य विषयः वृक्षगजादयः, श्रोत्रस्य विषयः शब्दः, रसनाया रसः इत्येवम् । अन्ये विषयाः = विषयान्तराणि. अविरतेन आत्मसुखेनानुविद्धं. अविरतम् = निरन्तरं. अनुविद्धं सहितं, संबद्धं ।

पद्यम्—36 सारः—पर्णाशा हिमालयम् निरीक्ष्य प्रस्तौति । हिमालयस्य बाह्यावयवाः तस्य परिशुद्धस्वभावम् व्यञ्जयन्ति । तथा अन्तरंगेण गांभीर्यं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिप्रा—(गङ्गां निरीक्ष्य सकौतुकमात्मगतम्)

37 उपेयिवांसो द्रवतां प्रायो गुणगणाः पितुः ।
पुत्र्याः प्रवाहाः सञ्जाताः भुवनत्रयपावनाः ॥

(द्वे अप्युपसृत्य) पितृदेव, वन्दावहे ।

हिमालयः—वत्से लोकप्रिये भवतम् । अन्यर्जीवनार्थायैव युवयोर्जीवनानि भवन्तु ।

पर्णाशा— शिरसा धार्यते सानुग्रहं वाक्यम् । फलितमावयोर्मनोरथैः ।

हिमालयः—अपि कुशलं युवयोर्विषयाणाम् ?

पर्णाशा — तात, अयमेक एवावयोः क्लेशहेतुः ।

हिमालयः— कथमिव ?

पर्णाशा —कथमावयोर्विरलभागधेययोर्विषयेषु कुशलं भवति? यत्र स मरुर्मरीचिकाजानिश्शास्ता वर्तते ।

च प्रतीयते । तथैवायम् बाह्यदृष्टया अप्रधृष्यः अर्थात् अनभिगम्य इव प्रतिभाति । किन्तु स सर्वेषामप्यभिगम्यश्च वर्तते ।

अवदातभावन् = विशुद्धस्वभावम्. व्यनक्ति = स्पष्टीकरोति, यद्यपि अयं अप्रधृष्यः अपि आभाति. आभाति = प्रतिभाति (seems.)

पद्यम्—37 सारः—सिप्रा गंगां निरीक्ष्य स्वयं चिन्तयति. पितुर्हिमालयस्य गुणगणाः द्रवीभूय पुत्र्या गङ्गाया भुवनत्रयपावनाः प्रवाहा जाता इति मन्ये ।

उपेयिवांसः = प्राप्ताः । 'इ' धातोर्गमनमर्थः । एति समेत परीतं विपरीत इत्वा समेत्य व्यत्ययः प्रत्ययः अयनं एतु एहि इत्यादिष्वनेकेषु पदेषु 'इ' धातोः सान्निध्यमस्ति. उपेयिवस् इति शब्दः इ धातोः क्वसुप्रत्ययान्तः । उप + इ + वस् + अः = उपेयिवांसः उपेयिवान् उपेयुषः उपेयुषां उपेयिवत्सु उपेयुषी इत्यादीनां प्रक्रियाः विद्वस् शब्दस्येव भवन्ति । ताः आवर्तनेन दृढीकुरुत । द्रवता=द्रवत्वम्. पावनाः = पुनानाः, शुद्धीकुर्वत्यः ।

फलितमावयोर्मनोरथैः = आवयोर्मनोरथाः फलिताः । विषयाणाम् = देशानाम्. व्यापादयितु = नाशयितुं मा मैवं = न संभाव्यं अविकृतं =

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिमालयः—आः ! मरुर्युवयोर्विषयान् पुनरपि व्यापादयितुं उद्युक्तः ? मा मैवम् । असकृत् स मयोद्बोधितः 'अविकृतं वर्तस्वे'ति । न स मां गणयति ? अस्तु, अहमधुनैव जामातरं सागरमामन्त्रयामि । स एवार्तानामेकावलम्बः । तद्युवामधुना स्वविषयमेव प्रतिनिवर्तेथाम् । अपारागाधहृदयः स यावत्कालं वर्तते तावत् अस्माकं नास्ति कुतोऽपि भयस्यावकाशः । अहो, विचित्राणि तस्य वृत्तानि ।

38 क्षुद्रं परान् स्वमवबोध्य बहिश्चलत्वात्
क्षुद्रान् परान् वितनुतेऽप्रतिमात्मसत्त्वः ।
उच्चावचा हि महतां विविधा विलक्षा
विस्मापका दुरवगाहतमाः स्वभावाः ॥

(हिमालयः पर्णाशा, सिप्रा च निष्क्रामन्ति)

गङ्गा—(अञ्जलिं बध्वा) आर्यपुत्र ! क्षमस्व मां अशुद्धत्रिकरणाम् । (सगद्गदं रोदिति) ।

(यवनिका)

विकाररहितं, यथातथं, एव + आर्तानां + एकावलंबः । तद् + युवां. वृत्तं = चरितं ।

पद्यम्—38 सारः—सदा चञ्चलस्वभावोऽयमंबुधिः अतिक्षुद्र इति जना मन्यन्ते । एवं जनानां चिन्तां जनयितुमेव स सततं बहिश्चलो वर्तते । वस्तुतः, जनानां एवं भ्रममुत्पादयन् स तानेव क्षुद्रान् करोति । समुद्रसदृशानां महतां स्वभावा एवमुच्चावचा भवन्ति । ते अन्यैरवगन्तुं न शक्याः । बहुधास्ते परेषां विस्मयं च जनयन्ति ।

क्षुद्रः=अन्तस्सारशून्यः । अवबोध्य=प्रबोध्य, संज्ञाप्य, बहिश्चलत्वात्= बाह्यचलनस्वभावेन, अप्रतिमं आत्मसत्त्वं यस्य सः । अप्रतिम = असदृश. सत्त्वं = शक्तिः । उच्चावचाः = विषमाः, क्रमरहिताः । विलक्षाः = असाधारणाः । दुःखेन अवगाहितुं योग्याः = दुरवगाहाः । अवगाहितुं = ज्ञातुं, दुर्, सु इत्येतयोरुपसर्गयोर्योगे य, तव्य, अनीय इत्येषां स्थाने केवलं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'अ' इति प्रत्ययोऽपि प्रयुज्यते। सुखेन गन्तुं योग्यं अथवा शक्यं = सुगमम्। दुर्गमम्, सुसहं, दुस्सहं दुःखेन सहनीयं। गन्तुं योग्यं (शक्यं) इत्यस्य गम्यं गमनीयं इत्येवार्थः। दुरवगाहतमाः = अत्यन्तमज्ञेयाः। अशुद्धत्रिकरणां = मनोवाक्कर्मसु अशुद्धाम्।

तृतीयोङ्कः

॥ अभ्यासः ॥

I अद्य पठितं एकभारतभागं अनुवदत।

II पदानि विश्लेष्य सन्धिकार्याणि विशदयत।

1) कस्तेषां 2) सर्वेऽप्येकीभूताः 3) क्वासि 4) गत इति 5) आयातीव 6) मद्देष्वद्य 7) कुशलायैव 8) आज्ञाकरोऽस्ति 9) कर्णाटकेषूत्सृष्टाः 10) चावन्तिषु।

III अन्तलिंगविचनानि लिखत। यथा-करिभिः — न. पु. तृ. बहु.

1) पत्नी 2) विदेशी 3) दीर्घदर्शी 4) कवी 5) वने 6) कन्ये 7) भवते 8) धनिने 9) दृश्यमानां 10) अधमानां।

IV पदपरिचयं दत्त। यथा—विलिख्य, लिख् धातोः ल्यबन्तमव्ययम्। गतवान्—गम् धातोः, पुं, प्र. ए.

1) विधाय 2) देवाय 3) हरेः 4) हरेः 5) हसत् 6) अहसत् 7) नीत्वा 8) त्वा 9) पिपासुः 10) लतासु।

V त्वां जीवितकथां द्वित्रासु खण्डिकासु संक्षिप्य लिखत।

VI अद्य पठितात् एकभारतात् भवतां अभीष्टानां चतुर्णां पद्यानां अन्वयं लिखत।

VII पञ्चमषष्ठपाठयोरावर्तनं कृत्वा पठितपूर्वान् विषयान् दृढीकुरुत।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुस्त्रिंशो दिवसः

एकभारते चतुर्थोऽङ्कः

(ततः प्रविशति चिन्ताकुला गङ्गा)

गङ्गा—(आत्मगतम्) आर्यपुत्र ! प्रसीद मयि । यन्मयाऽपराद्धं, क्षमस्व । त्वय्यहमशुद्धत्रिकरणा जाता । मम त्वीदृशी दशा ।

39 प्रालेयशैलशिखराद् गलिता, पयोधेः
प्राणप्रिया, परिहरामि तृषां जनानां ।
साऽहं दहामि नितरामधुनैक्यतृष्णा-
तीव्रोष्मणा महित-भारत-भूतधात्र्याः ॥

आर्यपुत्र, तव दासीं मामनुशाधि । तात, हिमालय, पुत्रीमनुगृहाण । अस्माकं अधिष्ठात्र्या एकतापादकं कञ्चन मार्गं प्रदर्शय येनाहं एतां समृद्धां कर्तुं शक्नुयाम् । एवमनवशिष्टकर्तव्यान्तरा च स्याम् । (परिक्रम्य विचिन्त्य च) कथमस्या आर्षभणितिभिरेकीकृताया गिरिजलधिभिरन्यतोऽसंपृक्तायाः अस्मत्कर्मभुव ईदृशमनैक्यं सञ्जातम् ? यद्यपि विभिन्ना वर्णा विचित्रा राष्ट्रमीमांसा विविधा भाषाश्च सन्ति तथापि ताः सर्वाः अप्यस्या एकस्मिन्नहिंसाप्रमाणेऽधिष्ठिता वर्तन्ते । (पुनरपि परिक्रम्य विचिन्त्य च) इदं अनैक्यं न खलु चिरस्थायि । किन्तु क्षणिकमिति मे प्रतिभाति, यदन्नवस्त्रादीनां सुलभतया दूरीभवत्येव ।

चतुर्थोऽङ्कः

त्वयि अहं अशुद्धत्रिकरणा तु + ईदृशी ।

पद्यम्—39 सारः—हिमालयात् अहं प्रवहामि । जलधेः प्राणप्रिया चास्मि जनानां तृष्णां अहं परिहरामि । तादृशी अहं भारतमातुः ऐक्यतृष्णायाः ऊष्मणा अधुना दहामि । इदं विचित्रमेव ।

प्रालेयशैलः = हिमवान्, तृषा = तृष्णा, नितरां अधुना ऐक्य....। शैत्यात् जाता, शैत्येन संबद्धा चाहं ऊष्मणा दहामीति विचित्रमेवेत्यर्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(नेपथ्ये)

अपसरत सस्यश्यामालजडाः प्रदेशा अपसरत !

गङ्गा—(कर्णं दत्त्वा) अहो मरोरिवायं निर्ह्लादघोरो निस्वनः ।

(पुनरपि नेपथ्ये)

40 या मां क्लिन्नं चिकीर्षुः सरिदिह पयसामन्तकं स्वैः प्रवाहैः
यो वाऽब्दो मत्प्रियायाः सरसविलसितेष्वन्तरायं करोति ।
यश्चास्मद्वत्स तीव्राहति-विहति-सहः पादपः पत्तनं वा
सोऽभ्यायातोऽग्रतो मे श्वसितरभसतो नेष्यते भस्मभूयम् ॥

गङ्गा—आहा ! मरोरिदमनिष्टं दुःश्रवं निवेदनम् । आर्यपुत्र, मत्कृतं सर्वमपि क्षमस्व । देहि मे तादृशीं शक्तिं ययाहमेनमनिष्टमुत्सारयेयम् । हन्ताह-मत्रैकाकिन्यस्मि । (सावेगं परिक्रम्य) अयि पर्णाशे एह्येहि ; गोदावरि एह्येहि । वेत्रवति, सिप्रे, ब्रह्मपुत्रे एह्येहि । एष भीषणो मरुरत्र सर्वानाकुलयितुमुद्यतो वर्तते । वयं सर्वा अप्येकीकृत्यावन्तीभ्यस्साल्वेभ्य आनर्तेभ्यश्च तमुन्मूलयितुं प्रयतामहे ।

(नेपथ्ये) आर्ये इयमागतास्मि ।

अनुशाधि = (शास् धातोः लोट्. म. ए.) नियोजय, शासनं कुरु. अनुगृहाण (लोट्. पर. म. ए.) अनुगृहीतां कुरु । अधिष्ठात्री = आधारभूता. एकता-पादकम् = ऐक्यसम्पादकम् । शक्नुयाम् । = शक्ता भवेयम् . अनवशिष्टानि कर्तव्यान्तराणि यस्याः सा, तस्याः बहूनि कर्तव्यानि अतोऽप्यवशिष्टानि सन्तीत्यर्थः । आर्षभणितिभिः = ऋषिवचनैः । अन्यतोऽसम्पृक्तायाः = अन्यैः सह न संबद्धायाः । राष्ट्रमीमांसा = राष्ट्रचिन्तागतिः ।

नेपथ्ये मरोः गर्जनं श्रूयते. जडाः = चैतन्यशून्याः । अपसरत = दूरं गच्छत. निर्ह्लादः = गर्जन.

पद्यम् – 40 सारः—मरुः सर्वमपि फलभूयिष्ठं प्रदेशं भस्मीकरिष्यतीति प्रतिजानीते । या नदी जलप्रवाहाणामन्तकं मां स्वैः प्रवाहैः जलार्द्रं कर्तुमि-च्छति तामहम् भस्मीकरिष्यामि । तथा यो नाम मेघः मत्पत्न्याः मरीचिकायाः सरसविलासेषु विघ्नकारी वर्तते सोऽपि मम श्वासोष्मणि भस्मीभविष्यति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिप्रा—(प्रविश्य) गंगे पश्य तावद्। तत्र स प्रकम्पनश्चक्रीभूतस्सन् संहारलीलामातनुते।

(नेपथ्ये) आर्ये इयमागतास्मि।

पर्णाशा—(प्रविश्य) आर्ये गङ्गे, तत्र सुदूरं दृष्टिं विक्षिप। स परिभीषणो मरुः शरीरेणोष्माणमुद्गिरन् मरीचिकामुरसा परिलालयन् नेत्राण्यन्धीकुर्वन्निव दृश्यते। एहि वयमद्भ्यः प्रार्थयामः। (अञ्जलिं बद्ध्वा)

41 पारियात्रक ते पुत्र्यै पर्णाशायै सृजेरपः।
अभितस्त्वां समाक्रान्तान् मरूनुत्सारयै यतः॥

सिप्रा—(अञ्जलिं बध्वा)

अथ च यो वा वृक्षो नगरं वा मद्वत्सस्य प्रकम्पनस्य स्वेच्छाविहारं सहमानो वर्तते सोऽपि मदभिमुखमायातु। मम श्वासवेगे स भस्मभूयम् नेष्यते।

क्लिन्नं = जलार्द्रं. चिकीर्षुः=कर्तुमिच्छुः। सरित्=नदी. पयसां= जलानां. अब्दः = मेघः। अन्तरायम् = विघ्नम्. यः अस्मद्वत्सस्य तीव्राहतिं विहतिं च सहते सः। पादपः = वृक्षः। सः अभ्यायातः अग्रतः। रभसतः = वेगात्. भस्मभूयम् = भस्मतां. 'त्वं' 'ता' इति भावार्थप्रत्यययोः स्थाने 'भूयं' अपि प्रयुज्यते, यथा—मर्त्यभूयम् = मर्त्यता, मर्त्यत्वं।

मरोः इदं अनिष्टम्। यया अहं एनं अनिष्टम् उत्सारयेयं। हन्त अहं अत्र एकाकिनी अस्मि। सर्वान् आकुलयितुं उद्यतः। अपि एकीकृत्य अवन्तीभ्यः साल्वेभ्यः। शरीरेण ऊष्माणम् उद्गिरन्। नेत्राणि अन्धीकुर्वन् इव। अद्भ्यः = जलाय।

पद्यम्—41 सारः— पर्णाशा पारियात्रकपर्वतात् प्रवहति। सा स्वपितरं पारियात्रकं जलं प्रार्थयते। तेन जलेन तत्पर्वतपरिसरेषु व्याप्तान् मरुप्रदेशान् दूरीकरिष्ये इति प्रतिज्ञां करोति। त्वां अभितः = तव परिसरे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

42 तात, बिन्ध्य जलं देहि सिप्रा प्रार्थयते सुता ।
त्वं धत्से शिरसा नित्यं प्रलयाम्भोभृतां शतम् ॥

(सर्वा नद्यः नववर्षसीकरस्पर्शसुखात् पुलकिताभवन्ति)

(ततः प्रविशति क्रोधविस्फारिताक्षो मरुः)

मरुः—अहो नु खलु भोः अपसरतापसरत । अयमस्माकं विहाररंगः । नो चेद् अस्माकमूष्मणि नियतमेव बाष्पीभविष्यथ । (नृत्यति गर्जत्युत्प्लुते च)

गङ्गा—(धैर्यमवलम्ब्य) किं जल्पसे जाल्म !

मरुः—(प्रत्येकां निर्दिशन्) अहो नु खलु भोः धिक् त्वां, धिक् तां, धिगेताम् । अये एवं भणथ । (पश्चाद्विलोक्य) प्रिये मरीचिके, त्वत्सदृक्ष्यः काश्चनात्रापि दृश्यन्ते । मामधिक्षिपन्ति च ।

43 त्वमिवैता नदन्त्युच्चैः चरन्ति च ललन्ति च ।
कचाः कुचास्त्वचश्चापि दृश्यन्ते तावका इव ॥

सिप्रा—(मरुं विलोक्य) अपसर दूरम् । अस्माभिः पुत्रीवन्त इति कथ्यन्ते कुलपर्वताः । तादृशीनामस्माकं पुरतः अकुलीनं मा भण । अपसर दूरम् ।

पद्यम्—42 सारः—सिप्रा विन्ध्यात् प्रवहति । ततः सा स्वपितरं प्रार्थयते । स पर्वतः स्वशिरसा प्रलयमेघानां शतं धरति । तस्मात् प्रभूतं जलं दातुं स शक्त इत्यर्थः ।

सीकरः = जलकणः । पुलकित = रोमाञ्चित. क्रोधविस्फारिताक्षः = रोषविकसितनेत्रः । ऊष्मणि = तापे. उत्प्लवते = कूर्दते Jumps. जल्पसे = असंबद्धं प्रलपसि. जाल्म = दुष्ट Rogue. त्वत्सदृश्यः = त्वया सदृश्यः ।

पद्यम्—43 सारः— मरुः स्त्रीस्वरूपिणीः गंगादिनदीः दृष्ट्वा भयाश्चर्यादिभिराविष्टः मरीचिकां आहूय कथयति । अयि मरीचिके त्वमिव एताः शब्दं कुर्वन्ति तथा सर्वमपि त्वमिव तन्वन्ति । त्वमिव एता अपि केशान् धरन्ति कुचान् च धरन्ति । त्वचश्च तवेव दृश्यन्ते, कचः = केशः । कुचः = स्तनः । त्वचः = चर्माणि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मरुः—(ससम्भ्रमम्) अहो नु खलु भोः। हन्त! मरीचिके क्वासि प्रेयसि! सकृन्मे देहि धैर्यम्। (विलोक्य) हन्त सा न दृश्यते। प्रेयसि मरीचिके! सर्वचराचरप्रतारणनिपुणे अधुना त्वं मां विसृज्य गतासि? (पुनरपि पश्चाद्विलोक्य) वत्स प्रकम्पन, एह्येहि। अयं ते पितृसाहाय्यस्यावसरः। किं न शृणोषि मम आकारितम्? क्व गतस्त्वं वत्स? (किञ्चिद्विचिन्त्य) द्वावपि न मामाकारयन्तं शृणुथः। (धैर्यमवलम्ब्य आत्मगतम्) अथवाऽहं पुरुषो भूत्वा स्त्रीणां शिशूनां च साहाय्यं किमर्थमर्थयामि। (प्रकाशं) का यूयम्? कुत्रत्याः? कुतोऽत्रागमनम्। युष्माकं शीतलिमा प्रलयानलसमप्रतापं मां बाधते। न मेऽयं रोचते। अपसरतास्मद्विषयात्।

गङ्गा—अयमस्मद्विषयः। त्वमितोऽपसर। नातः परं भारतखण्डे ते स्थितिः स्यात्।

मरुः—किमधिक्षिपथ उत भीषयथ? तर्ह्यस्मिन् मदूष्मणि यूयं भस्मीभविष्यथ। (इत्यूष्माणं विसृजति। नद्यः युगपदेव मरुमद्भिरासिञ्चन्ति। सिक्तं जलं सर्वमपि मरोरूष्मणि बाष्पीभवति।)

मरुः—(गर्जन्) अहमखिललोकभस्मीकरणचणो मरुमहाराजः। नैतद्युष्माकं विदितम्। अतः परं विदितं स्यात्। (गर्जन् नदीः उपसरति)

नद्यः—(ऊष्माणमसहमानाः) हा भूतधात्रि? हा तात!

गङ्गा—हा नाथ, हा तात!

(सर्वा मूर्छन्ति)

(उच्चैस्तरं गर्जन् उद्बाहुः इतस्ततः प्रस्खलन् समुद्रः प्रविशति। मरुर्भयविह्वलो भूत्वा मन्दमन्दमपक्रामति)

समुद्रः—(मूर्च्छितगङ्गां विलोक्य) हन्त किमेतत्संवृत्तम्? प्रिये कस्ते दुःखहेतुः। अयमस्मि ते परिक्लेशबन्धुः। (परितो विलोक्य) हन्त सिप्रे पर्णाशे किमत्र संवृत्तम्। (तिस्रोऽपि कराञ्चलेन स्पृष्ट्वा मुखानि निरीक्ष्य च) हा हा मूर्च्छिता यूयम्। को युष्माकं मूर्च्छनाहेतुः? प्रकृतिशीतला एताः ऊष्माभिहता इव लक्ष्यन्ते। (शीतलोपचारैः संवाहनादिभिरपि लब्धसंज्ञाः करोति।)

समुद्रः—(आत्मगतम्) हन्त! विचित्रं खलु नदीनां चरितं। यतः,

अस्माभिः....पर्वताः = वयं कुलपर्वतानां पुत्र्यः। क्व असि. सकृत् मे. विसृज्य = त्यक्त्वा. आकारितम् = आह्वानम्. द्वौ अपि. रोचते =

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

44 नीचैः प्रयान्ति परमोन्नतवंशजाताः
मालिन्यमाददति याः खलु नित्यशुद्धाः ।
सर्वत्र वक्रगतयोऽप्यृजुभावपूर्णाः
सृष्टिं भुवो विदधते प्रलयस्वरूपाः ॥

गङ्गा—(नयने उन्मील्य) अये आर्यपुत्र ! क्षमस्व मत्कृतानपराधान् ।

समुद्रः—(पाणिनाश्रु प्रमृज्य) प्रिये त त्वया किमप्यपराद्धम् ।

(सिप्रा पर्णाशा च नयने उन्मीलयतः)

सिप्रा—आर्यपुत्र ! कथमेतत् (निरीक्ष्य) नन्वार्यपुत्र एव ।

पर्णाशा—अहो कथमयमार्यपुत्रः ।

समुद्रः—हां आर्यपुत्र एव । समाश्वसिहि । अथ को युष्माकं वैवश्यहेतुः । अयमस्मि सर्वेषां परिक्लेशबन्धुः । किमधुना युष्माकमीहितमस्ति ।

प्रियं भवति. युगपद्=तस्मिन्नेव क्षणे. मरुं अद्भिः=जलेन, भस्मीकरणचणः= भस्मीकरणनिपुणः । 'चञ्चु' 'चण' इति प्रत्ययौ समर्थ इत्यर्थे समस्यते । भाषणचञ्चुः, भाषणचणः=भाषणे समर्थः ।

पद्यम्—44 सारः—समुद्रो नदीनां जीविते दृश्यमानं वैरुध्यं चित्रीकरोति । नद्यः पर्वतानां उन्नतकुले जाताः तथापि ताः नीचैः प्रयान्ति । नित्यशुद्धाः ताः सर्वाण्यपि मालिन्यानि स्वीकुर्वन्ति । ताः सर्वत्र वक्रं गच्छन्ति, तथापि तासां हृदयं आर्जवेन पूर्णम् । प्रलयस्वरूपाः ता एव विश्वस्य सृष्टिं विदधति च । अश्रु=बाष्पं ।

वक्रगतयः अपि ऋजु....... । भूः=भूमिः । भुवः (ऊ, स्त्री, ष, ए) जीवनं=जलं. कुत्र, असौ, आसन्नमृत्युः=मरणान्तिकगतः । कुत्र, अपि अत्र, एव । अन्तर्हितः=तिरोभूतः । यावदागच्छामि=आगमिष्यामि रौति= शब्दं करोति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तिस्रः—आर्यपुत्र जीवनं देहि, येन वयं मरुमुत्सारयेम ।

समुद्रः—कुत्रासावासन्नमृत्युर्मरुः ।

गङ्गा—कुत्राप्यत्रैव अन्तर्हितः स्यात् ।

समुद्रः—क्षणमत्र तिष्ठत । अहं यावत् तं गृहीत्वा आगच्छामि । (निष्क्रामति)

(नेपथ्ये)

हन्त सर्वमपि दग्धं विदग्धम् ।

सिप्रा—आर्ये कस्यायमार्तनादः । (पुनरपि नेपथ्ये)

सर्वमपि नष्टम्, विनष्टम् ।

(आर्तनादं कृत्वा अग्रे धावन्तौ दुर्भिक्षमहारोगौ अनुसरन् फलमूलैः ओषधिभिश्चावृतशरीरो हिमालयः प्रविशति ।)

दुर्भिक्षम्—हन्त सर्वमपि पिष्टं प्रपिष्टम् ।

महारोगः—हन्त हताः स्मः ।

हिमालयः—धावतं धावतम् । इतः परमस्मत्कर्मभूमौ मा पदं कुरुतम् ।

द्वौ—यथा भवानादिशति । न पदं करवाव । न पदं करवाव ।

(मरुं कण्ठे गृहीत्वा समुद्रः प्रविशति)

मरुः—मुञ्च मां देव, मुञ्च मां भाव । (इति दयनीयं रौति)

समुद्रः— अरे ।

45 यियासुस्त्वं पिपासुस्त्व पिब तावज्जलं बहु ।
गर्भिण्या इव ते कुक्षिरुद्गच्छतु यथासुखम् ॥

(इति जलं पाययति । मरुः कम्पते नेत्रं विस्फारयति च ।)

(सर्वेपि विविधान् भावान् प्रकटय्य परस्परमवलोकयन्ति)

समुद्रः—(हिमालयस्यान्तिकं गत्वा) तात, वन्दे । अयं जलसंभारः स्वीक्रियताम् । (नदीः प्रति) गंगे सिप्रे पर्णाशे आयात । तत्रभवतः पितुः शिरसो जलसंभारमादाय मृदुलमृणालशीतलैः करैः मरुमासिञ्चत । (तिस्रोऽपि तथा कुर्वन्ति । मरुस्सहसैव सस्यश्यामलस्सुरभिलश्च संजायते)

पद्यम्—45 सारः—समुद्रः मरुं गृहीत्वा वदति । यदि त्वं यातुमिच्छसि, पातुमिच्छसि, तर्हि पिब । तव कुक्षिः गर्भिण्याः कुक्षिरिव जृंभतु ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मरुः—(प्रसन्नः बाष्पमुद्गिरन् सगद्गदः हिमालयमुपसृत्य पादयोः पतन्)

46 समं वसन् पापजनैरहर्निशम्
समापतं कुत्सितपापकर्मसु ।
ततस्समुत्तारयिता त्वमद्य मे
क्षमस्व मां पुत्रधिया शतागसम् ॥

हिमालयः—(मरुं हस्तेन गृहीत्वा) उत्तिष्ठ वत्से !

मरुः—तात नियुङ्क्ष्व मामभिमतेषु कृत्येषु ।

हिमालयः—प्रभूतैरुत्पादितैरन्नैस्त्वं कर्मभूमेरस्याः सेवां कुरु । अस्या ऐक्यं आपादयितुं अयमद्वितीयो मार्गः ।

मरुः—तातस्य प्रभावात् ।

हिमा—वर्धस्व वत्स (इत्याशीर्वदति)

मरुः—तात, किमित. परं ते हितं करोमि ।

हिमा—किमतः परं हितमस्ति । तथापीदं भवतु भरतवाक्यम् ।

(सर्वे मुकुलितहस्ताः एककण्ठतालयं गायन्ति ।)
बहुविधैर्मतैर्धर्मकर्मभिर्विभव-रीति-विश्वास-जीवनैः,
बहुविधाप्यनूनैक्यशोभिनी विजयतां चिरं भारतावनी ।
क्वचन पर्वताः पल्वलाः क्वचित् कुहचनर्द्धकेदारभूमयः
बहुविधैवमप्यैक्यभासिनी विजयतां चिरं भारतावनी ।
सधननिर्धनैः प्राज्ञपामरैः अलसजागरूकैश्च मानवैः
बहुविधाऽप्यमन्दैक्यहारिणी विजयतां चिरं भारतावनी ॥

(यवनिका)

॥ शुभं भूयात् ॥

पद्यम्— 46 सारः—मरुः पश्चात्तापविवशः सन् हिमालयं क्षमां प्रार्थयते । अहं पापजनैः सह अवसम । अतः नीचेषु पापेषु च कर्मसु आसक्तश्चाभवम् । तस्मात् कुत्सितजीवितात् त्वमेव मां उदतारयः । अहं तव पुत्र इति मत्वा शतापराधिनं मां क्षमस्व ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहर्निशम् = रात्रिन्दिवम्. पुत्रधिया = पुत्र इति बुद्ध्या. शतागसं= शतापराधिनं शतं आगांसि यस्य सः = शतागाः । आगस् सकारान्तः । नियुङ्क्ष्व = नियोगं कुरु. प्रभूतैः = समृद्धैः । आपादयितुम् = जनयितुम् ।

भरतवाक्यम्—नाटकादीनां अन्ते क्रियमाणा प्रार्थना । सारः—विविधैर्धर्मैर्विश्वासैश्च बहुविधापि इयं भारतभूमिः ऐक्येन विजयताम् । बहुविधा, अपि, अनून = पूर्ण. पल्वलाः = तटाकाः । कुहचन, ऋद्ध = समृद्ध. पर्वतैः पल्वलैः कैदरैश्च बहुविधापि भारतभूमिः परिपूर्णैक्येन विजयताम् । बहुविधा, एवं अपि, ऐक्य.... । धनिकैर्दरिद्रैः मूढैः पण्डितैः अलसैः जागरूकैश्च वैविध्यपूर्णापि भारतभूमिः निरन्तरैक्येन विजयताम् ॥

॥ चतुर्थोऽङ्कः शुभं भूयात् ॥

—•—

॥ अभ्यासः ॥

I पदानि विश्लेष्य सन्धिकार्याणि विशदयत—

1) कर्मभिस्तदर्थैरेव. 2) इतोऽप्यधिकानि. 3) महारोग इत एवाभिगच्छति. 4) अयाह्यास्यताम्. 5) सातिवृष्टिरिति. 6) पुत्राविमावास्तां. 7) आवामरिभिरप्यनतिक्रमणीयस्यातिथेयावास्व. 8) पाणिनिस्त्वेवमाह ।

II विश्लिष्टानि पदानि सन्धत्त—यथा—पुनः च इतः ततः भ्राम्यन् च एतया आनीतं अंभः आस्वदन् च = पुनश्चेतस्ततो भ्राम्यंश्चैतयानीतमम्भ आस्वदंश्च ।

1) यत् जायते इति अभिधीयते. 2) तत् म्रियते एव इति एतत् न असत्यम्. 3) ईश्वरः सर्वस्मिन् अपि अस्ति इति अभिमतम्. 4) ऋते अस्मात् अस्माकं अन्यः न अवलंबः अस्ति । सत्त्वं रजः तमः च इति त्रयः गुणाः मुनिभिः आख्याताः ।

III स्थूलमुद्रितानां पदानां अन्तलिङ्गविभक्तिवचनानि अथवा लकारपदपुरुषवचनानि निर्दिशत ।

बुद्धिमतां औदार्यमावश्यकं । त्वं तेन कर्मणा **उत्तमतां** गतः । छन्दश्शास्त्रे **मात्रा** प्राधान्येन परिगण्यते । अहं **मात्रा** सह गमिष्यामि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवतां अनुग्रहेण सः सुखं जीवति । भवन्तौ सुहृदौ भवतां । मयि जीवति कुतः ते भयमस्ति । यथा ते अवदतां तथा ते कुर्वन्ति । हे स्मरेयं विरहिणं मां दहति । अहं त्वां सदापि स्मरेयं । अचराणि चराणि च बहूनि वस्तूनि लोके सन्ति । अहं प्रतिदिनं पादचारं चराणि ?

IV पाठालये नवागतं अध्यापकं अधिकृत्य पाठशालायाः प्रतिनिवर्तमानैः द्वित्रैः बालकैः कृतम् संवादम् स्वभावनानुरूपम् लिखत ।

V अद्य पठितं एकभारतभागम् अनुवदत ।

VI अष्टमे दिवसे दर्शितानां उपसर्गसहितानां क्रियापदानां भूतकाले (लिट् & लङ्) रूपाणि लिखत । यथा-अतिक्रामति-अतिचक्राम, अत्यक्रामत् । उल्लिखामि-उल्लिलेख, उदलिखम् ।

VII सप्तमाष्टमदिनपाठयोः विषया आवर्तनेन दृढीक्रियन्ताम् ।

—०—

सूचना—धातूनामात्मनेपदपरस्मैपदविभागः पूर्णक्रियाणां (लकाराणां) तथा शतृशानच्प्रत्यययोश्च विषये एवावश्यकः । अन्यरूपाणां निष्पादने पदपरिगणना नावश्यकी । यथा—पठति भाषते । अपठत्, अभाषत । पठत्, भाषमाण इत्यादि पदभेदानुरूपम् रूपभेदोपि जायते । पठित्वा भाषित्वा, पठितुं भाषितुं, पठनं भाषणं, पठिता भाषिता, इत्यादिषु पदभेदो रूपभेदस्य कारणं न भवति ।

कर्मभावप्रयोगयोः परस्मैपदप्रत्ययाः कदापि न प्रयुज्यन्ते ।

कर्मणि भावे च विहितः 'य' प्रत्ययः सार्वधातुकरूपेष्वेव दृश्यते । यथा—लिख्यते, अलिख्यत, लिख्यमान स्थीयताम् आदयः । आर्धधातुकलकारेषु केवलमात्मनेपदीकरणमेवावश्यकम् । यथा–(कर्तरि) बभूव, करिष्यति लिलेख । (कर्मणि) बभूवे, करिष्यते, लिलिखे । स पत्रं लिलेखे तेन पत्रं लिलिखे । रामः रावणं हनिष्यति—रामेण रावणः हनिष्यते । सा गजं द्रक्ष्यति, तथा गजः द्रक्ष्यते । पठिष्यति, द्रक्ष्यते इत्यादिषु दृश्यमानो यकारो न कर्मणि य-प्रत्ययः, किन्तु इष्य स्य इति प्रत्यययोरन्तर्गतो यकार एव ।।

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चत्रिंशो दिवसः

अथ पुराणकाव्यादिपरिचयार्थं छात्राणां स्वयमवबोधशक्त्युत्पादानार्थं च रामायणमहाभारतादिभ्यः केचन भागा अत्रोद्ध्रियन्ते। प्रथमतः सामान्य-बोधार्थं पाठभागः साकल्यतः छात्रैः सम्यक् पठनीयः। तत एकैकेषां पद्यानां विशेषपठनमारब्धव्यम्। तेषां अन्वयरीत्या पदानि सन्निवेश्य पदानां विभक्तिलकारादिकं स्वयं परिचेतव्यम्। ततस्तेषामनुवादश्च करणीयः। इयमत्र स्वीकरणीया पठनरीतिः।

वाल्मीकिरामायणम्

बालकाण्डे (६८) अष्टषष्टितमः सर्गः।

विश्वामित्रः रामलक्ष्मणाभ्यां सह मिथिलां प्राप। रामः सीता-विवाहार्थं तत्र विन्यस्तं धनुः बभञ्ज। जनकः तुष्टोऽभवत्। स दशरथमानेतुं दूतान् अयोध्यां प्रेषयामास दूताः अयोध्यां प्रापुः।]

जनकेन समादिष्टा दूतास्ते क्लान्तवाहनाः।
मार्दे त्रिरात्रमुषिता अयोध्यां प्राविशन् पुरीम्॥ १॥
ते राजवचनाद्दूता राजवेश्म प्रवेशिताः।
ददृशुर्देवसंकाशं वृद्धं दशरथं नृपम्॥ २॥
बद्धाञ्जलिपुटाः सर्वे दूता विगतसाध्वसाः।
राजानं प्रश्रितं वाक्यमब्रुवन्मधुराक्षरम्॥ ३॥

[पद्यम्—1 समादिष्ट = आज्ञप्त। क्लान्तवाहनाः = क्लान्ता वाहना येषां ते, अर्थात् क्षीणैः अश्वैः सहिताः। उषित = वस् + इ + त। 'वस्' धातोः वकारः क्वचन स्वरीभवति। उषिताः = वासं कृतवन्तः। लिट्—उवास—ऊषतुः—ऊषुः। उषित्वा, प्रोष्य = प्रवासं कृत्वा। क्वसु = ऊषिवस्।

2. वेश्म (न. न. द्वि. ए.) = भवनं। सङ्काश = सदृश। बद्धाञ्जलि-पुटाः = अञ्जलिपुटानि बध्वा। साध्वसं = भयं। विगतं साध्वसं येषां ते साध्वस-रहिता इत्यर्थः। प्रश्रित = विनीत। अब्रुवन् = अकथयन्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"वैदेहो जनको राजा पृच्छति त्वां नराधिप ।
कुशलानामयं स्निग्धं सामात्यं सपुरोहितम् ॥ ४ ॥

पृष्ट्वा कुशलमव्यग्रं वैदेहो मिथिलाधिपः ।
कौशिकानुमते वाक्यं भवन्तमिदमब्रवीत् ॥ ५ ॥

"पूर्वं प्रतिज्ञा विदिता वीर्यशुल्का ममात्मजा ।
राजानश्च कृतामर्षा निर्वीर्या विमुखीकृताः ॥ ६ ॥

सेयं मम सुता राजन्विश्वामित्रपुरःसरैः ।
यदृच्छयागतैर्वीरैर्निर्जिता तव पुत्रकैः ॥ ७ ॥

तच्च रत्नं धनुर्दिव्यं मध्ये भग्नं महात्मना ।
रामेण हि महाबाहो महत्यां जनसंसदि ॥ ८ ॥

अस्मै देया मया सीता वीर्यशुल्का महात्मने ।
प्रतिज्ञां तर्तुमिच्छामि तदनुज्ञातुमर्हसि ॥ ९ ॥

सोपाध्यायो महाराजपुरोहितपुरस्कृतः ।
शीघ्रमागच्छ भद्रं ते द्रष्टुमर्हसि राघवम् ॥ १० ॥

---

5. अनामयं = सौख्यं । स्निग्धं = सस्नेहं । सामात्यं = अमात्यैः सह । 4. अव्यग्रं = समस्तं । वैदेहः = जनकः । 6. विदित = ज्ञात । शुल्कं= स्त्रीधनं । वीर्यमेव शुल्कं यस्याः सा । यो वीरतां प्रदर्शयति तस्मै एव आत्मजा दास्यते इति जनकस्य प्रतिज्ञा आसीत् । अमर्षः = कोपः । कृतामर्षाः=अमर्षं कृतवन्तः 7. यदृच्छया आगतैः वीरैः निर्जिता । पुत्रकैः सुता निर्जिता = पुत्रकाः सुतां निरजयन् । पुत्रकः = पुत्रः । कोमलत्व-मल्पत्वं वा द्योतयितुं 'क'—प्रत्ययो नामभिः सह यथोचितं प्रयुज्यते । कन्यका= कन्या । बालिका = बाला । लतिका = लता । 8. रत्नं धनुः= उत्तमश्चापः । संसद् = सभा । 9. अस्मै देया मया सीता =अहं सीतां अस्मै यच्छेयम् । तर्तुं=तरणं कर्तुं, निर्वोढुं । त्वं अनुज्ञातुं अर्हसि=त्वया अनुज्ञा करणीया । भवन्तः सत्यं वक्तुमर्हन्ति = भवद्भिः सत्यं वक्तव्यं । तं सन्तः श्रोतुमर्हन्ति=स सद्भिः श्रोतव्यः । 10. द्रष्टुमर्हसि राघवं=त्वया

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिज्ञां मम राजेन्द्र निर्वर्तयितुमर्हसि ।
पुत्रयोरुभयोरेव प्रीतिं त्वमुपलप्स्यसे" ॥ ११ ॥

एवं विदेहाधिपतिर्मधुरं वाक्यमब्रवीत् ।
विश्वामित्राभ्यनुज्ञातः शतानन्दमते स्थितः ॥ १२ ॥

दूतवाक्यं तु तच्छ्रुत्वा राजा परमहर्षितः ।
वसिष्ठं वामदेवं च मन्त्रिणश्चैवमब्रवीत् ॥ १३ ॥

गुप्तः कुशिकपुत्रेण कौसल्यानन्दवर्धनः ।
लक्ष्मणेन सह भ्रात्रा विदेहेषु वसत्यसौ ॥ १४ ॥

दृष्टवीर्यस्तु काकुत्स्थो जनकेन महात्मना ।
संप्रदानं सुतायाः स राघवे कर्तुमिच्छति ॥ १५ ॥

यदि वो रोचते वृत्तं जनकस्य महात्मनः ।
पुरीं गच्छामहे शीघ्रं मा भूत्कालस्य पर्ययः ॥ १६ ॥

मन्त्रिणो बाढमित्याहुः सह सर्वैर्महर्षिभिः ।
सुप्रीतश्चाब्रवीद्राजा श्वो यात्रेति स मंत्रिणः ॥ १७ ॥

मंत्रिणस्तु नरेन्द्रस्य रात्रौ परमसत्कृताः ।
ऊषुः प्रमुदिताः सर्वैः गुणैः सर्वैं समन्विताः ॥ १८ ॥

राघवो द्रष्टव्यः । 12. शतानन्दः = जनकस्य पुरोहितः । 13. मन्त्रिणः च एवं अब्रवीत् । 14. गुप्तः = रक्षितः । कुशिकपुत्रः = विश्वामित्रः । 15. गच्छामहे—वाल्मीकेः काले परस्मैपदात्मनेपदभेदो नासीदित्यस्येदम् अतिस्पष्टमुदाहरणम् । पर्ययः = विलंबः, मा भूत् = न भवेत् । मा इत्यव्ययोगे भूतकालस्य अकारो लुप्यते इत्यतः अभूत् इति रूपं भूत् इति परिणतम् । बाढम् = alright.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाभारतम् —१

वनपर्वणि अष्टपञ्चाशत्तमोऽध्यायः ।

प्रकरणम् — नलोपाख्याने कलेः देवानां च संवादः ।

अथ महाभारतभाषापरिचयमाधातुं तस्मात् ग्रन्थरत्नात् कमप्यंशं उद्धर्तुमिच्छामि । पाण्डवानां वनवासकालः । एकस्मिन् अवसरे बृहदश्वो नाम कश्चित् महान् ऋषिः तत्राजगाम । युधिष्ठिरस्तु तं यथाविधि पूजयामास । स महर्षिः पाण्डवमनःसमाश्वासनार्थं नलकथां प्रस्तौति । " नलस्तु तादृशः कश्चिद् राजा आसीत् यः स्वधर्मात् न व्यतिचचाल । अतः सः अन्ते आनन्दं लेभे । हे युधिष्ठिर, भवानपि भ्रात्रादिभिः सह आपदि समापतितः । एतादृश्यां दशायां भवद्भिः स्थिरचित्तैः वर्तितव्यम् । विजयो निश्चित एव । " ईदृशं तत्त्वं नलकथाद्वारा स मुनिः कथयित्वा पाण्डवान् आश्वासयति ।

पाठसंक्षेपः— इन्द्रादीनां समक्षं नलः दमयन्तीं पर्यणयत् । नीराशा अपि अनुरूपदम्पत्योर्मेलनेन सन्तुष्टा इन्द्रादयो लोकपाला विदर्भनगरात् प्रतिन्यवर्तन्त । मध्येमार्गं ते द्वापरेण सह आयान्तं कलिं ददृशुः । कलिरपि दमयन्तीं कामयमानः तत्परिणयार्थमेव आगच्छन्नासीत् । दमयन्त्याः नलेन सह विवाहः सञ्जात इति इन्द्रमुखात् श्रुत्वा कलिरसूयालुरभवत् । नलः एतस्मिन् विषये दण्डनीय इति कलिरभाषत । दमयन्त्या नलपरिणय उचित एवेति इन्द्रादयः कलिमाभाष्य स्वर्गं ययुः । कलिः ' नलं भ्रष्टराज्यं करिष्यामि ' इति शपथं करोति ।

बृहदश्व उवाच

वृते तु नैषधे भैम्या लोकपाला महौजसः ।
यान्तो ददृशुरायान्तं द्वापरं कलिना सह ॥ १ ॥

[पद्यम् 1—अन्वयः--- नैषधे भैम्या वृते सति यान्तः महीपालाः कलिना सह आयान्तं द्वापरं ददृशुः वृते सति = यदा अव्रियत तदा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथाब्रवीत् कलिं शक्रः सम्प्रेक्ष्य बलवृत्रहा ।
द्वापरेण सहायेन "कले ब्रूहि क्व यास्यसि" ॥ २ ॥

ततोऽब्रवीत् कलिः शक्रं "दमयन्त्याः स्वयंवरम् ।
गत्वा हि वरयिष्ये तां मनो हि ममतां गतम्" ॥ ३ ॥

तमब्रवीत् प्रहस्येन्द्रो "निर्वृत्तः स स्वयंवरः ।
वृतस्तया नलो राजा पतिरस्मत्समीपतः" ॥ ४ ॥

एवमुक्तस्तु शक्रेण कलिः कोपसमन्वितः ।
देवान् आमन्त्र्य तान् सर्वान् उवाचेदं वचस्तदा ॥ ५ ॥

"देवानां मानुषं मध्ये यत् सा पतिमविन्दत ।
ततस्तस्या भवेद् न्याय्यं विपुलं दण्डधारणम् ॥ ६ ॥

एवमुक्ते तु कलिना प्रत्यूचुस्ते दिवौकसः ।
"अस्माभिः समनुज्ञाते दमयन्त्या नलो वृतः ॥ ७ ॥

का च सर्वगुणोपेतं नाश्रयेत नलं नृपम् ।
यो वेद धर्मानखिलान् यथावच्चरितव्रतः ॥ ८ ॥

योऽधीते चतुरो वेदान् सर्वानाख्यानपञ्चमान् ।
नित्यं तृप्तो गृहे यस्य देवा यज्ञेषु धर्मतः ॥ ९ ॥

अहिंसानिरतो यश्च सत्यवादी दृढव्रतः ।
यस्मिन् दाक्ष्यं धृतिर्ज्ञानं तपः शौचं मदः शमः ।
ध्रुवाणि पुरुषव्याघ्रे लोकपालसमे नृपे ॥ १० ॥

---

2. अब्रवीत् = अवदत्, अवोचत् । शक्रः = इन्द्रः । बलस्य वृत्रस्य च हन्ता । 'हन्' नकारान्तः, तस्य प्रथमा वृत्रहा । सहायः = सखा । ब्रूहि = कथय । प. 5. आमन्त्र्य = आहूय । उवाच —ऊचतुः—ऊचुः, 'वच्' धातोः लिट्; अवदत् । प. 6. अन्वयः – यद् (यस्मात्) देवानां मध्ये सा मानुषं पतिं अविन्दत (अलभत) ततः तस्याः न्याय्यं विपुलं दण्डधारणं भवेत् । प. 7. अस्माभिः समनुज्ञाते (सति) = अस्मदाज्ञानुसारमेव । (सप्त प्रभृति (आरभ्य) द्वादश-पर्यन्तम् पद्यैः नलस्य गुणगणान् कीर्तयति ।) ध्रुवाणि = दृढानि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवंरूपं नलं यो वै कामयेच्छपितुं कले ।
आत्मानं च शपेन्मूढो हन्यादात्मानमात्मना ॥ ११ ॥

एवंगुणं नलं यो वै कामयेच्छपितुं कले ।
कृच्छ्रे स नरके मज्जेदगाधे विपुले ह्रदे " ॥ १२ ॥

एवमुक्त्वा कलिं देवा द्वापरं च दिवं ययुः ।
ततो गतेषु देवेषु कलिर्द्वापरमब्रवीत् ।
"संहर्तुं नोत्सहे कोपं नले वत्स्यामि द्वापर ॥ १३ ॥

भ्रंशयिष्यामि तं राज्यात् न भैम्या सह रंस्यते ।
त्वमप्यक्षान् समाविश्य साहाय्यं कर्तुमर्हसि " ॥ १४ ॥

महाभारतम् — २

[पौराणिकगद्यशैल्याः परिचयमाधातुं महाभारतात् कमपि भागमत्रोद्धर्तुमिच्छामि । पद्यभूयिष्ठे तस्मिन् महाग्रन्थे गद्यानि नितरां विरलानि । तथापि तेषां सारल्यं अनुभववेद्यमेव ।]

आयोद इत्यपरनाम्ना विख्यातस्य धौम्यमहर्षेः त्रयः शिष्या आसन्, आरुणिः उपमन्युः वेद इति ।

एकस्मिन् दिने धौम्यः स्वशिष्यमारुणिं प्रातः शालीक्षेत्रसंरक्षणार्थं नियुयोज । तत्र गत्वा आरुणिः क्षेत्रसेतुं भग्नं ददर्श स शिलाशकलैः मृत्पिण्डैश्च भग्नं सेतुं सम्यग् बन्धुं यत्नमकरोत् । यन्नो विफलोऽभवत् । अन्ते स एव स्वयं भग्ने स्थले प्रवाहमध्ये शयानो जलधारां रुरोध । सः तत्रैव अशेत ।

अत्र तु आश्रमे महर्षिर्धौम्यः शिष्यैः सह मध्याह्नप्राशनार्थमुपाविशत् । शिष्यानन्तरा स अरुणिं न ददर्श । "आरुणिर्नात्र दृश्यते । स कुत्र गतः ? आः स मया प्रातः शालिक्षेत्रं प्रेषितः" धौम्यः सस्मार । स झटित्येव शिष्यैः

कामयेत् = इच्छेत् । ह्रदः = नदीनां अगाधः प्रदेशः । संहर्तुं = नियन्त्रितुम् रंस्यते = आनन्दमनुभविष्यति = रम् + स्य + ते । अक्षः = द्यूतोपकरणम् । वत्स्यति = वस् + स्य + ति । मज्जेत् = मग्नो भवेत् ।]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सह शालीक्षेत्रं गतः स अरुणिं आजुहाव, तत्रैव तथैव शयानं तं ददर्श च। शिष्यस्यात्मगुणैः सन्तुष्टो धौम्य, तमनुगृह्य लोकसेवार्थं प्रेषयामास।]

महाभारते आदिपर्वणि तृतीयोऽध्यायः॥

एतस्मिन्नन्तरे कश्चिदृषिर्धौम्यो नामाऽयोदः; तस्य शिष्यास्त्रयो बभूवुः उपमन्युरारुणिर्वेदश्चेति।

स एकं शिष्यमारुणिं पाञ्चाल्यं प्रेषयामास, "गच्छ केदारखण्डं बधान" इति।

स उपाध्यायेन सन्दिष्ट आरुणिः पाञ्चाल्यस्तत्र गत्वा तत् केदारखण्डं बन्धुं नाशकत्। स क्लिश्यमानोऽपश्यदुपायम्; "भवतु एवं करिष्यामि" इति।

स तत्र संविवेश केदारखण्डे; शयाने च तथा तस्मिंस्तदुदकं तस्थौ।

ततः कदाचिदुपाध्याय आयोदो धौम्यः शिष्यानपृच्छत् "क्व आरुणिः पाञ्चाल्यो गत" इति।

ते तं प्रत्यूचुः "भगवन्, त्वयैव प्रेषितो" गच्छ केदारखण्डं बधानेति।" स एवमुक्तस्तान् शिष्यान् प्रत्युवाच। "तस्मात् तत्र सर्वे गच्छामो यत्र स गत" इति।

स तत्र गत्वा तस्याह्वानाय शब्दं चकार। "भो आरुणे पाञ्चाल्य, क्वासि वत्स एहि" इति।

स तच्छ्रुत्वा आरुणिरुपाध्यायवाक्यं तस्मात् केदारखण्डात् सहसोत्थाय तमुपाध्यायमुपतस्थे।

प्रोवाच चैनं, अस्म्यत्र केदारखण्डे निःसरमाणमुदकं अवारणीयं संरोद्धुं संविष्टो भगवच्छब्दं श्रुत्वैव सहसा विदार्य केदारखण्डं भवन्तमुपस्थितः।

तदभिवादये भगवन्तं आज्ञापयतु भवान् कमर्थं करवाणीति।

[केदारखण्डं = शालीक्षेत्रखण्डं। बधान (बध्, लोट्. पर. म. ए.) मग्नं क्षेत्रसेतुं बद्ध्वा जलप्रवाहं निवारय इत्याशयः। पाञ्चाल्यः = पाञ्चालदेशीयः अशकत् = शक्तोऽभवत्। संविवेश = अशेत lay. एहि = आगच्छ। विदार्य = भित्वा। अवाप्स्यसि = लप्स्यसे। प्रतिभास्यन्ति = यथा समयं मनसि समुन्मेषिष्यन्ति।]

44

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स एवमुक्त उपाध्यायः प्रत्युवाच ; "यस्मात् भवान् केदारखण्डं विदीर्योत्थितस्तस्मादुद्दालक एव नाम्ना भवान् भविष्यति" इत्युपाध्यायेन अनुगृहीतः ।

"यस्माच्च त्वया मद्वचनमनुष्ठितं तस्माच्छ्रेयोऽवाप्स्यसि । सर्वे च वेदाः प्रतिभास्यन्ति सर्वाणि च धर्मशास्त्राणीति ।"

स एवमुक्त उपाध्यायेनेष्टं देशं जगाम ।

।। प्रयोगविशेषाः ।।

'एवमुक्तस्तु शक्रेण' 'एवमुक्ते तु कलिना' इत्यादिप्रयोगेषु कः कं वदति, को वक्ता, कः श्रोता इति भ्रमो जायेत । एतत् प्रयोगवैचित्र्यमधिकृत्य एकादशे दिवसे विवृतमेव । तदेव दृढीकर्तुं अत्र कतिचनोदाहरणान्यपि दीयन्ते ।

शक्रेणोक्तः कलिरुवाच=शक्रः कलिमुक्तवान् ; तत् श्रुत्वा कलिरुवाच । भरतेनर्थितो रामः स्वीचकार न मेदिनीम्=भरतो राममभ्यर्थयामास, एवमर्थितो रामो मेदिनीं न स्वीचकार, इत्यादिप्रयोगेष्वर्थग्रहणं सुशकमेव । किन्तु एवमुक्ते तु कलिना" इत्यादौ उक्ते इत्येतत् पदं केन संबद्धमिति ज्ञातुं क्लेशलेशोऽनुभूयेत । अयं सप्तमीविभक्तेः विशेषप्रयोग इत्यवधार्यम्, यद् द्वादशे दिने सम्यग् विवृतमस्ति । यदायं वाक्यांशोऽपग्रथ्यते तदा 'कलिना इन्द्रे एवमुक्ते सति' अर्थात् 'यदा कलिः इन्द्रं एवमुवाच तदा इतीदृशं पूर्णरूपं भजति । 'पृष्टा सीता' 'उक्तः रामः' इत्यादिप्रयोगेषु सीता रामश्च केवलं श्रोतारौ ; न तु वक्तारौ भवतः । पृष्टा सीता इत्यस्य केनचित् पृष्टा सीता अर्थात् कश्चित् सीतामपृच्छत् तादृशी सीता इति तात्पर्यम् । तथैव उक्तः रामः इत्यस्य केनचित् राम उक्तः अर्थात् कश्चन राममुवाच, तादृशो राम इत्यर्थः । अत्र सीता रामश्च पृष्टा उक्तः इत्येतयोः कृत् प्रत्ययान्तयोः अंगक्रिययोः कर्मणी भवतः । अयं च कर्मणिप्रयोगः । अतोऽत्रकर्मणः प्राधान्यमस्ति । तस्मात् कर्मपदमेवात्र दृश्यते । कर्तुः प्राधान्याभावात् कर्तृपदमत्र न प्रयुक्तमिति ज्ञेयम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उक्ता शकुन्तला मुग्धं प्रत्युवाच नराधिपम् ।

'श्रुतस्त्वं बहुशो भूप दृष्टस्त्वं न नराधिप' ।

एवं निगदिते भूपे बभूव प्रीतमानसः ।

अत्र उक्ता शकुन्तला इत्यत्र न खलु शकुन्तलायाः कर्तृत्वमस्ति । दुष्यन्तेन उक्ता शकुन्तलेत्यवधार्यम् । यदि शकुन्तलायाः कर्तृत्वविवक्षितं तर्हि शकुन्तला उक्तवती (दुष्यन्तं) इति भाव्यम् । तथैव श्रुतस्त्वमित्यत्र मया त्वं श्रुतः अर्थात् अहं त्वां श्रुतवतीत्यर्थः । दृष्टस्त्वं न =मया त्वं न दृष्टः (अहं त्वां न दृष्टवती) । एवं निगदिते भूपे=यदा तया भूपः एवं निगदितः (कथितः) तदा अर्थात् तस्यां भूपं एवं उक्तवत्यां=यदा सा भूपं एवमुवाच तदा ।

इदमत्र विशिष्य स्मरणीयम् —क्तप्रत्ययेन युक्तः सकर्मको धातुः लिंग-वचन-विभक्तिषु कर्मणा सह संबध्नाति । कर्तुः प्राधान्याभावात् प्रायशो वाक्ये कर्ता न दृश्यते । यदि स एव क्तप्रत्ययः अकर्मकधातुभिः सह प्रयुज्यते तर्हि सा अंगक्रिया लिंगादिषु कर्तृपदेन सह संबध्नाति । अकर्मकत्वात् कर्मणा सह बन्धस्यावकाशोपि न संभवति । अधोदत्तेभ्यो वाक्येभ्य उक्तं स्पष्टं भवति ।

सकर्मकांगक्रियाः	अकर्मकांगक्रियाः
हते रावणे लङ्का शून्याऽभवत्	तीरे **स्थितस्य** वृक्षस्य शाखा **छिन्नाः** ।
ताडितानां बालानां एकः आक्रन्दत् ।	गृहमागतः सखा **प्रतिनिवृत्तः** ।
न **कृतं** सुकृतं किञ्चित् ।	**जातस्य** हि ध्रुवो मृत्युः ।

अत्र सकर्मकक्रियाः तासां कर्मभिः तथा अकर्मकक्रियाः कर्तृभिश्च बद्धा इति स्पष्टमेव । हत इत्यत्र हननक्रियाया कर्मैव रावणः । रामेण इति कर्तृपदस्य प्राधान्यं न विवक्षितम् । अतस्तन्नात्र प्रयुक्तम । स्थित इत्येतदकर्मकम् । अतस्तद् वृक्षेण संबध्नाति ।

आशयानामाविष्करणे कालप्रकारयोर्वैविध्यात् रूपाण्यपि विविधानि भवन्ति । तेषां सर्वेषामपि प्रकाशनार्थं कस्यामपि भाषायां पर्याप्ताः प्रत्यया न विद्यन्ते । अन्यधातूनामनुप्रयोगेणैव तादृशमर्थवैचित्र्यं वैविध्यं च स्पष्टी-क्रियते । जाता है, जा रहा है, जाया करता है, इत्यादयो हिन्दीभाषायां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

He writes, He is writing, He has written इत्यादय आंगल्यां चास्य वैचित्र्यस्योदाहरणानि । हिन्द्यां रह, कर इत्येतयोः धात्वोः आंगल्यां be, have इत्यनयोश्च अनुप्रयोग एव अत्र वर्तमानकाले अर्थवैचित्र्यं जनयति ।

कालप्रकारयोर्वैचित्र्यपरिचयार्थं तुलनात्मकतया पठनाय केचन प्रयोगा अत्र प्रदीयन्ते । एकस्यां भाषायां विद्यमानानां प्रयोगाणां समानाः प्रयोगाः अन्यस्यां भाषायां नैव सुलभं दृश्यन्ते । तथापि प्रयोगाणां सामान्यबोधार्थमिदं पर्याप्तं स्यादिति मन्ये ।

॥ अकर्मकः 'जीव्' धातुः कर्तरि भावे च ॥

१	स जीवति ।	He lives	वह जीता है ।
२	स जीवन् अस्ति ।	He is living	वह जी रहा है ।
३	स जीवन् आसीत् ।	He was living	वह जी रहा था ।
४	स जीवितः अस्ति ।	He has lived	वह जिया है ।
५	स जीवित आसीत् ।	He had lived	वह जिया था ।
६	स जीवन् स्यात् ।	He would be living	वह जी रहा होगा ।
७	स जीवितः स्यात् ।	He would have lived....	तो वह जीता ।
८	तेन जीवितमस्ति ।	He lives	उससे जिया जाता है ।
९	तेन जीवितमासीत्।	He lived	उससे जिया गया ।
१०	तेन जीवितं स्यात् ।	He would have lived	उससे जिया गया होगा ।
११	तेन जीवितव्यमस्ति ।	He has to live	उसको जीना है ।
१२	तेन जीवितव्यमासीत् ।	He had to live	उसको जीना था ।
१३	तेन जीवितव्यं स्यात् ।	He would have to live	उसको जीना होगा ।
१४	तेन जीविता भवितव्यं	He has to be living	उसको जीना है ।

॥ सकर्मकः 'दृश्' धातुः कर्मणि ॥

१ मया चन्द्रः दृश्यते । The moon is seen by me
मुझसे चाँद देखा जाता है ।

२ मया चन्द्रः दृश्यमानः अस्ति । The moon is being seen by me
मुझसे चाँद देखा जा रहा है ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३ मया चन्द्रः दृश्यमान आसीत् ।	The moon was being seen by me मुझसे चाँद देखा जा रहा था ।
४ मया चन्द्रः दृष्टः अस्ति ।	The moon has been seen by me मुझसे चाँद देखा गया है ।
५ मया चन्द्रः दृष्टः आसीत् ।	The moon had been seen by me मुझसे चाँद देखा गया था ।
६ मया चन्द्रः दृश्यमानः स्यात् ।	The moon would be seen by me मुझसे चाँद देखा जाता होगा ।
७ मया चन्द्रः दृष्टः स्यात् ।	The moon would have been seen by me मुझसे चाँद देखा गया होगा ।
८ मया चन्द्रः द्रष्टव्यः अस्ति ।	The moon has to be seen by me मुझसे चाँद देखा जाना है ।
९ मया चन्द्रः द्रष्टव्य आसीत् ।	The moon had to be seen by me मुझसे चाँद देखा जाना था ।
१० मया चन्द्रः द्रष्टव्यः स्यात् ।	The moon would have to be seen by me मुझसे चाँद देखा जाना होगा ।

॥ अभ्यासः ॥

I अधोनिर्दिष्टां खण्डिकां शुद्धीकृत्य लिखत ।

उत्तानपादस्य राजस्य द्वौ भार्यै आसीत् । सुनीतिः सुरुचि इति तेषां नामौ आसन् । सुनीतिस्य ध्रुवः सुरुच्याः उत्तमः इति च द्वौ पुत्राः अजायन्त । महाराजा सुरुचिं अधिकं अस्निह्यत् ।

एकदा सुरुचिस्य पुत्रः उत्तमः पितुस्य अङ्के अधिरोहन् वर्तत । तं ध्रुवः अदृश्यत । स अपि अङ्के तिष्ठितुं अभिलषित्वा पितुः समीपं अगच्छति स्म अङ्के अधिरोहितं सुतं सुरुच्या अदृश्यत । सुरुचिः आगत्वा तं कुमारं अप्रहरत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुरुच्या प्रहृतवान् सा बालः आक्रन्दित्वा तस्यः मातुस्य समीपं गतः । "त्वं भगवतस्य विष्णुस्य चरणं शरणं गच्छ, भगवं विना अस्मभ्यं अन्य शरणं नास्त्यैवै" ति मातृणा सः कथितवती । तं वचनं आकर्णयित्वा अशरणः स बालकः वनं गच्छित्वा कठिनं तपं अकरोति । महतेन तेन तपेन विष्णुः प्रत्यक्षीबभूव । अभीष्टानि वरान् प्रदत्वा भगवः तत्रैव अन्तर्धातश्च । ध्रुववैरं स्वीकृतः राज्य निवृत्यं मात्राभ्यां भ्रात्रेण च सह सुखेन निवसत् च ।

II भवद्भिः कृतं किमपि पर्यटनं (excursion) अधिकृत्य द्वित्राः खण्डिकाः लिख्यन्ताम् ।

III जनकेन समादिष्टैः दूतैः दशरथाय कृतं निवेदनं स्ववाक्ये संक्षिपत ।

IV कलेः देवानां च संवादं संक्षिप्य लिखत ।

V महाभारतादुद्धृतं धौम्योपाख्यानं अनुवदत ।

VI नवम दशम-दिनपाठयोरावर्तनं कृत्वा दृढीकुरुत ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

षट्त्रिंशो दिवसः

॥ कुमारसंभवम् ॥

मदनस्य स्थाण्वाश्रमप्रवेशावधि कथासंक्षेपः ॥

प्रजापतेर्दक्षस्य सती नाम पुत्री आसीत् । तां परमशिवः पर्यणयत् । जामातृश्वशुरयोः मनसि कालान्तरे कैश्चन कारणैः स्पर्धा अवर्धत ।

अत्रान्तरे दक्षः कञ्चन यागमारभत । तस्मिन् स्वजामाता शिवो न तेन निमन्त्रितः । पित्रा अनिमन्त्रितापि भर्त्रा निरुद्धगमनापि सती पितृस्नेह-विधेया भूत्वा दक्षगृहं गता । यथा प्रतीक्षितं शिवेन तथैव संवृत्तम् । दक्षेण सा अनादृता अधिक्षिप्ता च । सा स्वभर्तृगृहं कैलासं प्रति निवर्तितुमक्षमा भूत्वा योगाग्निं विवेश । अग्निप्रवेशात् प्राक् सैवं प्रार्थयामास । "यदि मे पुनरपि जनिः स्यात् तर्हि तदानीमपि परमशिव एव मे भर्ता भवेत्" इति । पत्न्याः देहत्यागवार्तामाकर्ण्य शिवो नितरामदूयत । "इतः परमहं अपत्नीको ब्रह्मचर्यमवलम्ब्य जीवितं नेष्यामि" इति निश्चित्य स हिमालये तपश्चरन् कालमनयत् ।

एतस्मिन्नवसरे तारको नामासुरः ब्राह्माणं तपसा प्रसाद्य इष्टान् वरान् अवाप । "न कोपि मे हन्ता स्यात् । यदि हनिष्यति तर्हि परमशिवस्य बीजात् उत्पत्स्यमानः पुत्र एव मां हन्तुं प्रभवेत्" इति । शिवस्य ब्रह्मचर्य-भंगः पत्नीप्राप्तिश्च नैव पुनः संभवेतां, ततः कथं शिवबीजात् पुत्रनिष्पत्तिः स्यात्" इत्ययं वराभ्यर्थनासमये तारकस्य विचार आसीत् । लब्धवरः स दानवः दृप्तः सन् त्रीन् लोकान् अर्दितुमारभत ।

अत्रान्तरे सती हिमवतः पत्न्यां मेनायां जनिमलभत । सा पार्वतीति नाम्ना प्रथिता चासीत् । कदाचित् तत्र समागतो नारदः तां कन्यां दृष्ट्वा "इयं परमशिवस्य पत्नी भविष्यति" इत्युवाच । तत् श्रुत्वा प्रीतो हिमवान् स्वपुत्रीं तत्रैव तपश्चरन्तं स्थाणुं (शिवं) परिचरितुं प्रेषयामास । पूर्वजन्म-वासनावशात् पार्वती शिवपरिचरणे अतीवासक्ता चाभवत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र तु देवलोके तारकपीडनेन सर्वमप्युच्चावचमभूत् । इन्द्रः देवगणैः सह ब्रह्माणं शरणं प्रापुः । इन्द्रात् तारकपीडनप्रकारं देवानां व्यथाकरणं च ज्ञात्वा ब्रह्मा तत्परिहारार्थमुपायानुपदिदेश । "पार्वती शिवस्य परिचरणे व्यापृता वर्तते । यथाकथंचित् तया शिवस्य तपोभंगः करणीयः । तदर्थं यूयं यतध्वम्" इति ।

इन्द्रः प्रतिनिवृत्तः । स तस्मिन् कर्मणि विदग्धं कामदेवं सस्मार । सः स्मृतमात्र एव समागतः । शिवस्य तपोभंगरूपं कार्यं तस्मै न्यवेदयत् । ततः स्वामिनोऽभ्यर्थनया समुत्फुल्लहृदयः कामदेवः सपरिवारं स्थाण्वाश्रमं प्रति प्रतस्थे । [प्राक्—पूर्वं । जनिः—जन्म । अर्दितुं—पीडयितुम् । व्यथा = दुःखं । उच्चावचम् = अव्यवस्थितम्]

॥ स्थाण्वाश्रमः ॥

हिमवतो हिमावृते सानुप्रदेशे परमशिवस्य तपोवनम् दृश्यते । लौकिकविकारा न तत्र पदं कुर्वन्ति । सर्वमपि शान्तं मूकं गंभीरं च । परमशिवः ध्याननिमग्नः सन् लतागृहान्तरमध्यास्ते । पार्वती सख्यौ च पुष्पापचयार्थं गताः । एतस्मिन् एव समये परमेश्वरस्य तपोभंगं कर्तुं वसन्तमन्दानिल-चन्द्रिकादिसखस्य रतिद्वितीयस्य कामदेवस्यागमनमभूत् ।

तपोवनं साकल्यतो विकारमवाप । अशोकाः झटित्येव पुष्पिता अभवन् । भृंगा गुञ्जन्तो विचेरुः । वनश्रीः तिलकिता व्यराजत ; अरुणाधरं मसृणीचकार च । कोकिलश्चुकूज । हरिणा मदोद्धता व्यचरन् ।

अस्मिन् समये तपोवने विद्यमानानां चराणां अचराणां च प्राणिनां सञ्जाता आकस्मिका विकारभेदा एवात्र वर्णनाविषयः । कालिदासस्य प्रतिभा अस्मिन्नवसरे नियन्त्रणां विजहाति । तृतीयसर्गात् कतिचन पद्यान्येव अत्रोद्ध्रियन्ते । कुमारसंभवात्मकस्य सहस्रपत्रस्य कतिचन पद्यान्येवात्र प्रदर्श्यन्ते । पूर्णतया विकसितस्य कुसुमस्य सौन्दर्यं सौरभ्यं वा तदेकदेशैः द्वित्रैरेव दलैर्बोधयितुं अशक्यमेव । तद् आस्वदितुं स्वयमेव प्रयत्नः करणीयः । [पुष्पापचयः = कुसुमलुञ्चनम् । झटिति=द्रुतं । साकल्यतः=पूर्णतया । विजहाति= त्यजति । सहस्रपत्रं = कमलम् । अशक्यं = असाध्यम् ।]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

1 तं देशमारोपितपुष्पचापे रतिद्वितीये मदने प्रपन्ने ।
काष्ठागतस्नेहरसानुविद्धं द्वन्द्वानि भावं क्रियया विवव्रुः ॥

मदने तं देशं प्राप्ते सति तत्रत्यानि खग-मृग-वृक्षमिथुनानि कामविकारं प्रकटीचक्रुरिति सारः । आरोपितपुष्पचापः = पुष्पचापमारोपितवान् । रतिद्वितीयः = रत्या सहितः । प्रपन्नः = प्राप्तः । परमकाष्ठां प्राप्तेन स्नेहरसेन संपृक्तं (संबद्धं) । द्वन्द्वानि = मिथुनानि, स्त्रियः पुरुषाश्च । विवव्रार—विवव्रतुः—विवव्रुः, विवृण्वन्ति स्म, प्रकटयामासुः ।

2 मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः ।
शृङ्गेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः ॥

द्विरेफः=भ्रमरः (भ्रमरशब्दे द्वौ रेफौ स्तः अतः द्विरेफो भ्रमरपर्यायोऽभूत्) भ्रमरः स्वप्रियया सह पुष्पचषके मधुपानं चकार । पपौ—पपतुः—पपुः 'पा धातुः । कृष्णसारः (मृगः) शृङ्गाग्रेण स्वप्रियायाः कण्डूं अपानयत् । कण्डूयनसमये स्पर्शसुखेन मृग्याः अक्षिणी निमीलिते आस्ताम् । कुसुममेव एकपात्रं । स्वां = निजां । अकण्डूयत = scratched.

3 ददौ रसात् पङ्कजरेणुगन्धि गजाय गण्डूषजलं करेणुः ।
अर्धोपभुक्तेन बिसेन जायां संभावयामास रथांगनामा ॥

करिणी स्वप्रियाय करिणे शुण्डाग्रेण दत्तं जलं ददौ । चक्रवाकः बिसस्यार्धं भक्षित्वा तदवशिष्टं भागं जायायै च ददौ । करेणुः = करिणी । बिसं = मृणालम् Lotus stalk. संभावयामास = सप्रेमादरं ददौ । रथांगनामा = चक्रवाकः । शुण्डा = गजानां करः Trunk.

4 गीतान्तरेषु श्रमवारिलेशैः किञ्चित् समुच्छ्वासितपत्रलेखम् ।
पुष्पासवाघूर्णितनेत्रशोभि प्रियामुखं किम्पुरुषश्चुचुंबे ॥

गानालापनमन्तरा किन्नरः प्रियामुखं अचुंबत । श्रमवारिलेशैः = स्वेदकणैः । समुच्छ्वासित = विच्छिन्न, त्रुटित । पत्रलेखा = युवतीनां स्तनगण्डाद्यवयवेषु प्रियैः गैरिकादिभिर्विरच्यमाना विचित्रा रेखाः । पुरातने काले विषयासक्ताः पुरुषाः स्वपत्नीनां वक्षसि गण्डे तथा अभिरामेष्वन्येष्ववयवेषु गैरिकादिभिर्लेपनद्रव्यैः विविधा रेखा रचयन्ति स्म । लेखनावसरेषु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्तदवयवान् दृष्ट्वा स्पृष्ट्वा च ते परानन्दमनुबभूवुः। स्वप्रियेभ्यः अभीष्टानवयवान् अननावृत्य प्रदर्शनेन पत्न्योऽपि व्रीडोपगूढां कामपि निर्वृतिमवापुः। सेयं पत्ररेखा, पत्रिका, पत्रं इत्यादिभिर्व्यपदिश्यते। किञ्चित् समुच्छ्वासिताः पत्ररेखा यस्मिन् तद् (मुखम्)। पुष्पासवपानेन (मधुपानेन) आघूर्णिताभ्यां नेत्राभ्यां शोभमानं (मुखं)।

(किन्नरः, किंपुरुषः? हिमवतः प्रान्तप्रदेशेषु निवसन् जनवर्गः। हिमालयस्य पूर्वपूर्वासूपत्यकासु भूयिष्ठं मंगोलियन् वर्गीयाः निवसन्ति खलु। तेषां पुरुषाणां मुखेषु श्मश्रु न प्ररोहन्ति। अतः स्त्रीणां पुरुषाणां च मुखं सदृशमेव दृश्यते। सन्तत-हिमाघातेन स्त्रियः पुरुषाश्च देहे अनेकान् कञ्चुककंबलादीन् धारयन्ति। अतोऽन्ये जनाः तत्रत्याः स्त्रियः पुरुषांश्च विवेक्तुं न शक्नुवन्ति। सर्वेऽपि स्त्रिय इव प्रतिभान्ति। भारतमागताः अपरिचिता आर्याः तान् जनविशेषान् प्रथमं नार्य इति विशश्वसुः। कालान्तरे निकटसम्पर्केण पुरुषत्वपरिज्ञाने आर्याः साद्भुतमपृच्छन् ' किं पुरुषः किं नरः इति। क्रमेण तौ शब्दौ तेषां पर्यायतां प्रापतुः। ' वानर ' शब्दस्यापि व्युत्पत्तिरेवमेव स्यात्।)

अत्र वृक्षाः लताश्च कामुककामिनीभावेन कल्पिताः। पुष्पगुच्छाः स्तनाः, प्रवालाः ओष्ठाः, शाखाः करतलाश्चेति कल्पना।

5 पर्याप्तपुष्पस्तबकस्तनाभ्यः स्फुरत्प्रवालोष्ठमनोहराभ्यः।
लतावधूभ्यस्तरवोऽप्यवापुर्विनम्रशाखाभुजबन्धनानि॥

पर्याप्ताः पुष्पस्तबका एव स्तनाः यासां ताः ताभ्यः। स्फुरद्भिः प्रवालैः एव ओष्ठैः मनोहराभ्यः। लता एव वध्वः। विनम्रैः शाखाभिरेव भुजैः (कृतानि) बन्धनानि। तरवः बंधनानि अवापुः इति योजनीयम्। पर्याप्ताः = अतितरां समृद्धाः; पुरुषाः यावदिच्छन्ति तावद् विस्तृताः॥

एवं तपोवनं सकलमपि लौकिकविकाराधीनमभवत्। तदा शिवभूतगणा अपि आत्मनियंत्रणारहिता भवेयुरिति शङ्कया तेषां नेता नन्दी स्वस्वामिनः श्रीशिवस्य ध्यानास्पदात् लतागृहात् बहिरागतः। स दक्षिणहस्तधृतं वेत्रदण्डं वामहस्तस्य प्रकोष्ठे विन्यस्य दक्षिणहस्तस्य तर्जनीं (forefinger) मुखे समर्प्य निश्शब्दं सगौरवं च सूचितवान् " मा कुरुत चापलम् "। तत्सूचनयैव गणा विनीता अभवन्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

6) लतागृहद्वारगतोऽथ नन्दी वामप्रकोष्ठार्पितहेमवेत्रः ।
मुखार्पितैकांगुलिसंज्ञयैव " मा चापलायेति " गणान् व्यनैषीत् ॥

लतागृहस्य द्वारं गतः । वामप्रकोष्ठे अर्पितः हेमवेत्रः येन सः । वाम = left दक्षिण = right प्रकोष्ठः = हस्तस्याधस्तादर्धभागः । हेमवेत्रः = golden cane चापलम् = चापल्यम्. मा चापलाय = चापल्यम् कर्तुं यूयम् मा सन्नद्धा भवत । व्यनैषीत् = विनीतान् अकरोत् । वि + नी, लुङ्. पर. प्र. ए. ।

यदा गणप्रमुखो नन्दी एवम् सूचनां अकरोत् तदा—

7) निष्कम्पवृक्षं निभृतद्विरेफं मूकाण्डजं शान्तमृगप्रचारम् ।
तच्छासनात् काननमेव सर्वं चित्रार्पितारंभमिवावतस्थे ॥

वृक्षा न अकम्पन्त । भ्रमराः निश्शब्दा अभवन् । पक्षिणो मूकाः तस्थुः । मृगाः शान्ताः विचेरुः । एवं सर्वमपि तत् काननतलम् नन्दिनः शासनश्रवणमात्रे एव रेखाङ्कितमिव तस्थौ । निष्कम्पाः वृक्षाः यस्मिन् (कानने) तत् । निभृताः = निश्शब्दाः द्विरेफाः यस्मिन् तत् । मूकाः अण्डजाः पक्षिणः यस्मिन् तत् । शान्तः मृगप्रचारः यस्मिन् तत् ।

एतस्मिन्नेव समये कामः सपरिवारं शिवस्य दृष्टिपथम् परिहृत्य नमेरुवृक्षैः निबिडम् अर्थात् सान्द्रम् शिवस्य ध्यानस्थलम् विवेश ।

8 दृष्टिप्रपातं परिहृत्य तस्य कामः पुरः शुक्रमिव प्रयाणे ।
प्रान्तेषु संसक्तनमेरुशाखं ध्यानास्पदं भूतपतेर्विवेश ॥

जैत्रयात्रासु यदि पुरः शुक्रनक्षत्रं दृश्यते तर्हि पराजयो निश्चित एवेति लक्षणशास्त्रेषूपन्यस्तम् । शुक्रदर्शनम् परिहृत्यैव राजानः जैत्रयात्रामारभन्ते । तथा कामोऽपि शिवस्य दर्शनम् परिहृत्य, तस्य पार्श्वभागे एव पदं चकारेत्यर्थः । परिहृत्य = दूरीकृत्य, अपाकृत्य । प्रयाणे = यात्रायां । प्रान्तः = परिसरप्रदेशः । संसक्ताः = परस्परं बद्धाः नमेरूणां शाखाः यस्मिन् तत् । भूतपतेः = शिवस्य ।

कामः शिवं ददर्श । कीदृशं शिवं ? तत्र व्याघ्रचर्मभिरावृतायां देवदारु-द्रुममूले विरचितायां वेदिकायां आसीनं शिवं ददर्श । कीदृशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कामः ? आसन्नशरीरपातः । यदा स स्थाणुं ददर्श तदैव तस्य आत्मधैर्यं सकलं विनष्टम् । स्वस्य अस्तित्वं तदा अस्ति वा न वेति तस्य जीवद्दशायामपि संशयोऽभवदित्यर्थः ।

9 स देवदारुद्रुमवेदिकायां शार्दूलचर्मव्यवधानवत्याम् ।
आसीनमासन्नशरीरपातः त्रियम्बकं संयमिनं ददर्श ॥

देवदारुद्रुमवेदिका = देवदारुद्रुमस्याधोभागे निर्मिता किञ्चिदुन्नता भूमिः । शार्दूलः = व्याघ्रः । व्यवधानं = आस्तरणं । त्रियम्बकं = त्रिलोचनं, शार्दू....वत्यां (ई. स्त्री. स. ए.) संयमिनम् (न. पु. द्वि. ए)

10 अवृष्टिसंरंभमिवांबुवाहं अपामिवाधारमनुत्तरंगम् ।
अन्तश्चराणां मरुतां निरोधात् निवातनिष्कम्पमिव प्रदीपम् ॥

कामः शिवं ददर्श । कीदृशम् शिवम् ? वर्षणे अव्यग्रं मेघमिव, तरंगरहितम् समुद्रमिव, वाताघातरहिते प्रदेशे दीप्यमानम् दीपमिव स्थितम् । इव + अंबुवाहं = मेघं । अपां + इव + आधारं + अनुत्तरंगं । अपां = जलस्य आधारः = समुद्रः । त्रियंबकं संयमिनम् ददर्श इति पूर्वपद्येन इदं पद्यं अन्वेति ।

यदा स त्रियम्बकं ऐक्षत तदा तस्य धैर्यं लुप्तम् हस्तात् शरचापादिकं अधः पतितम् । भयसंभ्रान्तः स तदपि न ज्ञातवान् ।

11 स्मरस्तथाभूतमयुग्मनेत्रं पश्यन्नदूरात् मनसाप्यधृष्यम् ।
नालक्षयत् साध्वससन्नहस्तः स्रस्तं शरं चापमपि स्वहस्तात् ॥

स्मरः तथाभूतं अयुग्मनेत्रं पश्यन् अदूरात् मनसा अपि अधृष्यम् = अगम्यं असंभावनीयम् न अलक्षयत् = न अजानात् । साध्वससन्नहस्तः = भयेन क्रान्तः हस्तः यस्य सः । स्रस्तं = पतितम् ।

स्मरस्य नष्टप्रायं आत्मबलं पुनरुद्दीपयन्तीव पार्वती तस्मिन् समये तत्राजगाम ।

12 निर्वाणभूयिष्ठमथास्य वीर्यं सन्धुक्षयन्तीव वपुर्गुणेन ।
अनुप्रयाता वनदेवताभ्यां अदृश्यत स्थावरराजकन्या ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थावरराजकन्या अदृश्यत = पार्वतीं अपश्यत् ।

निर्वाणभूयिष्ठं नष्टप्रायं । सन्धुक्षयन्ती = उद्दीपयन्ती । अस्य = कामस्य ।

स्मरः तां वीक्ष्य स्वकार्यनिर्वहणे प्रत्याशामलभत ।

13 तां वीक्ष्य सर्वावयवानवद्यां रतेरपि ह्रीपदमादधानाम् ।
जितेन्द्रिये शूलिनि पुष्पचापः स्वकार्यसिद्धिं पुनराशशंसे ॥

सर्वैः अवयवैः अत्युत्कृष्टां । ह्रीपदं = लज्जानिमित्तं । आदधानां = आवहन्तीं, सम्पद्यमानां । शूलिनि (न. पु. स. ए) = शिवे ।

पार्वती लतागृहद्वारदेशं प्रविवेश । शिवः ध्यानात् विरराम च ।

14 भविष्यतः पत्युरुमा च शंभोः समाससाद प्रतिहारभूमिम् ।
योगात् स चान्तः परमात्मसंज्ञं दृष्ट्वा परंज्योतिरुपारराम ॥

पत्युः + उमा । प्रतिहारभूमिं = द्वारप्रदेशं । सम् + आ + सद् + अ (लिट्) = प्राप । सः = शिवः । च + अन्तः । परमात्मसंज्ञं = परमात्मरूपं । तेजः = ज्योतिः = उपारराम = विरराम, निरवर्तत ।

पार्वती शिवं उपगम्य प्रणमति । प्रणामावसरे विनम्रात् शिरसः नवकर्णिकारकुसुमं अधः स्रंसति । कर्णयोरलङ्कृतम् पल्लवमपि स्रस्तं भवति ।

15 उमाऽपि नीलालकमध्यशोभि विस्रंसयन्ती नवकर्णिकारम् ।
चकार कर्णच्युतपल्लवेन मूर्ध्ना प्रणामं वृषभध्वजाय ॥

विस्रंसयन्ती = पातयन्ती । च्युत = स्रस्त । मूर्ध्ना = शिरसा ।

—०—

॥ श्रीमद् भगवद्गीतायां द्वादशोऽध्यायः । भक्तियोगः ॥

अर्जुन उवाच ॥

एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥ १ ॥

श्रीभगवानुवाच

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥ ३ ॥

संनियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः ।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥ ४ ॥

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥ ५ ॥

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥ ६ ॥

तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि नचिरात्पार्थ मय्यावेशितचेतसाम् ॥ ७ ॥

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥ ८ ॥

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनंजय ॥ ९ ॥

अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।
मदर्थमपि कर्माणि कुर्वन् सिद्धिमवाप्स्यसि ॥ १० ॥

अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥ ११ ॥

श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते ।
ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् ॥ १२ ॥

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहंकारः समदुःखसुखः क्षमी ॥ १३ ॥

संतुष्टः सततम् योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥ १४ ॥

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥ १५ ॥

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ॥ १६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः ॥ १७ ॥

समः शत्रौ च मित्रे च तथा मानापमानयोः ।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥ १८ ॥

तुल्यनिन्दास्तुतिर्मौनी संतुष्टो येन केनचित् ।
अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥ १९ ॥

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥ २० ॥

भगवद्गीतायां भक्तियोगस्य माहात्म्यं अस्मिन् द्वादशाध्याये भगवान् कृष्णः अर्जुनायोपदिशति । भक्तस्य लक्षणकथनमेवास्य पाठभागस्य सारांशः । 'युज्' धातोः 'समाधिः', अर्थः । समाधिस्तु चित्तवृत्तिनिरोधः । युज्+त=युक्त । एवं च अन्येभ्यो विषयेभ्यश्चित्तवृत्तिं निरुध्य एकस्मिन्नेव परमार्थे चित्तवृत्तिं संयोज्य ये वर्तन्ते ते एव युक्ताः इत्यर्थः । 'भज्' धातो सेवार्थकस्य क्तप्रत्ययान्त एव भक्तशब्दः । सेवा नाम अनन्यशरणतया एकाश्रयबुद्धिः । तथा च अनन्यशरणत्वेन भगवन्तमेवैकाश्रयं मन्वाना एव भक्ताः । योगवत्तमाः = परमोत्कृष्टयोगयुक्ताः । अर्जुनः सर्वसंशयच्छेत्तारं भगवन्तं पृच्छति 'तेषां के योगवित्तमाः ?" इति । केचन साकारं अथवा सगुणं ईश्वरं भजन्ति, अन्ये केचन निराकारं अथवा निर्गुणं तं भजन्ति । तेषु के नाम परमोत्कृष्टा योगवेत्तारः ? इति प्रश्नस्याशयः ।

भगवान् संशयं छिनत्ति—अन्येभ्यश्चित्तवृत्तिं निरुध्य साकारं भगवन्तमेव शरणं गता योगयुक्ता भक्ताः भगवन्तं प्राप्नुवन्ति । भगवति सर्वमपि समर्प्य तदेकतानमनसो ये वर्तन्ते तान् स समुद्धरिष्यति । सगुणे परमात्मन्येकतानता असाध्या प्रतिभाति चेत् सा अभ्यासेन लभ्यते । अभ्यासोऽपि दुष्करश्चेत् सर्वाण्यपि कर्माणि भगवत्प्रीत्यर्थमेव कुर्यात् । तदप्यशक्यं चेत् कर्मफलत्यागः क्रियतां । तत एव मनसः शान्तिर्जायते । तदेव स भक्तपदेन व्यवहर्तुं अर्हो भवति । तादृशानां भक्तानां लक्षणमेवं भवति—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भक्तः सर्वभूतानि न द्वेष्टि, तैः सह स मैत्र्या करुणाया च वर्तते। ममतारहितः अहङ्कारशून्यः स भक्तः सुखे दुःखे च समभावनः क्षमावान् च भवति। स सर्वथा सन्तुष्टः आत्मनियन्त्रणयुक्तः भगवति परमात्मनि समर्पितसर्वस्वश्च जायते। तादृशो भक्तो भगवतः प्रियो भवति। जनस्तस्माद् न बिभेति। यस्य न हर्षो, न शोको, नाभिलाषश्च विद्यते, यः शुभमशुभं वा कर्मफलं परित्यजति स भक्तो भगवतः प्रियो भवति। शत्रुर्मित्रं, मानोऽपमानः, शीतमुष्णं, सुखं, दुःखं, इत्यादिषु द्वन्द्वेषु समभावन आसक्तिरहितो निन्दास्तुतिश्रवणे समचित्तः, येनकेनचित् सन्तुष्टश्च नरो भगवतः प्रिय एव। यश्चेदं वचनं आद्रियते तदनुसारमाचरति च, स श्रद्धावान् भगवदेकशरणो भक्तो भगवतः प्रियो जायते।

॥ अभ्यासः ॥

I पदानि विश्लेष्य लिखत।

1) भक्तास्त्वां। 2) चाप्यक्षरं। 3) मय्यावेश्य।
4) पर्युपासते। 5) त्वक्षरं। 6) क्लेशोऽधिकतरस्तेषां।
7) मय्येव। 8) अभ्यासेऽप्यसमर्थोऽसि 9) अथैदप्यशक्तोऽसि।

II पदानि संयोज्य संधिकार्याणि विवृणुत।

1) अभ्यासात्+ज्ञानात्। 2) त्यागः+त्यागात्+शान्तिः।
3) मयि+अर्पितमनस्+बुद्धिः+यः। 4) यस्मात्+न+उद्विजते। 5) भक्ताः+तेऽतीव।

III पाठालये नवागतं अध्यापकं अधिकृत्य पाठालयात् प्रतिनिवर्तमानैः द्वित्रैः बालकैः कृतं संवादं स्वभावनानुरूपं लिखत।

IV कुमारसंभवादुद्धृतानां पद्यानां सारं लिखत।

V भक्तस्य लक्षणं विशदयत।

VI एकादशद्वादशदिवसयोरावर्तनं कृत्वा सर्वे विषया दृढीक्रियन्ताम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सप्तत्रिंशो दिवसः

॥ शाकुन्तले चतुर्थोऽङ्कः ॥

अथाद्य कालिदासविरचितस्य शाकुन्तलनाटकस्य चतुर्थादंकात् कंचन समाकर्षकं अंशं अध्यापयितुमारभे । अयमस्य नाटकस्य कथासंग्रहः ।

मुनेर्विश्वामित्रस्य अप्सरसि मेनकायां काचित् पुत्री अजायत । मेनका तां लतानिकुञ्जे परित्यज्य स्वर्गं गता । तदा काश्यपः कण्वः तस्य निकुञ्जस्य समीपतः समित्कुशादिकानाहर्तुं गच्छन्नासीत् । निकुञ्जात् शिशोः रोदनं श्रुत्वा स तमभ्यगच्छत् । स तत्र शयानां क्रन्दन्तीं काञ्चन बालिकामपश्यत् । महर्षिस्तामादाय आश्रममनयत् । स तां 'शकुन्तलां' आजुहाव । सा आश्रमे अवर्धत । प्रियंवदा अनसूया चेति द्वे सख्यौ तस्या आस्ताम् एवं षोडश सप्तदश वत्सरा अतीताः । ताः पूर्णयौवनं प्रापुः ।

तदन्तरे कण्वः कञ्चन कालं आश्रमे नासीत् । तदा राजा दुष्यन्तः आश्रमात् नातिदूरेषु काननेषु मृगयायै सञ्चरन्नासीत् । वनाद्वनं संचरन् सः अकस्मात् आश्रमपरिसरं प्राविशत् । तदा ताः तिस्रो मुनिकन्यकाः आश्रमवाटिकासु वृक्षलताः सिञ्चन्त्यः अवर्तन्त । राजा वृक्षान्तरितः सन् ताः निपुणं निरैक्षत । तस्य तस्यायतमायां शकुन्तलायां प्रेमाजायत । परस्परदर्शनेन सखीभ्यां तस्याः वृथाश्रवणेन च तस्य सा रतिः पल्लविताऽभूत् । राजा तां गान्धर्वविधिना पर्यणयत् । सः स्वनामांकितमंगुलीयकं तस्यै दत्वा कतिपयैरेव दिवसैः तां राजधानीमानेष्यामीत्युक्त्वा स्वनगरीं गतः ।

शकुन्तला तु गर्भमदधात् । दुष्यन्तचिन्तया तस्याः मनः शून्यमासीत् । तदन्तरे एकदा तस्यां आश्रमे आसीनायां, दुर्वासा मुनिः तेन पथा आजगाम । नाथैकतानहृदया सा तं नापश्यत् । सुलभकोपो मुनिः स्वमवज्ञातं परिगणय्य तां शशाप ; "त्वया ध्यायमानः पुरुषः न त्वां स्मरिष्यति" इति । सख्यौ तद् मुनेर्वचनं आकर्णयताम् । प्रियंवदा महर्षिमनुधाव्य सान्त्वयित्वा शापमोक्षमयाचत । "अभिज्ञानदर्शनेन स तां स्मरिष्यति" इति कथयन् मुनिस्तल-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हितश्च । राज्ञा दत्तमंगुलीयकमस्तीति मत्वा ते निश्चिन्ते अवर्तेताम् । शकुन्तला तु तत्त्वतः इमं शापवृत्तान्तं नाजानात् ।

कण्वः आश्रमम् प्रतिनिवृत्तः । वृद्धतापसी गौतमी इमां वार्तां तस्मै न्यवेदयत् । स शकुन्तलामभ्यनन्दत् । मुनिकुमाराभ्यां शार्ङ्गरवशारद्वताभ्यां गौतम्या च सह कण्वः तां राजधानीं प्रेषयामास । मध्येमार्गं गङ्गायां स्नान्त्याः शकुन्तलायाः अंगुल्याः तदंगुलीयकं जले अपतत् । सा तदपि नाजानात् । सर्वे ते राजधानीं प्रापुः । राजा तान् यथाविधि सच्चकार । शापबलात् राजा शकुन्तलां न प्रत्यभिज्ञानाति स्म । "शकुन्तला महिषीपदे स्वीक्रियताम्"-मिति गौतमी राजानमभ्यर्थयत । तत् श्रुत्वा राजा तस्तंभ । स तां न सस्मार । अन्ते अभिज्ञानम् दर्शयितुं गौतमी शकुन्तलामाह । यदा सा अंगुलीं अपश्यत् तदा अंगुलीयकं न दृष्टम् । सर्वेऽपि मूढा अभवन् । राज्ञस्तु अविश्वासो दृढीभूतः । "नियतमेव ते आरण्यकाः कामपि असत्यवार्तामाकलय्य मां वञ्चयितुमागताः" इति सः निरणयत् । शकुन्तला कठिनं रुरोद । अशरणा सा कामप्यभिज्ञानकथामकथयत् । तामपि राजा न स्मृतवान् । अन्ते मुनिकुमारावपि तां शशंकाते । ततः तौ गौतमी च तां तत्रैव पर्यत्यजन् । अन्ततः राजधान्याः स्वगृहं पुरोहितेनानीयमाना सा मध्येमार्गं मेनकया उद्ध्रियते स्म । मेनका तां मारीचाश्रममनयत् । सा तत्र सुखं वसन्ती कमपि तनयमसूत ।

गङ्गास्रोतसि पतितं शकुन्तलायाः तदंगुलीयं केनचिद् धीवरेणालभ्यत । तत् अन्ते राज्ञ एव हस्तं प्राप । अभिज्ञानांगुलीये दृष्टे सति राज्ञः शकुन्तलायाः स्मृतिरभवत् । स विदूषकेण सह विरहातुरः उद्याने दिनानि निनाय ।

तत्रान्तरे देवासुराणां युद्धमभूत् । इन्द्रः स्वसाहाय्यार्थं दुष्यन्तं स्वर्गमानेतुं मातलिं प्रेषितवान् । मातलौ भुवमागते विरहातुरः, स उद्याने आसीनो दृष्टः । तिरस्करिणीविद्यया स राज्ञि वीर्यमाधाय तेन सह दिवं गतः । समरे दैत्यान् निहत्य विमानेन प्रतिनिवर्तमानः स दुष्यन्तः अकस्मात् मारीचाश्रमे अवातरत् ।

मुनेर्दर्शनावसरं प्रतीक्षमाणः स आश्रमपरिसरे अतिष्ठत् । तदा कश्चित् बालकः सिंहशिशुना सह क्रीडन् तत्रागतः । तेजस्विनो विक्रमिणश्च तस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विचेष्टितानि भाषणानि च तमतितरामाचकृषुः। भाषणमन्तरा शकुन्तलापि तत्रागता। ते परस्परं प्रत्यभिजानन्ति स्म। ततः मारीचमहर्षेः समक्षं शकुन्तलां सुतं च परिगृह्य स राजधानीं न्यवर्तत। अयं अत्र कथासंक्षेपः।

—०—

अत्र अस्माभिः पठिष्यमाणस्य पाठभागस्यायं प्रसङ्गः। कण्वः गौतमी-वचसा शकुन्तला गर्भवतीत्यजानात् तामभ्यनन्दच्च। ततः स मुनिः शार्ङ्गरवेण शारद्वतेन गौतम्या च सह तां भर्तृगृहं प्रेषयितुमैच्छत्। तावत्पर्यन्तं परि-चितानां प्रियजनानां वृक्षलतानां मृगाणां च वियोगः तस्याः दुस्सह आसीत्। ते प्रतस्थिरे। कण्वः सख्यौ च किञ्चिद्दूरं तेषां सहयात्रां अकुर्वन्। तया सह स्निग्धं संभाष्य संभाष्य मुनिः आश्रमनिवर्तनकथां व्यस्मरत्। तदा शार्ङ्गरवः कण्वं प्रतिगमनार्थं अर्थयते।

शार्ङ्गरवः—भगवन्, ओदकान्तं स्निग्धो जनोऽनुगन्तव्य इति श्रूयते।
तदिदं सरस्तीरं। अत्र संदिश्य प्रतिगन्तुमर्हसि।

काश्यपः—तेन हीमा क्षीरवृक्षच्छायामाश्रयामः।

(सर्वे परिक्रम्य स्थिताः)

काश्यपः—(आत्मगतम्) किं नु खलु तत्रभवतो दुष्यन्तस्य युक्तरूपमस्माभिः
सन्देष्टव्यम्। (इति चिन्तयति)

शकुन्तला—(जनान्तिकम्) हला, पश्य, नलिनीपत्रान्तरितमपि सहचरम-
पश्यन्ती आतुरा चक्रवाक्यारौति दुष्करमहं करोमीति।

अनसूया—सखि मैवं मन्त्रयस्व।

आ+उदकान्तं=ओदकान्तं। जलदर्शनावधि। अनुयात्रा जलदर्शनावधि करणीया इति श्रूयते। संदिश्य = संदेशं दत्त्वा। प्रतिगन्तुमर्हसि = निवर्तयस्व। क्षीरवृक्षः = सप्तपर्णः। हि+इमाम्।

आत्मगतं=रंगे अन्यैः न श्रोतव्यमित्यभिनीय, स्वयं कथनम्।

जनान्तिकम्=रंगे कांश्चन न श्रावयित्वा कैश्चन सह कथनम्। शकुन्तला सरसि दत्तदृष्टिस्तिष्ठति। तदा नलिनीपत्रेण तिरोहितं स्वसहचरं चक्रवाकं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पद्यं 1) एषापि प्रियेण विना गमयति रजनीं विषाददीर्घतराम् ।
गुर्वपि विरहदुःखं आशाबन्धः साहयति ॥

कश्यपः—शार्ङ्गरव, इति त्वया मद्वचनात् स राजा शकुन्तलां पुरस्कृत्य वक्तव्यः ।

शार्ङ्गरवः—आज्ञापयतु भवान् ।

काश्यपः—

प. 2) अस्मान् साधु विचिन्त्य संयमधनान्, उच्चैः कुलं चात्मनः
त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम् ।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतः परं, न खलु तद् वाच्यं वधूबन्धुभिः ॥

शाः—गृहीतः सन्देशः ।

काः—वत्से, त्वमिदानीमनुशासनीयासि । वनौकसोऽपि सन्तो लौकिकज्ञा वयम् ।

शाः—न खलु धीमतां कश्चिदविषयो नाम ।

काः—सा त्वमितः पतिकुलं प्राप्य,

अदृष्ट्वा क्रन्दन्तीं कांचित् चक्रवाकीं पश्यति । तदा स्वदशामुद्भावयन्ती सा वदति । हला = सखीनां संबोधनार्थं प्रयुज्यमानं अव्ययपदम् ।

पद्यं 1 अनसूया सान्त्वयति—

एषा चक्रवाकी प्रियेण विना विषादेना दीर्घतरां रजनीं गमयति, अर्थात् यथाकथंचित् यापयति । आशाबन्धः गुरु अपि विरहदुःखं साहयति । "प्रभाते पुनरपि सहचरेण संगच्छेयम्" इत्याशैव महत्तरमपि विरहदुःखं सह्यं करोति । श्वः शुभं भवेदित्याशैव कठिनयातनानामपि सहने जन्तूनां शक्तिमुत्पादयतीत्यर्थः ।

मद्वचनात् = मद्वचनरूपेण । मम वचनं त्वं वद इत्युद्दिष्टोऽर्थः । त्वया स राजा वक्तव्यः = त्वं तं राजानं वदेः ।

प. 2) अन्वयः—संयमधनान् अस्मान् च आत्मनः उच्चैः कुलं च त्वयि अस्याः कथमपि अबान्धवकृतां तां स्नेहप्रवृत्तिं च साधु विचिन्त्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प. 3) शुश्रूषस्व गुरून्, कुरु प्रियसखीवृत्तिं सपत्नीजने,
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहणीपदं युवतयो, वामाः कुलस्याधयः॥

त्वया दारेषु इयं सामान्यप्रतिपत्तिपूर्वकं दृश्या। अतः परं भाग्यायत्तं। तद् वधूबंधुभिः न वाच्यम्।

साधु = सम्यक्। संयम एव धनं येषां ते। संयमः = मनोनियन्त्रणम्। बान्धवैः कृता बान्धवकृता। न बान्धवकृता।

काश्यपः शकुन्तलां कथयति। अनुशासनं = गुरुभिः शिष्येभ्यो यद् विधिरूपेण उद्दिश्यते तद्। वनं ओकः येषां ते। ओकस्-भवनं। वनौकसः = वनवासिनः। वयं तापसाः वने वसाम इति सत्यमेव। तथापि लौकिकजीवितमधिकृत्य वयं सम्यक् ज्ञातार एवेत्यर्थः। न खलु अविषयः = विषय एव। बुद्धिमतां तु सर्वेऽपि बुद्धेः विषया भवन्ति। ते सर्वाण्यपि जानन्ति इत्यर्थः।

प. 3) भर्तृगृहम् प्राप्य सहधर्मिण्या यद् आचरणीयं तद् कण्वः उपदिशति। गुरून्, वृद्धजनान् शुश्रूषस्व, तान् यथेष्टम् यथावसरं सेवस्व। सपत्नीजने, भर्तुरितरासु पत्नीषु प्रियसखीवृत्तिं कुरु, प्रियसखीसदृशमाचर। प्रियसखीनिर्विशेषम् सपत्नीः गणय इत्यर्थः। भर्तुः रोषणतया विप्रकृतापि प्रतीपम् मा स्म गमः। भर्त्रा कोपनशीलतया अपराद्धापि तस्य विरुद्धं मा वर्तस्व। भर्ता बहुकार्यव्यापृतत्वात् कदाचित् तुभ्यं कुप्येत्, तथापि तं कोपं अवगणय्य तेन सह सन्तुष्टचित्तया त्वया वर्तितव्यम्, न खल्वल्पबुद्धित्वात् तस्य प्रतिकूलया भवितव्यम्। दक्षिणा = सर्वेषु समानममतायुक्ता। परिजने भूयिष्ठम् दक्षिणा भव। अन्तःपुरपरिचारकवृन्देषु प्रायशः समानस्नेहशीला भव। उत्सेकः = गर्वः। भाग्येषु अनुत्सेकिनी गर्वरहिता च भव। यदा अचिन्तितम् भाग्यमापतति तदा गर्विष्ठा मा भव। एवं युवतयो गृहिणीपदम् यान्ति। वामाः = विपरीताः। एतद्विपरीताः युवतयस्तु स्ववंशस्य नित्यदुःखम् भवन्ति। भर्तुरनिष्टाः स्त्रियः स्वपितॄणां नित्यदुःखहेतवः स्युरित्याशयः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काश्यपः—कथम् वा गौतमी मन्यते ?

गौतमी—एतावान् वधूजनस्योपदेशः। जाते, एतत् सर्वमवधारय।

काश्यपः—वत्से, परिष्वजस्व मां सखीजनम् च।

शकुन्तला—तात, इत एव किं प्रियंवदामिश्राः सख्यो निवर्तिष्यन्ते ?

काश्यपः—वत्से, इमे अपि प्रदेये। न युक्तमनयोस्तत्र गन्तुम्। त्वया सह गौतमी यास्यति।

शकुन्तला—(पितरमाश्लिष्य) कथमिदानीं तातस्यांकात् परिभ्रष्टा मलयतटोन्मूलिता चन्दनलतेव देशान्तरे जीवितं धारयिष्ये ?

काश्यपः—वत्से, किमेवम् कातरासि ?

4 अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला।
तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि॥

वधूनामुपदेशविषये मत्तोऽपि तवैवाधिकार इत्याशयः। (मद्+तः= मद्) वधूजनस्योपदेशः—वधूजनेभ्यः गुरुजनैर्दीयमान उपदेशः। जाते= वत्से। परिष्वजस्व=आलिंगनं कुरु। प्रियंवदामिश्राः=प्रियंवदाप्रभृतयः। प्रदेये=त्वमिव कस्मैचित् सौभाग्यवते प्रदातुमर्हे। तावत् पर्यन्तम् परगृहान् एते न गन्तुमर्हतः। इदानीं=इतःप्रभृति। बाल्यात् प्रभृति परिचितं प्रदेशं विहाय अपरिचिते प्रदेशे कथं जीवितं यापयामि। काश्य-किमर्थमीदृशी भीरुता ?

4) अभिजनवतः=कुलीनस्य। श्लाघ्ये=स्तुत्यर्हे। गृहिणी=भार्या। विभवगुरुभिः=महद्भिः सम्पद्राशिभिः गुरुत्वयुक्तैः। आकुला व्यपृता, व्यग्रा। पावनं=परिशुद्धम्। शुचं= शोकं। प्राची+इव+अर्कम्।

अन्वयः—अभिजनवतः भर्तुः श्लाघ्ये गृहिणीपदे स्थिता तस्य विभव-गुरुभिः कृत्यैः प्रतिक्षणं आकुला अचिरात् प्राची अर्कं इव पावनं तनयं प्रसूय, हे वत्से, त्वं मम विरहजां शुचं न गणयिष्यसि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(शकुन्तला पितुः पादयोः पतति)

काश्यपः—यदिच्छामि, ते तदस्तु ।

शकुन्तला—(सख्यावुपेत्य) हला, द्वे अपि मां सममेव परिष्वजेथाम् ।

सख्यौ—(तथा कृत्वा) सखि, यदि नाम स राजा प्रत्यभिज्ञानमन्थरो भवेत् ततस्तस्येदमात्मनामांकितमंगुलीयकं दर्शय ।

शकुन्तला—अनेन सन्देहेन वामाकम्पितास्मि ।

सख्यौ—मा भैषीः । स्नेह पापशंकी ।

शा:—युगान्तरमारूढः सविता । त्वरतामत्रभवती ।

शकु:—(आश्रमाभिमुखी स्थित्वा) तात, कदा नु भूयस्तपोवनं प्रेक्षिष्ये ।

का:—श्रूयताम् ।

कुलीनस्य भर्तुः श्लाघनीये पत्नीपदे स्थित्वा, तस्य सम्पदः समृध्या गुरुत्वयुक्तानां कर्मणां यथाशक्ति साहाय्यप्रदाने व्यापृता भूत्वा, पूर्वा दिक् अरुणमिव वंशविशुद्धये पर्याप्तं प्रसूय च क्रमशः मद्विरहोद्भवं दुःखं त्वं न परिगणयिष्यसि । मद्विषकं दुःखं त्वं विस्मरिष्यसि इत्यर्थः ।

सममेव = युगपद्, समकाले, न एकैकशः । परिष्वजेथाम् = आलिंगतम् । प्रत्यभिज्ञानमन्थरः = स्मरणे मन्दः, (त्वां स्मर्तुं स न शक्नोति चेत् । ततः + तस्य + इदं + आत्मनामाङ्कितं + अङ्गुलीयकं । वां अनेन संदेहेन आकम्पितास्मि । वां = युवयोः ।

मा भैषीः = मा भीता भव । यत्र यत्र स्नेहस्तत्र तत्र पापस्य अनभिलषणीयस्य कस्यापि आशङ्को भवति । अयं लोकस्वभावः । मा खल्वन्यथा चिन्तय ।

युगान्तरं = युगप्रमाणं अन्तरम् । युगप्रमाणपरिमितं दूरम् । युगः = कर्षणार्थं वृषभाणां गलेषु बध्यमानो दारुदण्डः । सविता = सूर्यः । संभाषणमन्तरा समयोऽतिक्रान्तः । सविता = सूर्यः । उदयगिरेः किञ्चिद्-दूरं आकाशमारूढ इत्यर्थः । अत्रभवती, तत्रभवान्, अत्रभवान्, तत्रभवान् इत्यादयो नाटकादिषु 'त्वम्' इत्यर्थे आदरार्थं प्रयुज्यन्ते । त्वरताम् = शीघ्रं गच्छतु ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

5 भूत्वा चिराय चतुरन्तमहीसपत्नी
दौष्यन्तिमप्रतिरथं तनयं निवेश्य,
भर्त्रा तदर्पितकुटुम्बभरेण सार्धं
शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन् ॥

गौतमी—जाते, परिहीयते गमनवेला । निवर्तय पितरम् । अथवा चिरेणापि पुनः पुनरेषैवं मन्त्रयिष्यते । निवर्ततां भवान् ।

काः—उपरुध्यते तपोनुष्ठानम् ।

शकुः—(भूयः पितरमाश्लिष्य) तपश्चरणपीडितं तातशरीरम् । तन्मातिमात्रं मम कृते उत्कण्ठितुम् ॥

काः—(सनिःश्वासम्)

तावत् कालं परिचितमासकं च तपोवनं परित्यक्तुं तया महान् क्लेशोऽनुभूयते । अधुना परित्यक्तमेव भवेत्, उत पुनर्दर्शनायावसरो लभेय इति बुद्ध्या पृच्छति । "तात कदा . . ." ।

5) तस्य प्रश्नस्योत्तरं काश्यपो ददाति "भूत्वा...." इति । तव भर्तुः द्वे महिष्यौ स्तः । एका चतुस्समुद्रमेखला भूमिः । अन्या त्वं च । एवं चिरं चतुस्समुद्रमेखलायाः भूमेः सपत्नी भविष्यसि । तथाविधा त्वं अतुल्यबलं कञ्चन पुत्रं च प्रसोष्यसे । यदा स राज्यभरणक्षमं वयः प्राप्नोति तदा तस्मिन् समर्पितराज्यभारेण भर्त्रा सह त्वं पुनरपि अस्मिन् आश्रमे पदं करिष्यसि ।

अन्वयः—चिराय चतुरन्तमहीसपत्नी भूत्वा अप्रतिरथं दौष्यन्तिं तनयं निवेश्य तदर्पितकुटुम्बभरेण सार्धं हे, शान्ते त्वं अस्मिन् आश्रमे पुनः पदं करिष्यसि ।

शान्ते इति पदं 'आश्रमे इत्यस्य विशेषणतयापि योज्यम् । परिहीयते = क्षीयते । गमनवेला परिहीयते = गमनवेला अतिक्रामति इति सारः । उपरुध्यते + प्रतिबध्यते ।

तत् + मा + अतिमात्रं । कृते इत्यव्ययं षष्ठ्यन्तेन पदेन सह चतुर्थ्यर्थे प्रयुज्यते । मम कृते = मदर्थं, मह्यं । रामस्य कृते = रामाय । फलानां कृते = फलेभ्यः ।

मा उत् कण्ठितुम् = मा उत्कण्ठां कार्षीः । मा उत्कण्ठिता भव ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

6 शममेष्यति मम शोकः कथं नु वत्से त्वया रचितपूर्वम् ।
उटजद्वारविरूढं नीवारबलिं विलोकयतः ॥

गच्छ । शिवास्ते पन्थानः सन्तु ।

(निष्क्रान्ता शकुन्तला सहयायिनश्च)

सख्यौ—(शकुन्तलां विलोक्य) हा धिक् हा धिक् ! अन्तर्हिता शकुन्तला वनराज्या ।

काश्यपः—(सनिःश्वासम्) अनसूये, गतवती वां सहधर्मचारिणी । निगृह्य शोकमनुगच्छतं प्रस्थितम् ।

उभे—तात, शकुन्तलाविरहितं शून्यमिव तपोवनं कथं प्रविशामः ।

का—स्नेहप्रवृत्तिरेवंदर्शिनी । (सविमर्शं परिक्रम्य) हन्त भोः ! शकुन्तलां पतिकुलं विसृज्य लब्धमिदानीं स्वास्थ्यम्, कुतः,

7 अर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः ॥
जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा ।

(इति निष्क्रान्ताः सर्वे)

चतुर्थोऽङ्कः

---

6 दुःखमसहमानः कण्वो निःश्वसिति । ततः कथयति । वत्से, मम शोकः कथं शाम्यति ? आश्रमदेवताभ्यस्त्वं नीवारबलिं पूर्वम् अदाः । बलिरूपतया दत्ताः ते नीवारकणाः इतस्ततो विकीर्णा आसन् । ते तत्रैव स्थिताः विरूढाश्चासन् । यदाहं निवर्तिष्ये तदा तेषामंकुराणां निचये मम दृष्टिर्निपतिष्यति । तेषां दर्शनेन मम शोको न शान्तो भविष्यति, प्रत्युत वर्द्धिष्यत एव ।

अन्वयः—वत्से, त्वया रचितपूर्वं उटजद्वारविरूढं नीवारबलिं विलोकयतः मम शोकः कथं नु शममेष्यति ? नु ननु नाम, किल, खलु इत्यादयः शब्दाः अर्थव्यक्त्यर्थं प्रयुज्यन्ते । हा, धिक् = कष्टम् । हन्त हन्त ! अन्तर्हिता = तिरोहिता । वनराज्या = वनपटलेन । निगृह्य = नियम्य । शोकं निगृह्य प्रस्थितं मां अनुगच्छतम् ।

स्नेहप्रवृत्तिः स्नेहस्यान्तःप्रवर्तनं यत्र स्नेहोऽस्ति शून्यमपि सर्वं पूर्णं प्रतिभाति । यत्र स्नेहो नास्ति तत्र पूर्णमपि सर्वं शून्यमिव प्रतिभाति । ततः स्वास्थ्यलाभस्य हेतुं कथयति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

7) कन्या नाम धनं पितुरन्तिके न्यासतया रक्षार्थं निक्षिप्तमास्ते। तद् धनं तु परकीयमेव। तद् अधुना तस्य स्वामिने एव प्रत्ययच्छम्। अतो ममान्तरात्मा अधुना शान्तोत्कण्ठः शान्तशंको विगतभारश्च जातः।

अन्वयः—कन्या परकीयः अर्थ एव हि। तां अद्य परिग्रहीतुः सम्प्रेष्य प्रत्यर्पितन्यास इव मम अयमन्तरात्मा प्रकामं विशदः जातः।

॥ अभ्यासः ॥

I सप्तम्याः स्थाने 'यदा . . . तदा' प्रयुज्यताम्।

1) सुधांशौ सुरां विकिरति को मनस्वी न पिबेत्।

2) तारकासु नभसि प्रकाशमानासु सरसि कुमुदानि लसन्ति।

3) रामलक्ष्मणयोः वने वसतोः शूर्पणखा नो अभ्यगच्छत्।

4) बालिकासु पाठशालायां पठन्तीषु बालकाः क्रीडन्ति।

II) रूपाणि लिखत। यथा— माता, जाता, (तृ. ए.) मात्रा, अनया।

1) तेजस्वी, पार्वती (षष्ठी. ए) 2) हरिः, प्रीतिः (च. ए.) 3) धनी, मुनिः (ष. ब.) 4) बुद्धिमत्, मरुत् (प्र. ए.) 5) शिला, दिश् (स. ब.) 6) सुता, माता (प्र. ब.) 7) पिता, लता (स. ए.) 8) राजा, प्रजा (च. ए.) 9) वेधस्, ब्रह्मन् (तृ. ब.) 10 मनस्, वाच् (ष. ब.)

III शाकुन्तलकथासंक्षेपमनुवदत।

IV त्रयोदश-चतुर्दशदिवसयोः पठितानां विषयाणां आवर्तनं कृत्वा दृढीकुरुत।

V मयात्र 'अस्मान् साधु' 'शुश्रूषस्व गुरून्' इति पद्यद्वयं विस्तरेण व्याख्यायते। तत् सम्यक् पठित्वा तदन्यस्मात् पद्यचतुष्कात् युष्माकमिष्टतमं पद्यद्वयं स्वभावनानुरूपं यथाशक्ति व्याख्यायताम्।

अस्मिन् दिने वयं कण्वाश्रमं प्रविष्टाः स्मः। सप्त कथापात्राणि अस्माकं पुरस्तात् तपोवनेन गच्छन्ति। अग्रे मुनिकुमारौ, तत्पश्चाद् गौतमी, ततः काश्यपः शकुन्तला च, अन्ततः सख्यौ इत्ययं स्यात् तेषां प्रयाणक्रमः। शकुन्तलाविषयकचिन्तया कण्वः सख्यौ च कियद्दूरं गता इति नाजानात्। आश्रमे बहुदूरं पश्चात्कृते, ते कस्यचित् सरसः समीपमापुः। 'अपो दृष्ट्वा निवर्तयेत्' इति यात्रासमये प्राचीनैरंगीक्रियमाण आचारः खलु। तद् स्मृत्वा तात-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काश्यपं निवर्तयितुकामः शार्ङ्गरवः प्राह । 'तात, वयमत्र सरस्तीरं प्रविष्टाः स्मः । सलिलदर्शनावधि अनुयात्रा करणीयेति श्रुतं च । अतोस्मान् निवर्त्य प्रतिष्ठस्व ' इति ।

" राज्ञे किमपि सन्देष्टव्यम् । तदधिकृत्य तावत् पर्यन्तं न किमपि विचिन्तितम् । अधुना तु कुत्रचित् स्थित्वा सन्देशो निबन्धनीयः" । इति मत्वा काश्यपः मार्गस्य पार्श्वे स्थितस्य कस्यचित् क्षीरवृक्षस्य छायायां निविष्टः । कण्वः सन्देशनिबन्धनायैकाग्रचित्तो बभूव । तदा शकुन्तला पुरस्तात् दृश्यमाने सरसि कामपि दीनां चक्रवाकीमैक्षत । सा चक्रवाकी स्वसहचरं अपश्यन्ती करुणं क्रन्दन्ती अवर्तत । तस्याः सहचरस्तु नलिनीपत्रेण क्षणमात्रमन्तर्हितः किलाऽसीत् । सा चक्रवाकी स्वसहचरस्य क्षणिकमप्यदर्शनं नासहत । तस्या रोदनं शकुन्तलाहृदये प्रधूमितं विरहाग्निं प्रज्वालयामास । शकुन्तला तां सख्यौ प्रादर्शयच्च । ततः शकुन्तलाया हृदि विरहाग्निं प्रदीप्तमालक्ष्य अनसूया एवं सान्त्वयामास । येषा अधुना क्षणविरहेणापि रोदिति सैव चक्रवाकी सुदीर्घां रात्रिं विरहयातनां सहमाना यापयति । कथम् ? तस्याः प्रियसमागमे प्रत्याशाऽस्ति । " श्वः प्रभाते प्रियतमं प्रेक्षितुं प्रभवाम्येव ।" इयमाशैव तादृशीं विरहवेदनां सह्यां करोति ।

एवमेकत्र तासु भाषमाणासु अन्यत्र कण्वः सन्देशं निबध्नन् अवर्तत । स तदानीं शार्ङ्गरवमाहूय सन्देशमदिशत् । अयमस्यार्थः ।

" वयं खलु संयमधनाः, नास्माकमन्यत् किमपि धनमस्ति । भवन्तस्तु सम्पदां शिखरे तिष्ठन्ति । कुलं च भवतामत्युन्नतम् । इयं तु मम सुता त्वयि विश्वासात् एवं किमपि कृतवती । परिणयविधौ तु न तस्या बान्धवाः संवृद्धाः । सेयं भवता साधारणस्नेहेनानुग्रहीतव्या तथा भवतोऽन्याः पत्न्यः । इत्येवास्माकमाशा । अतः परं यत् किंचिन् सौभाग्यं लप्स्यते तत् भाग्यायत्तमेव । तदधिकृत्य बान्धवैः न वक्तव्यमस्ति ।" संदेशपद्यं यदि वयं विनीतस्वरेण पठामः तर्हि एवंविधोऽर्थः सिध्यति । तदेव पद्यं धीरस्वरेण पठ्यते चेत् अस्माद् विभिन्नः कश्चिदन्योऽर्थः उषःप्रकाश इवाविर्भवति । अथ द्वितीयोऽर्थः —

" त्वं सम्यक्चिन्तय वयं संयमधनाः खलु । न यूयमिव नश्वरधनवन्तः । यदि वयमवमन्येमहि तर्हि तव साम्राज्यमपि भस्मसात्कर्तुं वयं प्रभवेम । अथ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च त्वया इदमपि सम्यगालोचनीयं यत् तव कुलमस्मिन् विषये प्रसिद्धमिति। तव पूर्विकेभ्य आरभ्य या यास्तरुण्यो दृष्टिपथमापतन्ति तास्ताः परिणीयन्ते भुज्यन्ते च। किञ्चायं परिणयस्तु अस्माभिर्बान्धवैर्न ज्ञातः। अस्मदनुमतिः परिणये नापेक्षिता च। अतोऽस्य कर्मण उत्तरदातृत्वं त्वय्येव निक्षिप्तम्। तस्मात् सेयं शकुन्तला तव पत्नीजनेषु मान्यप्रतिपत्तिपूर्वकं परिगणनीया। तवान्तःपुरे सहस्रशः कुचकचवत्यो जन्तवः स्युः। मा खल्वेवेनां तास्वन्यतमां गणय। इयं सा मान्यप्रतिपत्तिपूर्वमेव द्रष्टव्या। अतः परं भाग्यायत्तमेव तदस्माभिर्न वाच्यम।" आद्यार्थे 'सामान्यप्रतिपत्तिरि'ति पदच्छेदः, द्वितीये तु सा मान्यप्रतिपत्तिरिति च।

शार्ङ्गरवमेवं संदिश्य तातकाश्यपः शकुन्तलां शास्ति स्म। "अयि वत्से त्वया इतः पर्यन्तं आरण्यकानां जीवितमेव नीतम्। विवाहजीवितकलापि ते न परिचिता। इतः पर्यन्तं त्वं मुनिकन्यकाऽसीः। अधुना त्वं राजधान्यां पट्टमहिषीपदमलंकरिष्यसि च। तत्र ते करणीयानि मयोपदेष्टव्यानि। राजकुले वृद्धाः श्वशुरादयः स्युः। तान् यथावसरं शुश्रूषस्व। अन्तःपुरे अंगनानां बाहुल्यमपि विद्येत। तासामग्रे "अहं नवागता युवती, मम भर्तुरहमेव प्रियतमा। किं युष्माभिः प्रक्षीणयौवनाभिः मम भर्तुः प्रयोजनम्?" इत्येवं यदि त्वया स्वामिनीभावोऽभिनीयेत तर्हि सर्वमपि सौभाग्यं नष्टं स्यादेव। अथ च तव भर्ता सार्वभौमः कार्यशतव्यापृतः स्यात्। कदाचिदन्यविषयकेण चित्तविक्षोभेण तुभ्यमपि कुप्यत् तथापि तस्य प्रतिकूला मा स्म भूः। तेन सह यथानुकूल्यं वर्तेथाः। अन्योऽप्यस्ति श्रद्धेयो विषयः। परिचारकजनाः प्रायशोऽल्पबुद्धयश्च स्युः। तेषु त्वया समानभावया भवितव्यम केषुचिदतिप्रीतिः केषुचिदल्पप्रीतिश्च प्रकटयेस्तर्हि ते सासूयाः सम्पद्येरन्। ततस्तेषां विद्वेषपात्रं च स्याः। अथान्यत् च। नीवारान्नमश्नन्त्यास्ते मृष्टान्नं लप्स्यते। स्थण्डिले शयानायास्ते पट्टांबरालंकृतः पर्यङ्कश्च। लंबकूर्चैस्तापसकुमारैस्सहोषितायास्ते राजसप्रभावाणां जनानां सहवासश्च लभ्येत। तदा त्वया गर्विष्ठया च न भवितव्यम। एवमेव युवतयो गृहिणीपदं सौभाग्यपूर्णं कुर्वन्ति। एतद्विपरीतास्तु स्ववंशं नित्यदुःखैः नरकं तन्वन्ति॥

—o—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अष्टत्रिंशो दिवसः

कादम्बरी

(शुकनासोपदेशः)

क्रिस्तोः पश्चात् पञ्चमदशकादारभ्य इतःपर्यन्तं संस्कृतसाहित्ये विरचिताः ग्रन्थाः प्रायशः पाण्डित्यस्य साङ्केतिकतायाश्च प्रकटनोपाधय एव दृश्यन्ते। किन्तु तेष्वन्यतमाः केचन ग्रन्थाः प्रौढा अपि भावनायाः वैविध्येन विकारस्य तीक्ष्णतया च पाठकान् सहृदयान् अद्भुतपरतन्त्रान् कुर्वन्ति। भावनाविलासेन शबला संस्कृतगद्यसाहित्ये प्रथमगणनीया काचित् आख्यायिकाऽस्ति कादम्बरीति प्रसिद्धा। महाकविना बाणभट्टेन विरचितायाः तस्याः आख्यायिकायाः दिग्दर्शनार्थं अत्र शुकनासोपदेशस्यैकदेश उद्ध्रियते।

प्रसङ्गः—चन्द्रापीडस्य युवराजाभिषेकः निर्वर्तिष्यमाण आस्ते। अभिषेकात् पूर्वमेव पक्वमतिः परिचयव्यवहारसम्पन्नः वृद्धसचिवः शुकनासः चन्द्रापीडमुपाजगाम। स वृद्धः तरुणाय चन्द्रापीडाय राज्यभरणार्थमत्यावश्यकान् उपदेशान् दिशति। तदन्तरा "युवावस्थायां वर्तमानं राजानं अहङ्कारकारिणी राज्यलक्ष्मीः दूषयति। तस्मात् तां प्रति भवता सावधानेन भवितव्यं" इति कथयति।

"तात! चन्द्रापीड! विदितवेदितव्यस्य अधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति। केवलञ्च निसर्गत एव अभानुभेद्यं अरत्नालोकच्छेद्यं अप्रदीपप्रभापनेयं अतिगहनतमो यौवनप्रभवम्। गर्भेश्वरत्वं अभिनवयौवनत्व अप्रतिमरूपत्वं अमानुषशक्तित्वञ्चेति महतीयं खल्वनर्थपरंपरा। सर्वाविनयानामेकैकमप्येषामायतनम्, किमुत समवायः। भवादृशा एव भवन्ति भाजनानि उपदेशानाम्। अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखेन उपदेशगुणाः। अहंकारदाहज्वरमूर्च्छान्धकारिता विह्वला हि राजप्रकृतिः। अलीकाभिमानोन्मादकारीणि धनानि, राज्यविषविकारतन्द्राप्रदा राजलक्ष्मीः। आलोकयतु तावत् कल्याणाभिनिवेशी लक्ष्मीमेव प्रथमम्। इयं हि सुभटखड्गमण्डलोत्पलवनविभ्रमभ्रमरी लक्ष्मीः क्षीरसागरात् पारिजातपल्लवेभ्यो रागम्, इन्दुशकलादेकान्तवक्रताम्,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उच्चैःश्रवसश्चञ्चलताम्, कालकूटात् मोहशक्तिम्, मदिराया मदम्, कौस्तुभमणेरतिनैष्ठुर्यम्, इत्येतानि सहवासपरिचायवशाद्विरहविनोदचिह्नानि गृहीत्वेवोद्गता। न ह्येवंविधं अपरं अपरिचितमिह जगति किञ्चिदस्ति, यथेयं अनार्या। लब्धापि खलु सा दुःखेन परिपाल्यते। दृढगुणपाशसन्दाननिष्पन्दीकृतापि नश्यति। उद्दामदर्पभटसहस्रोल्लासितासिपञ्जरविधृताप्यपक्रामति। मदजलदुर्दिनान्धकारगजघटितघनघटापरिपालितापि प्रपलायते। न परिचयं रक्षति। नाभिजनमीक्षते। न रूपमालोकयते। न कुलक्रममनुवर्तते। न शीलं पश्यति। न वैदग्ध्यं गणयति। न श्रुतमाकर्णयति। न धर्ममनुरुध्यते। न त्यागमाद्रियते। न विशेषज्ञतां विचारयति। नाचारं पालयति। न सत्यमवबुध्यते। न लक्षणं प्रमाणीकरोति। गन्धर्वनगरलेखेव पश्यत एव पश्यति। अद्यापि आरूढमन्दरपरिवर्तावर्तभ्रान्तिजनितसंस्कारेव परिभ्रमति। कमलिनीसञ्चरणव्यतिकरलग्ननलिननालकण्टकक्षतेव न किञ्चिदपि निर्भरमाबध्नाति पदम्। अतिप्रयत्नविधृतापि परमेश्वरगृहेषु विविधगन्धगजगण्डमधुपानमत्तेव परिस्खलति। पारुष्यमिवोपशिक्षितुमसिधारासु निवसति। विश्वरूपत्वमिव ग्रहीतुमाश्रिता नारायणमूर्तिम्। अप्रत्ययबहुला च दिवसान्तकमलमिव समुपचितमूलदण्डकोशमण्डलमपि मुञ्चति भूभुजम्। लतेव विटपानध्यारोहति। गङ्गेव वसुजनन्यपि तरङ्गबुद्बुदचञ्चला। दिवसकरगतिरिव प्रकटितविविधसंक्रान्तिः। पातालगुहेव तमोबहुला। हिडिम्बेव भीमसाहसकहार्यहृदया। प्रावृडिवाचिरद्युतिकारिणी। दुष्टपिशाचीव दर्शितानेकपुरुषोच्छ्राया। स्वल्पसत्त्वमुन्मत्तीकरोति। सरस्वतीपरिगृहीतमीर्ष्ययेव नालिङ्गति जनम्। गुणवन्तं अपवित्रमिव न स्पृशति। उदारसत्त्वं अमङ्गलमिव न बहुमन्यते। सुजनमनिमित्तमिव न पश्यति। अभिजातं अहिमिव लङ्घयति। शूरं कण्टकमिव परिहरति। मनस्विनं उन्मत्तमिवोपहसति। परस्परविरुद्धं चेन्द्रजालमिव दर्शयन्ती प्रकटयति जगति निजचरितम्। तथाहि सततम् ऊष्माणमारोपयन्त्यपि जाड्यमुपजनयति। उन्नतिमादधाना अपि नीचस्वभावतामाविष्करोति। तोयराशिसम्भवापि तृष्णां संवर्द्धयति। ईश्वरतां दधानापि अशिवप्रकृतित्वमातनोति। बलोपचयमाहरन्त्यपि लघिमानमापादयति। अमृतसहोदरापि कटुविपाका। विग्रहवत्यपि अप्रत्यक्षदर्शना। पुरुषोत्तमरतापि खलजनप्रिया।"

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सरलार्थः (पंक्तयः 1—10 तात ! चन्द्रापीड . . . राजलक्ष्मीः)

त्वं सर्वमपि जानासि । तादृशस्य ते न किञ्चिदप्युपदेष्टव्यमस्ति । यौवनजन्यं तमः सूर्यकिरणै रत्नप्रकाशैः दीपप्रभाभिरपि न खलु दूरीकर्तुं शक्यम् । जनानां चत्वारोऽनर्था सन्ति ; जन्मना प्रभुत्वं, नवयौवनं, असदृशसौन्दर्यं, अतिमानुषशक्तिश्च । एतेष्वेकैकं एव सर्वासामापदां हेतुः । तर्हि समुदायस्य का कथा ' ! उपदेशपात्राणि भवादृशा एव भवन्ति । शुद्धे मनस्येव हितोपदेशाः प्रतिफलन्ति ; यथा निर्मले स्फटिके चन्द्रकिरणा प्रविशन्ति यथा दाहज्वरेण जना गतप्रज्ञा भवन्ति तथैव अहंकारेण राजानः निर्विवेका जायन्ते ।

(10=23 पंक्तयः अहंकार . . . नश्यति)

धनं मिथ्याभिमानजनकं ; राज्यलक्ष्मीः विषवेगमुत्पादयति च । शुभाभिलाषी भवान् इमां लक्ष्मीमेव पश्यतु । यथा भ्रमरी कमलवनेषु विहरति तथा इयं भटखड्गेषु विराजते । इयं सहवासपरिचयात् विरहदशायां विनोदार्थं मन्दारकिसलयादिभ्यः अनुरागादिकमादाय पयःपयोधेरुद्गता । अनार्यैयं लक्ष्मीरिव अपरं किमपि परिचितं वस्तु नास्त्येव । तथाहि तस्या अधिगमो दुस्साधः ततोऽपि रक्षणं दुष्करम् । गुणगणैर्बद्धापि पलायते । भटखड्गपञ्जरे बद्धापि निष्क्रामति । मत्तगजैः परिपालितापि गूढमपसरति । यद्यदावश्यकं तत्तत् सा न करोतीत्याशयस्य सोदाहरणं प्रपञ्चनमेव अनन्तरवाक्यैः क्रियते ।।

(23—40 पंक्तयः अद्यापि. . . . .चरितम्)

मन्दरपर्वतस्य भ्रमणसंस्कारात् लक्ष्मीरपि सदा भ्राम्यति । न स्थिरा तिष्ठति । पद्मसाहचर्यात् नालदण्डकण्टकैः विद्धमिव सा कुत्रापि स पदं न्यस्यति । राजभवनेषु गजमदजलपानेनेव मत्ता इतस्ततः परिक्रामति । क्रूरताभ्यसनायेव खड्गधारासु वसति । विश्वरूपदर्शनपरिचयार्थं विष्णुमुपगता । इयं कमलमिव समुचितमूलदण्डकोशमण्डलं राजानं परित्यजति । (मूल-दण्ड-कोशादयः कमलस्य राज्ञश्च सन्ति ।) वसुजननी=वसूनां माता, सम्पदुत्पादयित्री

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च। अनिमित्तं = दुर्लक्षणं। अहिः = सर्पः। सद्गुणान् सा परिहरति इत्याशयस्य विपुलनमेव परिशिष्टानि वाक्यानि।

(40—45) पंक्तयः। तथाहि . . . खलजनप्रिया)

परस्परविरुद्धमिन्द्रजालं सा प्रकटयतीत्येतदुदाहरति। अत्र ऊष्मा इत्यस्य प्रतापः उष्णं चार्थः। जाड्यं = जडत्वं शैत्यं च। ईश्वरा अपि अशिवप्रकृतयो भवन्ति (शिष्टं स्पष्टम्।)

[विदितं वेदितव्यं येन सः। अधीतानि सर्वाणि शास्त्राणि येन सः। न अल्पं अपि उपदेष्टव्यं अस्ति। केवलं च। निसर्गतः = स्वभावत। भानुना न मेयम्। रत्नप्रभया अच्छेद्यं। दीपप्रकाशेन दूरीकरणाय अशक्यं। महती इयं खलु। सर्वाविनयानां एकैकं अपि एषां आयतनम्। (एषां एकैकमपि इति योजनीयं) मणौ इव। गभस्तिः = किरणः। अहङ्काररूपस्य दाहज्वरस्य मूर्च्छया अन्धकारिता। मिथ्याभिमानेन उन्मादकारीणि। राज्यविषविकारेण आलस्योत्पादिनी। सुभटानां स्वड्गमण्डलरूपेषु उत्पलवनेषु विभ्राम्यन्ती भ्रमरी। एकान्तवक्रता = सदा कुटिलता। विरहविनोदचिह्नानि (तत्तत्सहचरेभ्यः तत्तद्गुणानादाय)। न हि एवंविधं। यथा इयं अनार्या। दृढगुणपाश-बन्धनैः चरितुं अशक्या अपि। अतिगर्विष्ठभटसहस्त्र-उल्लासित-असिलता पञ्जर-विधृता अपि अतिक्रामति। मदजल-दुर्दिन-अन्धकार-गजघटित घनघटा परिपालिता अपि। श्रुतं = विज्ञानं। अनुरुध्यते = अनुसरति। पश्यतः = पश्यन्तं अनादृत्य, पश्यति सति। आरूढ-मन्दर-परिवर्तआवर्त भ्रान्तिजनितसंस्कारा इव। आवर्तः = भ्रमिः, whirlpool. कमलिनी-सञ्चरण-व्यतिकरलग्न-नलिननाल-कष्टक-क्षता इव। विविधगन्ध-गजगण्ड-मधुपानमत्ता इव। पारुष्यं इव उपशिक्षितुं असिधारासु। धारा = sharp edge. लक्ष्मीः सायं कमलमिव राजानं मुञ्चति। दिवस-करः = सूर्यः। परस्परविरुद्धं च इन्द्रजालं इव। ऊष्माणं आरोपयन्ती अपि। आदधाना = जनयन्ती। बलोपचयं = बलाविक्यं। आहरन्ती = जनयन्ती। पुरुषोत्तमरता = विष्णुप्रिया॥

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ आयुर्वेदग्रन्थभाषापरिचयः ॥

अथायुर्वेदग्रन्थभाषापरिचयार्थं अष्टांगहृदयात् सुश्रुतसंहितायाश्च द्वित्राणि पुटानि अत्रोद्ध्रियन्ते । अष्टांगहृदये सूत्रस्थाने सप्तमाध्यायात् कतिचन पद्यान्यत्र दत्तानि । विषांशादन्नसंरक्षणविधिः अत्र प्रतिपाद्यते विषांशस्य स्पर्शने भक्षणे आमाशयप्रवेशे पक्वाशयप्रवेशे च ये ये विकारा जायन्ते तेषां विवरणं तेषां परिहारमार्गाश्च अत्र प्रस्तूयन्ते ।

1) स्पृष्टे तु कण्डूदाहोषा ज्वरार्तिस्फोटसुप्तयः ।
नखरोमच्युतिः शोफः, सेकाद्या विपनाशनाः ॥
शस्तास्तत्र प्रलेपाश्च सेव्यचन्दनपद्मकैः ।
ससोमवल्कतालीसपत्रकुष्ठामृतानतैः ॥

2) लालाजिह्वोष्ठयोर्जाड्यमूषा चिमिचिमायनम् ।
दन्तहर्षो रसाज्ञत्वं हनुस्तंभश्च वक्त्रगे ॥
सेव्याद्यैस्तत्र गण्डूषाः सर्वं च विषजिद् हितम् ॥

3) आमाशयगते स्वेदमूर्च्छाध्यानमदभ्रमाः ।
रोमहर्षो वमिर्दाहः चक्षुर्हृदयरोधनम् ॥
बिन्दुभिश्चाचयोऽङ्गानां ;

4) पक्वाशयगते पुनः
अनेकवर्णं वमति मूत्रयत्यतिसार्यते ।
तन्द्रा कृशत्वं पाण्डुत्वं उदरं बलसंक्षयः ॥
तयोर्वान्तविरक्तस्य हरिद्रे कटभींगुदम् ।
सिन्दुवारित-निष्पाप-बाष्पिका-शतपर्विकाः ॥
तण्डुलीयकमूलानि कुक्कुटाण्डमवल्गुजम् ।
नावनाञ्जनपानेषु योजयेद्विषशान्तये ॥

5) विषभुक्ताय दद्याच्च शुद्धायोर्ध्वमधस्तथा ।
सूक्ष्मं ताम्ररजः काले सक्षौद्रं हृद्विशोधनम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुद्धे हृदि ततः शाणं हेमचूर्णस्य दापयेत् ।
न सज्जते हेमपाङ्गे पद्मपत्रेऽम्बुवद्विषम् ॥
जायते विपुलं चायुः, गरेऽप्येष विधिः स्मृतः ॥

[सर्वेऽपि शास्त्रग्रन्थाः गुरुमुखादेव पठितुं शक्यन्ते । आयुर्वेदग्रन्थानां भाषारीतिपरिज्ञानार्थमेवायमुद्यमः । अस्मिन् पाठभागे विद्यमानानां केषांचन सांकेतिकशब्दानां आवश्यकः परिचयोऽत्र प्रदीयते । षड्रसाः = मधुर-अम्ल-लवण-तिक्त-ऊषण(कटु)-कषायाः । दोषाः = वातः पित्तं कफश्च । तेषां समावस्थायामारोग्यं, विषमावस्थायां रोगश्च भवति । वीर्यं = शीतमुष्णं च । विपाकः = जठराग्निप्रवर्तनैः रसानां परिणामः ।

1) स्पृष्टे = विषे स्पृष्टे सति, विषस्पर्शेनैव । कण्डूः = itching. दाहः = शरीरं दह्यते इत्येवंरूपं संवेदनं (burning sensation) ऊषा = गात्रे इतस्ततः अनुभूयमानो दाहः । अर्तिः = पीडा, वेदना (pain) स्फोटः = व्रणं (boil) सुप्तिः = स्पर्शसंवेदनाभावः । च्युतिः = भ्रंशः । शोफः = swelling. अथ "सेकाद्याः" इत्यादिना तस्य प्रतिविधिं निर्दिशति—सेकः = जलधारा । शस्ताः = इष्टाः करणीया इति सारः । प्रलेपः = लेपनं । सेव्यं = उशीरं । सोमवल्कः = सितखदिरः (खैर का पेड) कुष्ठः = ओषधि-विशेषः (कुटं). नत = lead.

2) विषे मुखान्तः प्रविष्टे सति विकारान् वर्णयति । लाला = saliva. जाड्यम् = अचेतनत्वं । चिमिचिमायनं = अणुप्राणिप्रसरणप्रतीतिः । दन्तहर्षः = numbness of teeth हनुः = chin वक्त्रगे = वक्त्रं गच्छति सति गण्डूषः = वक्त्रे कषायादिद्रववस्तूनां धारणं ।

3) विषस्य आमाशयप्रवेशे विकारान् दर्शयति—आध्मानं = उदरबृंहणं । वमिः = वमनं (vomitting) बिन्दुभिः अंगानां आचयः च = अंगेषु सर्वत्रापि विविधवर्णानां बिन्दूनां व्याप्तिः ।

4) पक्वाशयप्रवेशे विशेषमाह—तन्द्रा = आलस्यं (sleepiness) अतिसार्यते = द्रवरूपं मलं विसृजति । पाण्डुत्वं = विवर्णता । उदरं = महोदरं । तयोः = आमपक्वाशयप्राप्तविषयोः । वान्तविरिक्तस्य = वमनं विरेचनं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च कृतवतः । हरिद्रादि अवल्गुजपर्यन्तं ओषधीनां नामानि । नावनं = नस्यं ।

5) वमनविरेचनानन्तरं शुद्धकोष्ठाय किं देयमिति विवृणोति । ताम्ररजः = copper powder क्षौद्रं = मधु । शाणं = $3\frac{3}{4}$ gram हेम = स्वर्णं । सज्जते = सक्तं भवति, विलीयते । हेमपाङ्गे = स्वर्णं पीतवतः शरीरे । अम्बुवत् = जलमिव ।

[अथात्र सुश्रुतसंहितायाः कश्चन भाग उद्ध्रियते । भगवान् धन्वन्तरिः सुश्रुतं प्रत्यक्षत उपदिदेश । तमुपदेशं सुश्रुतः संगृहीतवान् । संग्रह एव सुश्रुतसंहितेति प्रथिता । अस्मिन् प्रकरणे आहारस्य प्राधान्यमधिकृत्य सुश्रुतो धन्वन्तरिं पृच्छति । तस्योत्तररूपेण धन्वन्तरिः शालीनां गुणवीर्यविपाकादीन् विशदयति ।]

सुश्रुतसंहितायां सूत्रस्थाने षट्चत्वारिंशत्तमोऽध्यायः । अथातोऽन्नपानविधिमध्यायं व्याख्यास्यामः, अथोवाच भगवान् धन्वन्तरिः ।

1) धन्वन्तरिमभिवाद्य सुश्रुत उवाच—प्रागभिहितः "प्राणिनामूत्रमाहारो बलवर्णौजसां च, स षट्सु रसेष्वायत्तः । रसाः पुनर्द्रव्याश्रयिणः" (इति) । द्रव्यगुणवीर्यविपाकनिमित्ते च क्षयवृद्धी दोषाणां साम्यं च । ब्रह्मादेरपि लोकस्याहारः स्थित्युत्पत्तिनाशहेतुः । आहारादेवाभिवृद्धिर्बलमारोग्यं वर्णेन्द्रियप्रसादश्च, तथा ह्याहारवैषम्यादस्वास्थ्यं, तस्याशित-पीत-लीढ-खादितस्य-नानाद्रव्यात्मकस्य अनेकविधविकल्पस्य अनेकविधप्रभावस्य पृथक् द्रव्यरसगुणवीर्यविपाककर्माणीच्छामि ज्ञातुम् । न ह्यनवबुद्धस्वभावाभिषजः स्वस्थानुवृत्तिं रोगनिग्रहणं च कर्तुं समर्थाः, आहारायत्ताश्च सर्वप्राणिनो यस्मात् तस्मादन्नपानविधिमुपदिशतु मे भगवानित्युक्तः प्रोवाच भगवान् धन्वन्तरिः—अथ खलु वत्स सुश्रुत यथाप्रश्नमुच्यमानमुपधारयस्व ।

2) तत्र लोहितशालि-कलम-कर्दम-पाण्डुक-सुगन्धक-शकुनाहृतपुष्पाण्डक-पुण्डरीक - महाशालि - शीतभीरुक-रोध्रपुष्पक-दीर्घशूक-काञ्चनक-महिष-महाशूक-हायनक-दूषक-महादूषक-प्रभृतयः-शालयः ।

3) मधुरा वीर्यतः शीता लघुपाका बलावहाः ।
पित्तघ्नाल्पानिलकफा स्निग्धा बद्धाल्पवर्चसः ॥
तेषां लोहितकः श्रेष्ठो दोषघ्नः शुक्रमूत्रलः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चक्षुष्यो वर्णबलकृत् स्वर्यो हृद्यस्तृषापहः ॥
व्रण्योज्वरहरश्चैव सर्वदोषविषापहः ।
तस्मादल्पान्तरगुणाः क्रमशः शालयोऽवराः ॥

4) षष्टिक-काङ्गुक-मुकुन्दक-पोतक-प्रमोदक-कालक-असनपुष्क-महाषष्टिक-चूर्णक-कुरवक-केदार-प्रभृतयः-षष्टिकाः ।

5) रसे पाके च मधुराः शमना वातपित्तयोः ।
शालीनां च गुणैस्तुल्या बृंहणा कफशुक्रलाः ॥
षष्टिकः प्रवरस्तेषां कषयानुरसो लघुः ।
मृदुः स्निग्धस्त्रिदोषघ्नः स्थैर्यकृत् बलवर्धनः ॥
विपाके मधुरो ग्राही तुल्यो लोहितशालिभिः ।
शेषास्त्वल्पान्तरास्तस्मात् षष्टिकाः क्रमशो गुणैः ॥

6) कृष्णव्रीहि - शालामुख - जतुमुख- नन्दिमुख-लावाक्षक-त्वरितक-कुक्कुटाण्ड-पारावतक-पाटलप्रभृतयो-व्रीहयः ।

7) कषायमधुराः पाकेऽमधुरा वीर्यतोऽहिमाः-
अल्पाभिष्यन्दिनस्तुल्याः षष्टिकैर्बद्धवर्चसः ।
कृष्णव्रीहिर्वरस्तेषां कषायानुरसो लघुः ॥
तस्मादल्पान्तरगुणाः क्रमशो व्रीहयोऽपरे ।
दग्धायामवनौ जाताः शालयो लघुपाकिनः ॥
कषाया बद्धविण्मूत्रा रूक्षः श्लेष्मापकर्षणाः ।
स्थलजाः कफपित्तघ्नाः कषायाः कटुकान्वयाः ॥
किञ्चित् सतिक्तमधुराः पवनानलवर्धनाः ।
कैदारा मधुरा वृष्या बल्याः पित्तनिबर्हणाः ॥
ईषत् कषायाल्पमला गुरवः कफशुक्रलाः ।
रोप्यातिरोप्या लघवः शीघ्रपाका गुणोत्तराः ॥
अदाहिनो दोषहरा बल्या मूत्रविवर्धनाः ।
शालयश्छिन्नरूढा ये रूक्षास्ते बद्धवर्चसः ॥
तिक्ताः कषायाः पित्तघ्नाः लघुपाकाः कफापहाः ।
विस्तरेणायमुद्दिष्टः शालिवर्गो हिताहितः ॥

॥ इति शालिवर्गः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गद्यम् 1) प्राग्=पूर्वं । अभिहितः=उक्तः । धन्वन्तरिणा सुश्रुतः उक्तः = धन्वन्तरिः सुश्रुतमुवाच । किमुवाच ? यदुक्तं तदेवात्रोद्ध्रियते—"प्राणिनां........आश्रयिणः" इति पूर्वं धन्वन्तरिः सुश्रुतमुवाच ।

आयत्तः=अधीनः । द्रव्याश्रयिणः=मूर्तवस्तुषु विद्यमानाः । जन्तूनां क्षयवृद्ध्योः निमित्तं द्रव्याणां गुणवीर्यविपाकाः । ब्रह्मण आरभ्य सर्वस्यापि जीवलोकस्य । अशन-पान-लेह खादनरूपेण चतुर्विधमन्नं वयं भक्षयामः । विकल्पः = विभागः । न + हि + अनवबुद्धस्वभावाः = अन्नस्वभावानभिज्ञाः । भिषजः = वैद्याः । स्वस्थानुवृत्तिः = स्वस्थचर्या । एवं जीवितं सर्वथा सौभाग्यपूर्णं कुर्वाणस्य अन्नस्य विभागगुणवीर्यादिपरिचयं ज्ञातुं सुश्रुतः धन्वन्तरिं अर्थितवान् । तदा धन्वन्तरिः विशदयितुमारभते—"अथ वत्स" इत्यादिभिर्वाक्यैः ।

2) व्रीहिसमुदायं धन्वन्तरिः त्रिधा विभजति । शालयः षष्टिकाः व्रीहय इति । तेषु शालीनां अवान्तरविभागा अत्र निर्दिश्यन्ते । लोहितशाल्यादयो शालीनां नामानि ।

3) शालिविशेषाणां गुणवीर्यादिकान् निर्दिशति—लघुपाकाः=अनायासमेव पचनं कुर्वाणाः । पित्तघ्नाः=पित्तनाशकाः । अल्पानिलकफाः=वातकफवैषम्यमल्पीकुर्वन्तः । वर्चस्=मलं । मलबन्धकारिणः । शुक्रं मूत्रं च वर्धयन्ति । चक्षुषे हितं=चक्षुष्यं । स्वराय हितं=स्वर्यं । व्रणाय हितम् । तस्यात् लोहितकात् किञ्चित् न्यूनगुणाः अन्ये शालयः ।

4) अथ षष्टिकान् विवृणोति—षष्टिक - काङ्गुकादयः षष्टिकवर्गे अन्तर्भूताः ।

5) पद्यम्—षष्टिकवर्गस्य गुणान् विवृणोति—बृंहणाः=स्थूलत्वकारिणः त्रिदोषघ्नः=वातपित्तकफविकारनाशनः । ग्राही=मलबन्धकृत् । शेषाः षष्टिकाः षष्टिकात् न्यूनगुणाः ।

6) गद्यम्—व्रीहिविभागं विवृणोति—कृष्णव्रीह्यादयो व्रीहिविशेषाः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

7) पद्यम्—अल्पाभिष्यन्दिनः = शुक्रवृद्धिं अल्पं जनयन्तः। अथ क्षेत्र-वैविध्यमनुसृत्य शाल्यादीनां गुणा अपि विभिन्ना भविष्यन्तीत्येतं स्वभावविशेषं विशदयति, 'दग्धायामवना'वित्यादिभिः श्लोकैः। अवनौ = भूमौ। विट् = मलं। रूक्षाः × स्निग्धाः। श्लेष्मा = कफः। स्थलजाः = अपङ्किलेषु क्षेत्रेषूत्पन्नाः। वातमग्निं च वर्धयन्ति। कैदाराः = पंकिलक्षेत्रसंभूताः। वृष्याः = शुक्रवर्धकाः। पित्तनाशकः। रोप्यातिरोप्याः = उत्खातप्रतिरोपिताः। छिन्नरूढाः = लवना (harvest)नन्तरं तत्रैव प्ररूढाः। उद्दिष्टाः = निर्दिष्टाः। हिताहिताः = केचन हिताः केचन अहिताश्च।

॥ अभ्यासः ॥

I अतीते दिवसे अधीतं शाकुन्तलम् (मूलमात्रम्) अनुवदत।

II शुकनासोपदेशात् भवतां हृद्यतमानि द्वित्राणि वाक्यानि उद्धृत्य अर्थं लिखत।

III अधोदत्तानि समस्तपदानि विश्लेष्य लिखत। यथा—

सुभट-खड्गमण्डल-उत्पल-वन-विभ्रम-भ्रमरी।

1) मदजलदुर्दिनान्धकारगजघटितघनघटापरिपालिता।

2) आरूढमन्दरपरिवर्तावर्तभ्रान्तिजनितसंस्कारा।

3) अहङ्कारदाहज्वर- मूर्च्छान्धकारिता।

4) कमलिनीसञ्चरणव्यतिकरलग्ननलिन- नालकण्टका।

IV वक्त्रादारभ्य पक्वाशयपर्यन्तं विषप्रसरणेन के के विकारा जायन्ते? यथाक्रमं विव्रियताम्?

V शालि-षष्टिक-व्रीहीणां गुणविशेषान् संक्षिपत।

— ० —

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकोनचत्वारिंशो दिवसः

आधुनिककाव्यभाषापरिचयः

॥ शकुन्तला ॥

[पुनस्समागमानान्तरं शकुन्तला कस्यांचन रात्रौ राजसौधे हंसतूलधवले मृदुले पल्यङ्के भर्त्रा दुष्यन्तेन सह निद्राणा वर्तते। निद्रामन्तरा स्वप्ने किमपि दृष्ट्वैव झटिति सा प्रबुद्धा भवति। भर्ता तदानीमपि निद्राण एव तस्याः पार्श्वे शेते। एकान्तेऽस्मिन् सा चिरवियुक्तं कण्वाश्रमं सङ्कल्पमात्रेण प्रविशति।]

शेते निशीथे सविधेऽवदाते पतिः स सम्राट् कमनीयतल्पे।
द्रागेकपत्नी वसुधासपत्नी शकुन्तलाऽबुध्यत भग्ननिद्रा ॥ १ ॥

आत्मानमासीनमविन्दतासौ साध्वी तदाभ्रङ्कषसौधगर्भे।
यदा सनीरा यमुनासमीराः संवाहयामासुरमी तदङ्गम् ॥ २ ॥

स्वप्ने चिरं विस्मृति-सिन्धुमग्नो दृष्टः स रम्याश्रमभूविभागः।
प्रियंवदा सा प्रियमालपन्ती तथाऽनसूयाऽप्यनसूयशीला ॥ ३ ॥

कण्वः कृपापूर्णपरार्थवृत्तिः सदाऽनुगृह्णन् सचराचरां गाम्।
वैखानसैराकलतोपकण्ठः तपस्स्वकुण्ठः प्रणयी पिता च ॥ ४ ॥

चिरं निदध्यौ गलदश्रुबिन्दुप्रवाहबन्दीकृतलोचना सा।
अस्तम्भतान्तःकुहरे गलस्य सगद्गदं निश्वसितं च तस्याः ॥ ५ ॥

ददर्श खे सा चरतोऽभ्रखण्डान् गवाक्षतश्चन्द्रिकया विलिप्ते।
चित्तेऽपि तस्याः परिवृद्धधाराः चेरुर्विचाराश्च बहुप्रकाराः ॥ ६ ॥

'अपि स्वधाम्ना कुशली पिता मे वैखानसाश्चधिगतात्मविद्याः।
निरासतो मे परिदीर्णचित्ता कथां गता कां बत गौतमी स्यात् ॥ ७ ॥

श्रोष्यामि किंस्वित्पुनरप्यमूनि हृद्यानि चोद्यत्किलकिञ्चितानि।
अधस्तलं मे मनसः स्पृशन्ति प्रियंवदायाः प्रियभाषितानि ॥ ८ ॥

कस्याप्रहस्तं कृतिनः समर्थं न्यपीडयत्सा रसिका सखी मे।
अभीष्टभर्तुः पदसेवया स्यात् तथाऽनसूया चरिताखिलार्था ॥ ९ ॥

'इमे अपि द्वे तनये प्रदेये' मृषा न तत्स्याद्वचनं पितुर्मे।
सख्यौ परं मे भवतोपवैस्ते द्रक्ष्यामि भूयोऽपि सुतैः सनाथे ॥ १० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अरालसीमानि विसृत्वराणि मरालजालैरविनाकृतानि ।
विलोकयिष्ये पुनरप्यमूनि किं मालिनीधूसरसैकतानि ॥ ११ ॥

उत्कन्धरः सर्वजनप्रियो मे पत्या सदक्षः सहकारवृक्षः ।
युक्तो वनज्योत्स्निकया तरुण्याविलासशीलः फलितः किमु स्यात् ॥ १२ ॥

दीर्घैरपांगैस्तु वियोगकाले विलोकितं यन्मृगशावकेन ।
लीढं यदङ्गं, द्वयमेतदद्याप्याभाति मे मुद्रितमन्तरंगे ॥ १३ ॥

बाष्पं प्रसूनैः परमुत्सृजन्त्यः प्रचालयन्त्यो लतिकाः प्रवालान् ।
न्यवारयन्मां गमनात् तदद्याप्याभाति मे चित्रितमन्तरंगे ॥ १४ ॥

अन्तर्दधानां वनराजिमध्ये पश्यन् सखीभ्यां सह मां सबाष्पम् ।
संस्तम्भिताङ्गः स पिताऽधुनापि तिष्ठत्यहो मे पुरतस्तथाक्ष्णोः ॥ १५ ॥

कदा नु कान्ते कलकाननन्ते भूयोऽप्यनाडम्बरवेषभूषा ।
घटाम्बुधारापरिसेचनाद्यैः सोल्लासमुल्लासयितास्मि सर्वान् । १६ ॥

अदूषयन्मां नृपतेः समक्षं किञ्चित् सतीं शार्ङ्गरव त्वमेताम् ।
विधिर्विगर्ह्यो न तु सर्वथात्वं, तं द्रष्टुकामास्मि चिरं स्वसा त्वाम् ॥१७॥

परिष्वजस्व प्रियतात पुत्रीमागःसहस्रं सदयं क्षमस्व ।
हविःसुगन्धीनि तवाङ्गकानि पुन पुनर्मां मलिनां पुनन्तु । १८ ॥

प्रियंवदे देह्यवलम्बनं मे विचारधारापरिमूर्च्छितायै ।
तथानसूये परिरक्ष मां त्वं नियन्त्रितोल्लासविलाससौख्याम् ॥ १९ ॥

सगद्गदः सोच्छ्वसितः स कण्ठो बभञ्ज मौनं प्रसृतं समन्तात् ।
महीपतिः 'किंन्विदमि'त्यकस्मादबुध्यतोद्भ्रान्तविसारिताक्षः ॥ २० ॥

'क्षमस्व कम्राङ्गि ममापराधान् यैर्दूयसेऽद्यापि कृतैर्मया प्राक् ।
स्वतस्तमोन्धा विबुधैः प्रदत्तां सुधां सुरामकलयन्ति मूढाः ॥ २१ ॥'

इति वदति नरेन्द्रे नाशकत्सुन्दरी सा
विशदयितुमतल्पारूढमन्तर्विकारम् ।
नयनसलिलधाराक्लिन्नगण्डस्थली सा
कमितुरुरसि ताम्यद्यातनाऽभूद्विलीना ॥ २२ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पद्यम् 1—भर्ता दुष्यन्तः अन्तिके निद्राणः शेते । शकुन्तला स्वप्ने अबुध्यत । शी+ते=शेते, शयानो वर्तते । सविधे=समीपे । अवदाते= विशुद्धे । द्राक्=शीघ्रं । एकपत्नी=एकभर्तृका । प. 2) आत्मानं= स्वां । अविन्दत=अजानात् । अभ्रङ्कष=आकाशचुम्बिन् । गर्भे=अन्तः । संवाहयामासुः = स्निग्धं पस्पृशुः shampooed समीरः = पवनः । प. 3) तस्या मनसि आश्रमपरिसरः प्रियंवदा चे प्रतिभातः स्म । सिन्धुः=समुद्रः । प. 4) कण्वोऽपि सङ्कल्पे आविर्भवति स्म । गाम्= भूमिम् । वैखानसैः= मुनिकुमारैः । उपकण्ठः=परिसरः । आकलित=आवृत । अकुण्ठः=सफलः । पिता च दृष्टः इति पूर्वपद्येनान्वयः । प. 5) सा बाष्पं व्यसृजत् ' विशश्वास च । निदध्यौ=अध्यायत् । बन्दीकृत=निरुद्ध । अस्तंभत=स्तब्धमभूत् । प. 6) सा गवाक्षद्वारा (window) नभसि चरतो मेघशकलान् ददर्श । तस्याः चित्तेऽपि चिन्ताशकलाः सञ्चेरुः । प. 7) पितुः मुनिकुमाराणां गौतम्याश्च का कथा स्यात् ? स्वधाम्ना=स्वतेजसा । अधिगत=प्राप्त । निरासतः=त्यागात् । दीर्ण=दलित । प. 8) सा प्रियंवदां स्मरति । किंस्वित्=किम् ? उद्यत्= उद्गच्छत् । किलिकिञ्चितं=विविधविकारसंमिश्रो भावः । प. 9) ते मम सख्यौ भर्तृमत्यौ स्याताम् इति सा उद्दिशति । कृती=भाग्यवान् 10) सा पितुर्वचनं स्मरति । सख्यावपि अहमिव पुत्रवत्यौ स्यातां इति च सा संभावयति । मृषा=वृथा । सनाथे=सहिते । प. 11) सा मालिनीनदीतटं स्मरति । अराल=वक्र, कुटिल । विसृत्वर=व्याप्त मरालजालः=हंससमूहः । अविनाकृत= सहित । धूसर=धवल । प. 12) सहकारो वनज्योत्स्ना च स्मृतिं प्रविशतः । उत्कन्धरः=उन्नतकण्ठः (शीर्षः) सदृक्षः=सदृशः । प. 13) पुत्रनिर्विशेषः स मृगशिशुश्च स्मृतिपथमायाति । मृगशावकस्य करुणविलोकनं अंगलेहनं च मनसि मुद्रितमिव वर्तते । लिह्+त=लीढ (licking) द्वयं एतद् अद्य अपि आभाति । प. 15 आश्रमात् प्रेषणसमये तस्याः तिरोधानपर्यन्तं कण्वो वीक्षमाणोऽवर्तत । सोऽयं तस्याः पुरतः तथैवतिष्ठतीव । अन्तर्दधानां= तिरोभवन्तीं अक्ष्योः=नेत्रयोः प. 16) सा आश्रमे जलसेचनादिपरिशरणं अधुनाप्यभिलषति । प. 17) दुष्यन्तसमक्षं स्वं दूषितवन्तमपि शार्ङ्गरवं सा दिदृक्षति । विगर्ह्यः =निन्द्यः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प. 18) तस्याः ईदृशी सङ्कल्पमयी चिन्ता क्रमशः तथ्यमयीव परिणता। सा आश्रमे वर्तते, कण्वः स्वसमक्षं तिष्ठति इति तस्याः प्रतिभाति च। सा समक्षं स्थितमिव तातमभिसंबोध्य वदति। परिष्वजस्व=आलिंगनं कुरु आगस्=अपराधः पुनन्तु=शुद्धीकुर्वन्तु। प. 19) पुरतः प्रत्यक्षमिव दृश्यमानां प्रियंवदां अनसूयां च वदति। देहि=यच्छ उल्लासविलाससौख्यं राजधान्यां मे नियन्त्रितं, तादृशीं मां। प. 20) प्रथमं स्वप्नः ततः सङ्कल्पः ततः अबोध-प्रलपनं तदनन्तरं क्रन्दनं अयमत्र क्रमः। सा सगद्गदं क्रन्दति। तदा पार्श्वे शयानो दुष्यन्तः प्रबुध्य किमिदमिति पृच्छति। अकस्मात् द्रुतम्। प. 21) पूर्वं स्वकृतं परित्यागं स्मृत्वा सेयं अधुनापि रोदितीति अन्यथासंभाव्य राजा तां क्षमामर्थयते। दूयसे=सन्तपसि तमोन्धाः=तमसा अन्धाः सुरां=मद्यं आकलयन्ति=गणयन्ति। प. 22) शकुन्तला तदा न किमपि वक्तुमशकत्। सा स्वकमितुर्वक्षसि लग्ना अशेत।

॥ उपनिषद्भाषापरिचयः ॥

कठोपनिषद्

अथ उपनिषदां एकदेशज्ञानार्थं अथवा दिग्दर्शनार्थं कठोपनिषदमवतारयामः। उप+नि+सद् इत्यस्य पदस्य विभक्ता अंशाः। उपनिषीदति, उपगमयति, जिज्ञासून् परमात्मनः समीपं गमयति इति उपनिषद् शब्दस्यार्थः। सूक्ष्मदृक् कर्मकृत् इत्यादि शब्दवत् अयं क्विबन्तः शब्दः। उपनिषदां पठनेन जिज्ञासव आस्तिकाः ब्रह्मसामीप्यं प्राप्नुवन्तीत्यर्थः॥

उपनिषदः परश्शताः विद्यन्ते। किन्तु ताः सर्वा अपि न तुल्यमूल्यवन्तः सन्ति। काश्चन निर्वैचित्र्या अरोचका गतानुगतिकत्वात् विरसाश्च। उपनिषच्छाखासु प्रकृष्टेयं कठोपनिषद् यतोऽस्यां कथारूपेण आत्मविद्या प्रतिपादितास्ति। आत्मतत्त्वस्याख्यानमेव सर्वास्वप्युपनिषत्सु दृश्यते। इयं विचारधारा वेदकालादारभ्याभिवृद्धिं प्राप्ता लक्ष्यते। वेदेष्वितस्ततो विकीर्णतया दृश्यमान आत्मविद्याविचारः उपनिषत्सु पल्लवितः कुसुमितः फलितश्च समालोक्यते। उपनिषत्सु पल्लवितः कुसुमितः फलितश्च समालोक्यते। अस्याः कठोपनिषदः कथासारोऽत्र प्रदर्श्यते॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाजश्रवसो नाम कश्चिद् ब्राह्मणः सर्वस्वदक्षिणं नाम यज्ञमारभत। न खलु स मोक्षकामः, किन्तु कीर्तिकाम आसीत्। परप्रशंसामात्राभिलाषी स जीर्णा आसन्नमरणाश्च धेनूः ब्राह्मणेभ्यो दातुं ऐच्छत्। तस्यासीत् कश्चन पुत्रो नचिकेता नाम। यथाश्रुतं यथादृष्टं विश्वसन् स शुद्धाशयः पितरमुपगम्य पप्रच्छ, "तात, त्वं मां कस्मै यच्छसि" इति। तस्य निष्कलंकस्य कुमारस्यैवंविधो विचार आसीत्। "पिता यागे सर्वस्वं यच्छति। सर्वस्वदक्षिणस्य यज्ञस्यायमेव स्वभावः खलु। एवं चेत् पुत्रोपि पितुः सर्वस्वे अन्तर्भवति। तस्माद् अहमपि कस्मैचिद् दातव्य एव"। एवं विचिन्त्यैव स ऋजुमतिः पितरं पृष्टवान्, तात मां कस्मै दास्यसि इति। वक्रबुद्धिः अशुद्धान्तरंगः पिता तु पुत्रः स्वमपहसतीत्याशशङ्के। नचिकेताः प्रथमं पप्रच्छ। पिता मौनमालम्बे। पुनरपि पप्रच्छ। पिता तथैवातिष्ठत्। प्रश्नस्य पुनरावर्तनेन पिता कुपितो भूत्वा पुत्रमवदत्। "त्वामहं यमाय यच्छामि।" इति

शुद्धो नचिकेतास्तृप्तोऽभवत्। स पितुर्वचनमनुसृत्य यमपुरं प्राप। तस्मिन् अवसरे यमस्तत्र नासीत्। नचिकेता यमस्यागमनं प्रतीक्षमाणः तिस्रो रात्रीः तत्रैव भक्ष्यपेयरहितः उवास। यदा यमः प्रत्यवर्तत तदा स्वगृहे कंचन ब्राह्मणकुमारं अनशनपानं स्थितं ददर्श। धर्मराजो यमः अपराधबोधेन तस्मै त्रीन् वरान् दातुमुद्यतोऽभवत्। कुमारस्तु यमस्यौदार्यं स्वीचक्रे। स प्रथमेन वरेण इहलोकसौभाग्यसाधुकं पितृप्रसादं, द्वितीयेन परलोकसौभाग्यदायकं अग्निं च अभ्यर्थितवान्। अथान्ते तृतीयेन वरेण स अध्यात्मविद्यामर्थयामास। सोऽयमध्यात्मविद्योपदेश एवास्मिन् मुख्यतमो भागः। वस्तुतस्तु सविशेषरूपेण अथवा आकर्षकतया अध्यात्मविद्याविशदीकरणार्थमिदं कथागुम्भनं महर्षिणा कृतमिति मन्ये।

उपनिषदियमध्यायद्वयेन द्विधा विभक्तास्ति। एकैकोऽध्यायः पुनरपि वल्लीभिर्विभक्तो दृश्यते। तत्र प्रथमाध्यायात् प्रथमवल्लीतः कानिचन पद्यानि अत्र दिग्दर्शनार्थं उद्ध्रियन्ते।

अथ उपनिषत्सूक्तमारभते।

1) उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ।
तस्य ह नचिकेता नाम पुत्र आस॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उशन्=कामयानः, इच्छन्। वाजश्रवसः=कश्चिद् ब्राह्मणः। सर्ववेदसं = सर्वस्वं ; आस = आसीत् ; ह, वै इत्येतौ वृत्तार्थं स्मरणार्थकौ अथवा प्रसिद्ध्यर्थकौ निपातौ।

सारः—स्वर्गं कामयमानः वाजश्रवसो नाम कश्चित् ब्राह्मणः स्वं सर्वमपि सम्पत्संभारं दातुं निरणयत्। तस्य नचिकेताः नाम कश्चित् पुत्र आसीत्।

2) तं ह कुमारं सन्तं दक्षिणासु नीयमानासु।
श्रद्धाऽविवेश; सोऽमन्यत ॥

श्रद्धा=आस्तिक्यबुद्धिः अस्ति अस्ति इति विश्वास एव आस्तिक्यबुद्धिः; (optimism). नास्ति नास्ति इति विश्वासस्तु नास्तिक्यबुद्धिः। (pessimism)

अन्वयः—दक्षिणासु नीयमानासु तं कुमारं सन्तं श्रद्धा आ विवेश। सः अमन्यत।

सर्वस्वदानरूपे यज्ञे प्रवर्तमाने सति बहवो ब्राह्मणाः समागताः। वाजश्रवसस्तु तेभ्यः सर्वेभ्योपि दक्षिणां यच्छति स्म। पुरातने काले आधुनिकपणादीनां सम्पदां स्थाने गावः उपायुज्यन्त। एवं वाजश्रवसस्यापि सम्पद् गोरूपा एवासीत्। ता गाव एव तेन दीयमाना दक्षिणा आसन्। किन्तु ताः गावः प्रसूतिकालमतिक्रान्ता निरुपयोगा आसत। तस्य तु दात इति प्रसिद्धिरेवावश्यकी खलु। ततः देयवस्तुनो विषये तस्य गणना नासीत्। पितुः इदमाचरितमनुचितमिति चिन्ता नचिकेतसो हृदयमाविवेश। स चिन्ताकुलः अभवत्। यथा—

3) पीतोदका जग्धतृणा दुग्धदोहा निरिन्द्रियाः।
अनन्दा नाम ते लोकाः तान् स गच्छति ता ददत्।

पीतोदकाः=पूर्वं कुत्रचिदपि काले उदकं पीतवत्यः। अधुना तु उदकपानाय शक्तिरपि तासु नावशिष्यते इत्याशयः। जग्ध=भक्षित। जग्धतृणाः= पूर्वं कचिदपि काले तृणं भक्षितवत्यः। अधुना तु तृणं चरितुं शक्तिरपि नास्तीति पूर्ववदाशयः। दुग्धदोहाः। दोहाः = क्षीरम् ; पूर्वं कचिदपि काले तासां दोहनं कृतं। निरिन्द्रियाः=प्रसवशक्तिशून्याः; अनन्दाः = आनन्दरहिताः ददत्=यच्छन्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्वयः—पीतोदका जग्धतृणाः दुग्धदोहाः निरिन्द्रियाः ता गावः यः ददत् सः तान् लोकान् गच्छति ते अनन्दाः नाम लोकाः।

सारः—या नाम गावः पूर्वं जलं पीतवत्यः अधुना न पिबन्ति, या नाम पूर्वं तृणं खादितवत्यः, अधुना तु न खादन्ति, याश्च पूर्वं दोहनक्षमा अभवन्, अधुना तु क्षीरशून्या वर्तन्ते ; तथैव याः पूर्वं प्रसूतवत्यः अधुना प्रजननशक्ति-शून्याः सन्ति, तादृशीः गाः यः यच्छति स आनन्दशून्यं लोकं प्राप्स्यति। पिता तु तादृशीः गा यच्छति। एवञ्च तेन नरकमेव गन्तव्यं स्यात् ; तत् पुत्रेण नियतमेव निवारणीयम् इति मत्वा स पितुरन्तिकं गत्वा वदति।

4) स होवाच पितरं तत कस्मै मां दास्यसीति।
द्वितीयं तृतीयं तं होवाच मृत्यवे त्वा ददामीति ॥

ह + उवाच मृत्युः = यमः, तत = तात।

अन्वयः—हे तात मां कस्मै दास्यसि इति स पितरं उवाच ह। स तं द्वितीयं तृतीयं उवाच ह। त्वा मृत्यवे अहं ददामि इति (पिता तमवदत्)।

कुमारः पितरं पप्रच्छ। त्वं सर्वस्वं दातुं निश्चितवान् खलु। पुत्रः अहमपि तव सर्वस्वमेव। एवं च अहमपि दातव्य एव। त्वं मां कस्मै दित्ससि? वाजश्रवसः मौनमभजत। कुमारः द्वितीयमपृच्छत्। स्वकीयमन्तर्गतं जानन् पुत्रः स्वं परिहसतीति मिथ्याबोधात् स पिता पुनरपि सेर्ष्यं मौनमवालंबत। पुत्रः तृतीयं च अपृच्छत्। तदा पिता क्रोधमसहमानः पुत्रमवदत् "अहम् त्वां यमाय ददामि" इति।

शुद्धात्मा नचिकेताः 'किमर्थं मह्यं पिता अकुप्यद्' इति विचिन्त्य खेदमसहमानः परिवेदयांचकार अथवा रुरोद।

5) बहूनामेमि प्रथमो बहूनामेमि मध्यमः।
किंस्विद् यमस्य कर्तव्यं यन्मयाद्य करिष्यति ॥

एमि = गच्छामि कर्तव्यं = प्रयोजनं स्वित् = वा आहोस्वित्— अथवा किं स्वित् = किंवा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्वयः—बहूनां प्रथमः एमि । बहूनां मध्यमः एमि । यमस्य किंस्वित् कर्तव्यमस्ति ? मया यद् अद्य करिष्यति ?

अहं बहूनां शिष्याणां अनुसरणशिक्षादिषु शिष्यवृत्तिषु प्रथमः अस्मि । अथवा बहूनां शिष्याणां मध्यमो वा अस्मि । न कदापि अधमत्वे प्राप्तवानस्मि । पुनः कथं पिता मां मृत्यवे दत्तवान् ? अथ च मयि दत्ते सति किं नाम मया यमस्य प्रयोजनं स्यात् । मया किं नाम करणीयम् ?

यमस्य मया किमपि प्रयोजनं न स्यादेव । तथापि मम पितुः वाक् पालयितव्या इति चिन्ता पुनरप्यनुवर्तते ।

6) अनुपश्य यथा पूर्वे प्रतिपश्य तथा परे ।
सस्यमिव मर्त्यः पच्यते सस्यमिव जायते पुनः ॥

अनुपश्य, प्रतिपश्य = आलोचय पूर्वे = पुरातनाः जनाः अपरे = अधुनातना जनाः पच्यते = जीर्णः भवति ।

अन्वयः—यथा पूर्वे (आसन्) (तान्) अनुपश्य । तथा (यथा) अपरे (आसन् तान्) प्रतिपश्य । मर्त्यः सस्यं इव पच्यते सस्य इव पुनः स जायते ।

नचिकेताः पितरमभिसंबोध्य कथयति । यथा पूर्वस्मिन् काले जना अवर्तन्त तेषां वृत्तमाचरितं च सम्यग् विचारय । न तैः मृषा कृतं । पितृवाचस्तु तैः पालिताश्च । अपरान् आधुनिकान् जनानपि पश्य । तैरपि न खलु मृषा क्रियते । किमनेन मृषा करणेन सिध्यते । मृषा कुर्वाणः सत्यम् पालयन् वा नरः न कदापि चिरञ्जीवी भविष्यति । सत्यं पालयन् अपालयन् वा सर्वोपि जनः सस्यमिव जायते, वर्धते, म्रियते च । पुनः मृषा (असत्यं) करणेन को नाम लाभः ? अतः सर्वथैव 'मृत्यवे त्वां ददामी'ति वाक् मृषा न भवेत् । एवं च पितरं सत्यसंगरं चिकीर्षामि इति उवाच ।

वाजश्रवसः तं यमगृहं प्रेषयामास । यदा स तत्रागच्छत् तदा धर्मदेवः तत्र नासीत् । कार्यान्तरार्थं अन्यत्र कुत्रापि गत आसीद् । तिस्रः रात्रीः स उपवसन् स्वस्वामिनं प्रतीक्षमाणः तत्र अतिष्ठत् । दिनत्रयादनन्तरं यमः समागतः । यदा स गोपुरद्वारं प्रविष्टः तदा अमात्याः तमुपगम्य ससंभ्रमं ऊचुः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

7) वैश्वानरः प्रविशति अतिथिर्ब्राह्मणो गृहम् ।
तस्यैतां शान्तिं कुर्वन्ति हर वैवस्वतोदकम् ॥

वैश्वानरः = अग्निः हर = आनय वैवस्वत = हे यम उदकं = जलम् ।

अन्वयः—यः वैश्वानरः ब्राह्मणः अतिथिः (सन्) गृहं प्रविशति तस्य एतां शान्तिं कुर्वन्ति । हे वैवस्वत उदकं हर ।

यमस्य अमात्या आगतं यममुद्बोधयन्ति । कस्यचित् गृहिणः गृहे अग्निसदृशो ब्राह्मणः प्रविशति चेत् तस्य दाहकत्वशक्तिं क्षपयितुमिव आतिथेया अर्घ्यादिभिः तं पूजयन्ति । अतः हे वैवस्वत, त्वं द्रुतमेव पाद्यमादाय तं पूजयित्वा प्रीणय ।

यदि नैवं क्रियते, तर्हि सर्वनाशः स्यादिति कथ्यते ।

8) आशाप्रतीक्षे संगतं सूनृतां च इष्टापूर्ते पुत्रपशूंश्च सर्वान् ।
एतद् वृङ्क्ते पुरुषस्याल्पमेधसो यस्यानश्नन् वसति ब्राह्मणो गृहे ॥

आशा = अनिश्चितार्थप्रार्थना प्रतीक्षा = निश्चितार्थप्रतिपालनं संगतं = सज्जनसंसर्गजातं फलं सूनृता = सत्या वाक् इष्टापूर्ते = इष्टं यागजं पुण्यं पूर्तं आरामनिर्माणकूपखननादिजं पुण्यं । वृङ्क्ते = विनाशयति । अल्पमेधसः = अल्पबुद्धेः अनश्नन् = आहाररहितः ।

अन्वयः—यस्य गृहे ब्राह्मणः अनश्नन् वसति (तस्य) अल्पमेधसः पुरुषस्य आशाप्रतीक्षे संगतम् सूनृतां इष्टापूर्ते पुत्रपशून् च सर्वान् एतत् वृङ्क्ते ।

यस्य अल्पप्रज्ञस्य पुरुषस्य गृहे कश्चिद् ब्राह्मणः उपवसन् वसति तस्य आशा न फलिष्यति । प्रतीक्षा न फलिष्यति । सज्जनसंसर्गजं सत्यभाषणजं आरामनिर्माणकूपखननादिजन्यं पुण्यं च यावत् नश्यति । सर्वे पुत्राः पशवश्च नङ्क्ष्यन्ति । तेन सर्वथा अतिथिः पूजनीय एव ।

अमात्यानां वाचम् निशम्य यमधर्मराजः आत्मानम् कृतापराधम् विज्ञाय नचिकेतसमुपगम्य तं प्रसादयितुं त्रीन् वरान् प्रतिजज्ञे ।

9) तिस्रो रात्री यदवात्सीर्गृहे मे अनश्नन् ब्रह्मन् अतिथिर्नमस्यः ।
नमस्तेऽस्तु ब्रह्मन् स्वस्ति मेऽस्तु तस्मात् प्रति त्रीन् वरान् वृणीष्व ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रात्रीः, यद्, अवात्सीः = अवसः; अनश्नन् = अशनं न कुर्वन् नमस्यः = प्रणामार्हः, वृणीष्व = प्रार्थयस्व ।

हे ब्रह्मन् त्वं अतिथिः सन् अनश्नन् मे गृहे तिस्रो रात्रीः यद् अवात्सीः तद त्वं नमस्यः असि । ते नमः अस्तु । हे ब्रह्मन् मे स्वस्ति अस्तु । तस्मात् प्रति त्रीन् वरान् वृणीष्व ।

हे ब्राह्मणकुमार त्वं अतिथिः भूत्वा मम गृहे निराहारः सन् तिस्रः रात्रीः अवसः । ततः त्वं मया नमस्कार्यः । तेन ते नमः अस्तु । मे भद्रं च भूयात् । तथापि अपराधबोधो मां बाधते । तत्परिहारार्थं अहं तुभ्यं त्रीन् वरान् दातुमिच्छामि । प्रार्थयस्व ।

तत् श्रुत्वा नचिकेता ब्रूते ।

10) शान्तसंकल्पः सुमना यथा स्यात् वीतमन्युर्गौतमो माभि मृत्यो ।
त्वत्प्रसृष्टं माभिवदेत् प्रतीत एतत् त्रयाणां प्रथम वरं वृणे ॥

शान्तसंकल्पः = प्रशान्तचिन्तः; सुमनाः = प्रसन्नमनाः; वीतमन्युः = विगतरोषः; गौतमः वाजश्रवसः । मा + अभि । त्वत्प्रसृष्टं = त्वया विसृष्टं ; अभिवदेत् = अनुगृह्णीयात् ; प्रतीतः = प्रत्यभिज्ञातः ; वृणे = अभ्यर्थये ।

अन्वयः—हे मृत्यो, गौतमः मा अभि शान्तसंकल्पः सुमनाः वीतमन्युः च यथा स्यात्, त्वत् प्रसृष्टं मा प्रतीतः अभिवदेत्, एतत् त्रयाणां प्रथमं वर अहं वृणे ।

हे धर्मराज त्वं मह्यं यदि वरं दित्ससि तर्हि अयमेव आदिमो वरः मया प्रार्थ्यते । तथाहि—यदाहं गृहात् यमपुरं प्रस्थितः ततः प्रभृति मम पिता मां प्रति चिन्ताकुलः स्यात् । तस्य तादृशी चिन्ताकुलता प्रशान्ता भवेत् । तथा यदाहं गृहं निवर्तिष्वे तदा तस्य मनः प्रसन्नं च भवेत्; तस्त मां प्रति यः क्रोधोस्ति स मद्दर्शने दूरीभवेत् । त्वया विसृष्टं मां स प्रत्यभिजानीयात् अनुगृह्णीयाच्च । अयं वरः त्वया प्रथमतो मे प्रदातव्यः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ अभ्यासः ॥

I ' शकुन्तला 'याः भवतां हृद्यतमानां पद्यानां सारं लिखत ।

II अद्य पठितानां उपनिषत्-सूक्तानां सारं लिखत ।

III कठोपनिषदः अवतरणकथां अनुवदत ।

IV अधोलिखितस्य पद्यस्य अन्वयं लिखत—

सञ्चारिणी दीपशिखेव रात्रौ
यं यं व्यतीयाय पतिंवरा सा ।
नरेन्द्रमार्गाट्ट इव प्रपेदे
विवर्णभावं स स भूमिपालः ॥

व्यतीयाय = अतिचक्राम, अपासरत् । अट्टः = सौधं; प्रपेदे = प्राप ।

[रघुवंशे इन्दुमतीस्वयंवरावसरः । विवाहवेदिकायाः पुरतः पंक्तिं विधाय तस्याः भर्तृपदमभिलषन्तो राजानो मणिमञ्चेषु उपविशन्तो विराजन्ते । सख्या सह इन्दुमती वरणमालां करे धृत्वा एकैकान् नृपान् अभिगच्छति । सखी राज्ञां परिचयं ददाति । इन्दुमती वैमनस्यात् तं नृपं त्यक्त्वा अन्यमभि गच्छति । तदा प्रथमस्य नृपस्य मुखं विवर्णं भवति । द्वितीयस्य तु प्रकाशमानं च भवति । यथा तं त्यक्त्वा अन्यं गच्छति तदा तस्य मुखं विवर्णीभवति अन्यस्य तु उज्ज्वलं च भवति । एतादृशं इन्दुमत्याः सभामध्ये कृतं सञ्चारं कविरेवमुत्प्रेक्षते । अन्धकारावृते राजमार्गे काचिद् दीपशिखा स्वयं सञ्चरतीति भावयामः । सञ्चरणसमये अन्तिकस्थसौधम् प्रकाशते । यदा सा दीपशिखा अग्रे अग्रे अपसरति तदा तदा प्रथमम् सौधम् निष्प्रभं भवति अन्यत् सप्रभं च भवति । एवमासीत् इन्दुमत्याः प्रयाणम् । एतेनैव श्लोकेन कालिदासस्य दीपशिखा-कालिदास इति प्रशंसा च लब्धा ।]

V अधोदत्तानां सुभाषितानां अर्थं लिखत ।

यस्मिन् देशे न सम्मानो, न प्रीतिः, न च बान्धवाः ।
न च विद्यागमः, कश्चित् न तत्र दिवसं वसेत् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उदारस्य तृणं वित्तं, शूरस्य मरणं तृणम् ।
विरक्तस्य तृणं भार्या, निःस्पृहस्य तृणं जगत् ॥

शैले शैले न माणिक्यं, मौक्तिकं न गजे गजे ।
साधवो नहि सर्वत्र, चन्दनं न वने वने ॥

प्रदोषे दीपकश्चन्द्रः प्रभाते दीपको रविः ।
त्रैलोक्ये दीपको धर्मः सुपुत्रः कुलदीपकः ॥

ते वन्द्याः, ते महात्मानस्तेषां लोके स्थिरं यशः ।
यैर्निबद्धानि काव्यानि, ये वा काव्येषु कीर्तिताः ॥

मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् ।
मनस्यन्यत् वचस्यन्यत् कर्मण्यन्यद् दुरात्मनाम् ॥

गुणेषु यत्नः क्रियतां किमाटोपैः प्रयोजनम् ।
विक्रीयन्ते न घण्टाभिर्गावः क्षीरविवर्जिताः ॥

गच्छन् पिपीलिको याति योजनानां शतान्यपि ।
अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति ॥

चिन्तनीया हि विपदामादावेव प्रतिक्रिया ।
न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे ॥

अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति ।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात् ॥

विदेशेषु धनं विद्या व्यसनेषु धनं मतिः ।
परलोके धनं धर्मः शीलं सर्वत्र वै धनम् ॥

महाजनस्य संसर्गः कस्य नोन्नतिकारकः ।
पद्मपत्रस्थितं वारि धत्ते मुक्ताफलश्रियम् ॥

पिपीलिकः = ant. वैनतेयः = गरुडः; आटोपः = बाह्याडंबरः; भारती = सरस्वती; कोशः = भाण्डागारः; व्ययः = प्रदानम् ; व्यसनं = क्रीडादिषु अत्यासक्तिः; मुक्ताफलश्रियं = मौक्तिकशोभाम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चत्वारिंशो दिवसः

(वैदिकभाषापरिचयः)

केवलं भाषाविशेषपरिचयार्थमेव ऋग्वेदात् केचन मन्त्राः अत्रोद्ध्रियन्ते। वेदानां प्रामाण्यस्य महत्त्वस्य सौन्दर्यस्य वा न खलु ते निदर्शका इत्यवधार्यम्। समुद्रजलस्य रसपरिज्ञानाय द्वित्राः कणिका एव पर्याप्ताः। किन्तु सागरस्य वैपुल्यगांभीर्यादिपरिज्ञानं तु तदवगाहेनैव लभ्यते।

ऋक् = स्तोत्रं; वेदः = आध्यात्मिकज्ञानप्रधानो ग्रन्थः। तथा च ऋग्वेद इत्यस्य स्तोत्ररूपेणात्मज्ञानप्रदायको ग्रन्थ इत्यर्थः सिध्यति। अत्र ऋग्वेदात् इतस्ततः त्रीणि सूक्तान्युद्ध्रियन्ते। तेषु प्रथमं अर्थवादप्रधानम्। कस्यचिद् देवस्य महत्त्वादिगुणानां अतिशयेन वर्णनमेवार्थवादः। द्वितीयं सूक्तं सूर्यस्तुतिपरम्। तृतीयं तु केवलमात्मतत्त्वप्रधानम्।

गृत्समदो नाम ऋषिः इदमर्थवादप्रधानं सूक्तं त्रिष्टुप् छन्दसा निबध्य इन्द्रं कीर्तयति। त्रिष्टुप्, अनुष्टुप् इत्यादयः छन्दोविशेषाः।

मण्डलम् 2 सूक्तम् 12

गृत्समद ऋषिः। त्रिष्टुप् छन्दः। इन्द्रो देवता।

1) यो जात एव प्रथमो मनस्वान् देवान् क्रतुना पर्यभूषत्।
यस्य शुष्माद् रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः॥

ऋग्वेदस्य द्वितीयमण्डलादुद्धृतमिदं सूक्तम्। अस्याध्ययनात् पूर्वं कस्याश्चित् कथाया अवतरणमावश्यकम्। गृत्समदो नाम कश्चित् ब्राह्मणो यज्ञमारभत। तस्मिन् यागे अंशभोक्तृत्वात् इन्द्रः सन्निहितः। इन्द्रं यागशालान्तर्गतं ज्ञात्वा तं बहिर्निर्गमनसमये ग्रहीतुं असुराः यज्ञवाटमभितः परिवव्रुः। एतत् ज्ञात्वा इन्द्रो गृत्समदस्य रूपं धृत्वा बहिर्गच्छन्तं प्रतीक्षमाणाः तं बहिर्गच्छन्तं गृत्समदमेवाजीगणत्। ते इन्द्रं बहिर्गच्छन्तं प्रतीक्षमाणाः तत्रैव चिरं तस्थुः। अन्ते कालविलंबमसहमाना असुराः यज्ञवाटस्यान्तर्विविशुः। तत्र गृत्समदं दृष्ट्वा ते एवमचिन्तयन्। "अहो कोऽयं कपटो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गृत्समदः ? सत्यतस्तु गृत्समदः पूर्वमेव बहिर्गतः । अयमिन्द्र एवास्मद्-भयेन गृत्समदरूपं धृत्वा तिष्ठति नूनम्"। एवं चिन्तयन्तस्ते असुराः गृत्समदं ग्रहीतुमुद्युक्ता अभवन् । तदा गृत्समदस्तान् कथयति । "हे जनाः नाहमिन्द्रः । इन्द्रः स एव यो जात एव प्रथमो मनस्वान्" इति ।

मनस्वान्=मनस्विनामग्रगण्यः; देवः=देवमानः (द्योतमानः) । क्रतुना=कर्मणा (वृत्रवधादिरूपेण); पर्यभूषत् = रक्षकत्वेन पर्यग्रहीत्; देवान् पर्यभूषत् = देवान् अत्यक्रामत्; शुष्मात् = शरीरबलात्; रोदसी = द्यावापृथिव्यौ; अभ्यसेतां = अबिभीतां (अवेपेतां); नृम्णस्य = सेनाबलस्य मह्ना = महत्त्वेन; जनासः = जनाः ।

गृत्समदोऽसुरान् ब्रूते—

*व्याख्या—स जनास इन्द्रः । जनासः=हे जनाः; स इन्द्रः । यो बहिर्गतः स एवेन्द्रः । नाहमित्यर्थः । सः इति तच्छब्देन निर्दिष्टं इन्द्रं विशिनष्टि पूर्वनिर्दिष्टैर्वाक्यैः । यो जात एव प्रथमो मनस्वान् = यो जातमात्र एव प्रथमो वीर्यादिभिर्गुणैस्सर्वप्रथमः मनस्वान् मनस्विनामग्रगण्यश्च भवति । देवो देवान् क्रतुना पर्यभूषत् = यो देवो शोभमानः क्रतुना साह-सिककर्मभिः देवान् स्वजनान् अत्यक्रामत् । यस्य शुष्मात् रोदसी सभ्यसेतां नृम्णस्य मह्ना=यस्य शुष्मात् शरीरबलात् नृम्णस्य मह्ना सैन्यबलस्य महत्त्वेन च रोदसी भूमिमाकाशं, चाभिव्याप्य यः प्रदेशः स अभ्यसेतां भयेनावेपेताम् । (रोदशब्दो नित्यद्विवचने प्रयुज्यते) स एवेन्द्रः, न त्वहमिति जानीत ।

सारः—यो जातमात्र एव देवानामादिमो मनस्विनामग्रिमश्चाभवत्, यः स्वैः साहसिककर्मभिः इतरान् देवानत्यक्रामत् तथा यस्य शारीरिकबलेन सैन्यबलेन च भूमिमाकाशं चाभिव्याप्य सर्वा दिशः भयेन अवेपन्त स एवेन्द्रः, नाहमिति हे जना यूयं जानीत ।

दीव्यति इति देवः । परि + भू (लुङ्) परि + अ + भ+स+त् । भ्यस भयार्थको धातुः । अ + भ्यस + ईतां = अभ्यसेतां । राज्ञा

---

*पद्ये विद्यमानानां एकैकेषां पदानां अन्वयक्रमेणार्थकथनं व्याख्या ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इतिवत् महा इत्यत्र उपान्त्यकारलोपः । जनास इत्यत्र अस इति बहुवचनप्रत्यये सकारस्य विसर्गाभावो विशेषः । कालान्तरे एव सकारः विसर्गरूपेण परिणतोऽभूदित्यनेनानुमेयं भवति ।

2) यः पृथिवीं व्यथमानामदृंहत् यः पर्वतान् प्रकुपितान् अरम्णात् ।
यो अन्तरिक्षं विममे वरीयः यो द्यामस्तभ्नात् स जनास इन्द्रः ॥

अदृंहद् = दृढामकरोत् (वर्धयामास) ; प्रकुपितान् = इतस्ततश्चलितान् ; अरम्णात् = नियमितानकरोत् (स्वस्थानेषु निवेशयामास) ; विममे = निरमात्, निर्माति स्म ; वरीयः = उरुतमम्, महत् । द्यां = दिवं ; अस्तभ्नात् = तस्तंभ ।

यः इन्द्रः व्यथमानां भूकम्पादिभिः व्यथमानां दुःखितां पृथिवीं भूमिं अदृंहत् दृढामकरोत् । यः इन्द्रः भूकम्पादिभिः कम्पमानां भूमिं स्वप्रभावेण दृढामकरोत् इत्यर्थः । तथा यः प्रकुपितान् इतस्ततश्चलितान् पर्वतान् स्वस्वस्थानेषु निवेशयामास । पर्वतानां पुरा पक्षाः अविद्यन्त किल । इयं कथा तु 'पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः' । इत्यस्य पद्यस्य अध्ययनावसरे विवृता खलु ॥

सारः—भूकम्पादिभिः नित्यदुःखमनुभवन्तीं भूमिं यः दृढां अकरोत्, यश्च पक्षसहितान् पर्वतान् पक्षच्छेदेन तत्तत्स्थानेषु नियमितान् अकरोत्, यः उरुतमं अथवा महत् आकाशं निर्मितवान्, यः दिवं स्तंभयित्वा अस्माकमुपरि स्थापयामास स इन्द्रः ; नाहमित्यर्थः ॥

3) यो हत्वाहिमरिणात् सप्त सिन्धून् यो गा उदाजद् अपधा बलस्य ।
यो अश्मनोरन्तरग्निं जजान संवृक् समत्सु स जनास इन्द्रः ॥

अहिं = मेघं ; हत्वा = भित्त्वा (प्रस्राव्य) ; सिन्धून् = नदीः ; अरिणात् = प्रैरयत् ; बलस्य अपधाः = बलेन निरुद्धाः ; उपाजत् = निरगमयत् ; अश्मनोः = मेघयोः (मध्ये) ; जजान = उत्पादयामास ; संवृक् = संहारकः समत्सु = समरेषु ।

अन्वयः—यो अहिं हत्वा सप्त सिन्धून् अरिणात्, यो बलस्य अपधाः गाः उदाजात् योऽश्मनोः अन्तः अग्निं जजान, यः समत्सु संवृक् च स इन्द्रः । हे जनाः, नाहमिन्द्रः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सारः—य इन्द्रः मेघं वज्रेण छित्वा सप्त सिन्धून् प्रैरयत् ; तथाहि अन्तर्गूढजलं मेघः वज्रेण छित्वा सप्त नदीः प्रवहणाय प्रेरयामास, यो बलासुरेण अपहृता निरुद्धाश्च गाः तन्नियन्तारं बलं हत्वा निरगमयत् , यो मेघयोर्मध्ये अग्निं सृष्टवान् , यो युद्धेषु सर्वसंहारको वर्तते, हे जनाः, स एवेन्द्रः, न त्वहम् ।

4) येनेमा विश्वा च्यवना कृतानि यो दासं वर्णं अधरं गुहाकः ।
श्वघ्नीव यो जिगीवान् लक्षमादत् अर्यः पुष्टानि स जनास इन्द्रः ॥

च्यवना = नश्वराणि ; दासं वर्णं = आर्येतरवर्णं ; अधरं = निकृष्टं ; गुहा = गुहायां (नरके) ; अकः = अकार्षीत् ; श्वघ्नी = व्याधः (श्वभिः मृगान् हन्ति) ; जिगीवान् = जितवान् ; लक्षं = लक्ष्यम् ; आदत् = आदत्ते ; अर्यः = अरेः ; पुष्टानि = समृद्धाः सम्पदः ॥

सारः—य एतान् चराचरात्मकान् लोकान् नश्वरान् चकार, यो निकृष्टं आर्येतरजनवर्गं अधश्चकार, यो व्याध इव शत्रुसंहाररूपं लक्ष्यं प्राप्तवान्, यः शत्रूणां समृद्धाः सम्पदः आदत्त, हे जनाः, स एवेन्द्रः, नाहम् ॥

5) यस्याश्वासः प्रदिशि यस्य गावः यस्य ग्रामाः यस्य विश्वे रथासः ।
यः सूर्यः य उषसं जजान यो अपां नेता स जनास इन्द्रः ॥

अश्वासः—प्रदिशि = अनुशासने ; विश्वे = सर्वे ; रथासः = रथाः ; अपां = जलानां (मेघभेदनेन) ; नेता = प्रेरकः ।

अन्वयः—यस्य प्रदिशि अश्वासः गावः ग्रामाः विश्वे रथासः च सन्ति, यः सूर्यं जजान, यः उषसं जजान, यः अपां नेता, हे जनास, स इन्द्रः नाहम् ।

सारः—यस्य शासने सर्वे अश्वाः, गावः, ग्रामाः, रथाः च वर्तन्ते, यः सूर्यं उषः कालं च अजनयत् , यः जलानां प्रेरकः स एवेन्द्रः, नाहम् ।

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मंडलं 6 सूक्तं 57

(भरद्वाज ऋषिः *गायत्री छन्दः इन्द्रपूषाणौ देवते)

1) इन्द्रा नु पूषणा वयं। सख्याय स्वस्तये। हुवेम वाजसातये।

इन्द्रापूषणौ = इन्द्रपूषाणौ; पूषा = सूर्यः; नु = अद्य; सख्याय = सखित्वाय; स्वस्तये = शोभनाय; वाजसातये = अन्नस्य लाभाय; हुवेम = स्तवाम।

अन्वयः—वयं नु इन्द्रापूषणौ स्वस्तये सख्याय वाजसातये हुवेम।

सारः—वयं अद्य इन्द्रं पूषाणं च शोभनाय सौहार्दाय अन्नस्य लाभाय च स्तवाम। इन्द्रं सौहार्दाय पूषाणं अन्नाय चेति विवेकः।

2) सोममन्य उपासदत्। पातवे चम्वोः सुतम्। करम्भमन्य इच्छति।

सोमम् = पेयम्; उपासदत् = उपागच्छति; पातवे = पातुम्-चम्वोः = हव्ययोः; सुतं = अभिषुतं (प्रसिक्तं); करम्भं = घृतसिक्तं सक्त्वा; त्मकं हविः।

अन्वयः—अन्यः चम्वोः सुतं सोमं पातवे उपासदत्। अन्यः करम्भं इच्छति।

सारः—इन्द्रपूष्णोरन्यः इन्द्रः हव्ययोरेकं अभिषुतं सोमं पातुं उपागच्छति। अन्यः पूषा तु घृतसिक्तान् सक्तून् भक्षयितुमिच्छति। (तयोरन्यः = तयोरेकः; तेष्वन्यतमः = तेष्वेकः॥)

3) अजा अन्यस्य वह्नयः। हरी अन्यस्य संभृता। ताभ्यां वृत्राणि जिघ्नते।

अजा = छागाः (goats); वह्नयः = वाहकाः। हरी अन्यस्य संभृताः = पुष्टाः; वृत्राणि = शत्रून्; जिघ्नते = हन्ति।

अन्वयः—अजाः अन्यस्य वह्नयः (भवन्ति)। हरी अन्यस्य संभृता (भवन्ति)। ताभ्यां वृत्राणि जिघ्नते।

सारः—अजाः अन्यस्य वाहकाः भवन्ति। अश्वाः अन्नैः पुष्टाः च भवन्ति। ताभ्यां अजाश्वाभ्यां इन्द्रः शत्रून् हन्ति।

---

* गायत्रीच्छन्दसि त्रयः पादाः प्रायतो दृश्यन्ते। त्रिष्टुप् अनुष्टुप् आदयः छन्दोविशेषाः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

4) यदिन्द्रो अनयद्रितो । महीरपो वृषंतमः । तत्र पूषाभवत् सचा ।

यद् = यदा ; वृषंतमः = अतिशयेन वर्षिता; रितः = गन्त्रीः (स्रवन्ती) महीः = महतीः; अपः = वृष्ट्युदकानि; सचा = सहायः ।

अन्वयः—यद् वृषंतमः इन्द्रः रितः महीः अपः अनयत् । तत्र पूषा सचा अभवत् ।

सारः—यदा अतिशयेन वर्षन् इन्द्रः स्रवन्तीः महतीः नदीः इमं लोकं अनयत् तदा सूर्यः तस्य सहायः अभवत् ।

5) तां पूष्णः सुमतिं वयं । वृक्षस्य प्रवयामिव । इन्द्रस्य चारभामहे ।

पूष्णः = सूर्यस्य; सुमतिं = अनुग्रहबुद्धिं; प्रवयां = प्रकृष्टां शाखां; आरभामहे = आलंबामहे ।

अन्वयः—पूष्णः इन्द्रस्य च तां सुमतिं वृक्षस्य प्रवयां इव वयं आरभामहे ।

सारः—सूर्यस्य इन्द्रस्य च तां अनुग्रहबुद्धिं वृक्षस्य दृढां शाखां इव वयं आलंबामहे ॥

6) उत् पूषणं युवामहे । अभीशूनिव सारथिः । मह्यै इन्द्रं स्वस्तये ।

उद्युवामहे = उद्योजयामः (आकर्षयामः प्रोत्साहयामः) । अभीशून् = रश्मीन् (bridle); मह्यै = महत्यै; स्वस्तयै = रक्षायै ।

अन्वयः—पूषणं इन्द्रं च वयं मह्यै स्वस्तये सारथिः अभीशून् इव उद्युवामहे ।

सारः—वयं सूर्यं इन्द्रं च अस्माकं महत्यै रक्षायै यथा सारथिः रश्मीन् आकर्षति तथा प्रोत्साहयामः ।

—o—

॥ पुरुषसूक्तम् ॥

मण्डलम् 10, सूक्तम् 90

[पुरुषसूक्तमिति प्रसिद्धमिदं सूक्तं ऋग्वेदस्यान्तिममण्डलेऽन्तर्भूतम् । एतादृशानि परश्शतानि सूक्तान्येव अनन्तरकाले उपनिषत्सु विद्यमानानां तत्त्व-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विचाराणां प्रचोदकीबभूवुरिति मन्ये । अत्र तु सूक्ते विश्वं व्याप्य वर्तमानस्य सर्वचराचराधारभूतस्य परमात्मनो महत्त्वमद्भुतस्वभावश्च वर्ण्येते ।]

नारायणो नाम ऋषिः । अन्त्या त्रिष्टुप्, शिष्टा अनुष्टुभः । पुरुषो देवता ।

1 सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिम् विश्वतो वृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥

पदच्छेदः—सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् सः भूमिं विश्वतः वृत्वा अत्यतिष्ठत् दशाङ्गुलम् ।

सहस्रशीर्षा=सहस्रं शीर्षाणि यस्य सः; पुरुषः=आत्मा; सहस्राक्षः=सहस्रं अक्षीणि यस्य सः; सहस्रपात्=सहस्र पादाः यस्य सः, विश्वतः=सर्वतः; वेष्टय=परिवेष्टय, अभिव्याप्य; अति अतिष्ठत्=अतिक्रम्य अतिष्ठत्; दशाङ्गुलं=दशाङ्गुलपरिमितं देशम् ।

अन्वयः—पुरुषः सहस्रशीर्षा सहस्राक्षः सहस्रपाद् अस्ति । सः भूमिं विश्वतः वृत्वा दशांगुलं अत्यतिष्ठत् ।

सारः—अस्मिन् प्रपञ्चे यावन्तः शीर्षाः सन्ति यावन्ति अक्षीणि सन्ति यावन्तश्च पादाः सन्ति ते सर्वेऽपि तस्यैवात्मन अंशाः इत्यर्थः । लोके विद्यमानाः सर्वेऽपि प्राणिनः तस्य परमात्मनोंऽशाः इति तात्पर्यम् । स ब्रह्माण्डमभिव्याप्य ततोऽप्यपरिमेयतया ब्रह्माण्डात् बहिरपि सूक्ष्मरूपेण तिष्ठति ।

2 पुरुष एवेद सर्वं यद् भूतं यच्च भव्यम् ।
उतामृतत्वस्येशानः यदन्नेनातिरोहति ॥

पदच्छेदः—पुरुषः एव इदं सर्वं, यद् भूतं यद् च भव्यम् । उत अमृतत्वस्म ईशानः यद् अन्नेन अतिरोहति ।

उत=अपि च; ईशानः=स्वामी ।

सारः—इदं दृश्यमानं सर्वमपि वस्तु पुरुष एव । न खलु अधुना दृश्यमानं, किन्तु दृष्टपूर्वं द्रक्ष्यमाणं च । भूतं वर्तमानं भविष्यत् च यद्वस्तु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जातं तद् सर्वं पुरुषमयं अथवा । आत्ममयमेवेत्यर्थः । अपि च, यद् वस्तु भक्ष्यादिरूपेण अन्नेन परिपुष्टिं प्राप्नोति तस्मिन् वस्तुनि विद्यमानस्य अनश्वर-रूपस्य जीवात्मनः स्वामी स पुरुषः परमात्मा एव । यथा अन्तरिक्षे विद्यमानः वायुः जन्तोः शरीरे श्वासरूपतया प्रवर्तते, यथा भौमाः पदार्थाः परिणमय्य जन्तोः शरीरे करचरणाद्यवयवतया प्रवर्तन्ते यथा च जलं परिणमय्य रक्त-स्वेदादिरूपं भवति तथैव विश्वव्यापी स परमात्मा जीवरूपतया परिणमय्य जन्तूनां स्वामी भवति ।

3 एतावान् अस्य महिमा अतो ज्यायान् च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥

एतावान्=इयान्; अतः=अस्मात्; ज्यायान्=महत्तरः; पादः=चतुर्थोऽशः; विश्वा=सर्वाणि; भूतानि=चराचरात्मका जन्तवः; त्रिपाद्=अवशिष्टास्त्रयोंऽशाः; अमृतं=विनाशरहितं; दिवि=अस्मदिन्द्रियागोचरे लोके अथवा द्योतमाने स्वप्रकाशस्वरूपे ।

अन्वयः—अस्य महिमा एतावान् । पूरुषः अतः च ज्यायान् । विश्वा भूतानि अस्य पादः । अस्य त्रिपाद् दिवि अमृतं वर्तते ।

सारः—एतावान् अस्य महिमा भवति । तथाहि यानि यानि वस्तून्य-स्मिन् प्रपञ्चे दृश्यन्ते तानि सर्वाण्यपि तस्य पुरुषस्य महिमविलास एव । न तु तस्य वास्तवं स्वरूपम् । तत्तु अस्मादृशां द्रष्टुमशक्यमेव । उक्तं स्पष्टीकरोति उत्तरार्धेन । अस्य विराट्पुरुषस्य पादः चतुर्थोऽश एवास्माभिर्दृश्यमानोऽयमपारः प्रपञ्चः । अवशिष्टास्त्रयोंऽशास्तु दिवि इन्द्रियागोचरे लोके अमृतमनश्वरत्वेन वर्तन्ते । महर्षयोऽपि चिरन्तनैस्तपोभिः तस्य परपुरुषस्य चतुर्णामेकमंशमेव दृष्टवन्तः, किमुत साधारणा जनाः ।

4 त्रिपादूर्ध्वं उदैत् पुरुषः पादोऽस्येहाभवत् पुनः ।
ततो विष्वङ्व्यक्रामत् साशनानशने अभि ॥

त्रिपात्=चतुर्णामंशानां त्र्यंशरूपः । उदैत्=उदतिष्ठत्, सर्वोत्कर्षे-णावर्तत; विष्वङ्=विविधस्वरूपः; व्यक्रामत्=व्याप्तवान्; साशनानशने=साशनं च अनशनं च; साशनं=अशनविसर्जनादिसहितं जन्तुजातं, अनशनं=तद्रहितं शैलशिलादिकम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्वयः—त्रिपाद् पुरुषः ऊर्ध्वः । पुनः अस्य पादः इह अभवत् । ततः साशनानशने अभि सः विष्वङ् व्यक्रामत् ।

सारः—त्र्यंशरूपः स ब्रह्मस्वरूपः पुरुषः सांसारिकैर्दोषैरस्पृष्टः ऊर्ध्वं तिष्ठति स्म । पुनः अस्य चतुर्णामेकोऽशः सृष्टिसंहारात्मिकायां मायायां व्यापृतोऽभवत् । मायास्वरूपेऽस्मिन् संसारे स एव सततं प्रवर्तत इत्यर्थः । स पादांशः तदनन्तरं भक्षणपानविसर्जनादिसहितं तिर्यङ्मनुष्यात्मकं जन्तुजातं, तद्रहितं शैलशिलादिकं च भूत्वा ब्रह्माण्डं व्याप ।

5 तस्मात् विराडजायत विराजोऽधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद् भूमिमधो पुरः ॥

तस्माद् = आदिपुरुषात्; विराट् = ब्रह्माण्डदेहः; विराजः अधि = विराड्रूपं ब्रह्माण्डमधिकरणं कृत्वा; पूरुषः = जीवः; अत्यरिच्यत = व्यतिरिक्तः अथवा विभिन्न अभवत्; पुरः = शरीराणि (पूः पुरौ पुरः । रेफान्तः शब्दः ।)

सारः—तस्मात् आदिपुरुषात् ब्रह्माण्डदेहोऽजायत । तं ब्रह्माण्डं आधारीकृत्य जीवः समुत्पन्नः । जातः स जीवात्मा आदिपुरुषात् परमात्मनः गुणविशेषैः विभिन्नोऽभवत् । पश्चात् भूमिं ससर्ज । ततः शरीराणि च ।

6 यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यं, ग्रीष्म, इध्म, शरद्धविः ॥

पदच्छेदः—यद् पुरुषेण हविषा देवाः यज्ञ अतन्वत । वसन्तः अस्य आसीद् आज्यं, ग्रीष्मः, शरद् हविः ।

यद् = यदा ; अतन्वत = अतन्वन् ; आज्यम् = घृतं ; इध्मः = इन्धनम् ।

सारः—यदा जीवांशतया देवा अजायन्त तदा ते यागं कर्तुमारभन्त । किन्तु ते यागसामग्रीः नालभन्त । यागद्रव्याणि तावत्पर्यन्तं न सञ्जातान्यासन् । तदा ते पुरुषमेव हविषः स्थाने संकल्प्य यज्ञमन्वतिष्ठन् । वसन्तः घृतस्य स्थाने कल्पितः । ग्रीष्मः इन्धनत्वेन कल्पितः । शरद् पुरोडाशस्य स्थाने च ।

7 तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ॥

यज्ञं = यज्ञसाधनभूतं; साध्याः = प्रजापतिप्रमुखाः ; बर्हिषि = मानसे प्रौक्षन् = प्रोक्षितवन्तः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्वयः—अग्रतः जातं तं यज्ञं पुरुषं बर्हिषि प्रौक्षन्। ये देवाः साध्याः ऋषयश्च (ते) तेन अयजन्त।

सारः—आदौ जातं तं यज्ञसाधनभूतं पुरुषं मानसे ध्यायन्तः देवाः साध्याः मुनयश्च यागं निर्वर्तयामासुः।

8 तस्माद् यज्ञात् सर्वहुतः संभृतं पृषदाज्यम्।
पशून् तांश्चक्रे वायव्यान् आरण्यान् ग्राम्याश्च ॥

सर्वहुत् = सर्वात्मकः पुरुषो यस्मिन् यज्ञे हूयते सः। पृषदाज्यं = दधि घृतं च; संभृतं = सम्पादितं; वायाव्यान् = वायुदेवताकान्; आरण्यान् = वन्यान्।

अन्वयः—सर्वहुतः तस्मात् यज्ञात् पृषदाज्यं संभृतम्। वायव्यान् आरण्यान् तान् पशून्, ये ग्राम्याः तान् च चक्रे।

सारः—पुरुषनिर्व्यूढात् तस्मात् यज्ञात् दधिघृतादि सम्मिश्रमन्नं सम्पादितम्। तस्मादेव यज्ञात् हरिणादयो वन्यमृगाः गवाश्वादयो ग्राम्यमृगाश्च उत्पादिताः।

9 तस्माद्यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्मात् यजुस्तस्मादजायत ॥

सर्वहुतः = सर्वैः पूर्वोक्तैः साधितात् तस्माद् यज्ञात् ऋचः सामानि च अजायन्त। एवं छन्दांसि जातानि। यजुः च जातम् ॥

10 तस्मादश्वा अजायन्त ये के चोभयादतः।
गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः ॥

उभयादः=उभयतः दन्ताः येषां ते ऊर्ध्वमधश्च प्रसृताः दन्ता येषां ते इत्यर्थः; अविः = अजविशेषः।

सारः—तस्मात् यज्ञात् अश्वाः जाताः। किञ्च ऊर्ध्वप्रसारितविषाणा हरिणादयः अधःप्रसृतदन्ताः गजादयश्च तस्मादेव सञ्जाताः। गावः अजाः अवयः तस्मादेवाजायन्त।

11 यत् पुरुषं व्यदधुः कतिधा व्यकल्पयन्।
मुखं किमस्य को बाहू का ऊरू पादा उच्येते ॥

यद् = यदा; व्यदधुः = उत्पादयामासुः; कतिधा = कतिभिः प्रकारैः; व्यकल्पयन् = कल्पितवन्तः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्वयः—यद् (देवाः) पुरुषं व्यदधुः तदा (ते) कतिधा व्यकल्पयन्। अस्य मुखं किं ? (आसीत्) बाहू कौ ? ऊरू कौ ? पादौ कौ ? उच्येते—

सारः—यदा देवाः पुरुषं मानसेन यज्ञेनोत्पादयामासुः तदा केषाञ्चिद् विविधाः संशयाः समुत्पन्नाः। अस्य मुखं किमासीत् ? बाहू कावास्तां ? कौ नामोरू ? पादौ च कौ ? इति विविधाः प्रश्नाः सञ्जाताः।

12 ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत॥

अत्र तान् प्रश्नान् समाधत्ते। राजन्यः=क्षत्रियः। अर्थः स्पष्ट एव।

13 चन्द्रमा मनसो जातः, चक्षोः सूर्यो अजायत।
मुखादिन्द्रश्चाग्निश्च, प्राणाद्वायुरजायत॥

14 नाभ्या आसीदन्तरिक्षं, शीर्ष्णो द्यौः समवर्तत।
पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकानकल्पयन्॥

शीर्ष्णः=शिरसः; द्यौः=ऊर्ध्वलोकः; समवर्तत=अजायत; अकल्पयन्=असृजन्।

15 सप्तास्यासन् परिधयः त्रिः सप्त समिधः कृताः।
देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम्॥

सारः—अस्य यज्ञस्य परिधयः गायत्रीप्रमुखानि सप्त छन्दांसि आसन्। त्रिः सप्त=एकविंशतिः समिधः कल्पिताः। एवं अस्य यज्ञं तन्वाना देवाः पुरुषं पशुत्वेन अकल्पयन्।

16 यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः॥

अन्वयः—देवाः यज्ञेन यज्ञं अयजन्त। तानि धर्माणि प्रथमान्यासन्। यत्र पूर्वे साध्याः देवाः सन्ति तत् नाकं ते महिमानः सचन्ते।

सारः—अस्मिन् पुरुषसूक्ते प्रपञ्चितमाशयं संक्षिप्य कथयति। प्रजापतिप्राणरूपा देवाः मानसेन सङ्कल्पेन यज्ञस्वरूपं प्रजापतिं अपूजयन्त। तस्मात् पूजनात् तानि जगद्धारकाणि मुख्याणि धर्माण्यासन्। अथास्य सूक्तस्योपासनफलं कथयति। यस्मिन् विराट्प्राप्तिरूपे नाके पूर्वे साध्या देवाः सन्ति तं नाकं ते महात्मानः प्राप्नुवन्ति ये अस्य सूक्तस्योपासका भवन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[पुरुषसूक्तस्य सारोऽत्र संक्षिप्यते । अस्य प्रपञ्चस्य सृष्टिप्रक्रियैवात्र सूक्ते वर्ण्यते । आदिपुरुषः परमात्मा सर्वशक्तिसंपन्नः अस्मदिन्द्रियगोचरेऽस्मिन् ब्रह्माण्डे तथा तस्माद् बहिरपि अभिव्याप्य वर्तते । तस्य पदोंऽश एवायं विपुलो ब्रह्माण्ड-गोलः । परमात्मा आदिपुरुषः मायासहायः सन् स्वांशान् जीवान् उत्पादयामास । ते एव देवाः । ते पुनरपि सृष्टिप्रक्रियासु व्यापृता अभवन् । अस्मिन् सूक्ते यज्ञपदेन सृष्टिप्रक्रियैवोद्दिष्टा । अत्र प्रथम-चतसृषु ऋक्षु परामृष्टः पुरुष आदि-पुरुषः परमात्मा । शिष्टासु निर्दिष्टस्तु जीवात्मा इत्यवधार्यम् ।]

———

सह नाववतु, सह नौ भुनक्तु, सह वीर्यं करवावहै ।
तेजस्विनावधीतमस्तु, मा विद्विषावहै ॥

वेदाध्ययनारंभवेलायां अन्ते च गुरुणा शिष्यैश्च एकीभूय गीयमानमिदं समूहप्रार्थनागानं प्राचीनेषु गुरुकुलेषु सार्वत्रिकं प्रचारमविंदत । अयमस्यार्थः— नौ + अवतु । नौ गुरुशिष्यौ सह सममेव ईश्वरः अवतु = रक्षतु । शिष्यं विहाय गुरोः, गुरुं विहाय शिष्यस्य च रक्षा न प्रार्थनीयेति सहशब्दस्य तात्पर्यम् । अयमेव सह नौ भुनक्तु इत्यस्याप्यर्थः । एकस्यैवार्थस्य विभिन्नैः पदैराविष्कारः प्रार्थनाचमत्कारहेतुः भवति । सह वीर्यं करवावहै । गुरु-शिष्यौ आवां सहवर्तिनौ भूत्वा विद्यायाः प्रभावं प्रदर्शयावहै । नौ अधीतं जस्वि अस्तु । अधीतं = विद्या । गुरुशिष्ययोरावयोर्विद्या तेजस्विनीन भवतु । उषःप्रकाश इवोत्तरोत्तरं उज्वला भवतु इत्यर्थः । मा विद्विषावहै । यद्यपि गुतेरुशिष्ययोरावयोरभिप्राया व्यत्यस्ता भवेयुः तथापि तस्मात् कारणात् कदापि विद्वैषकलुषौ भवाव । गुरौ शिष्यस्य सैवतभक्तिर्भवतु । शिष्ये गुरोः सैवानुग्रह-बुद्धिश्च भवत्विति तात्पर्यम । आश्चर्यतोऽप्याश्चर्यं पावनतोपि पावनं उत्तमोत्तमं उज्वलोऽप्युज्ज्वलमिमं मन्त्रं मुकुलितहस्ताः पुलकितगात्रा निमीलितनेत्रा अभिन्न-कण्ठलयं पुनरपि पठित्वा दीक्षामिमामुपसंहराम ।

सह नाववतु, सह नौ भुनक्तु, सह वीर्यं करवावहै ।
तेजस्विनावधीतमस्तु, मा विद्विषावहै ॥

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ अभ्यासः ॥

I अस्मिन् दिने पठितानि ऋग्वेदसूक्तानि अनुवदत ।

II कस्मादपि पुराणात् अथवा काव्यात् दश पद्यानि स्वयं पठित्वा तेषां अन्वयमर्थं च लिखत ।

III कामधेनुपद्धतिमधिकृत्य वस्तुनिष्ठ(objective)अभिप्रायं संक्षिप्य लिखत ।

शुभं भूयात् ।

—०—

यत् करोमि यदश्नामि यज्जुहोमि ददामि यत् ।
यत्तपस्यामि सर्वात्मन् तत्तदस्तु त्वदर्पणम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समर्पणम्

शून्यं मे सकलं, यदस्ति भगवन् दत्तं समस्तं त्वया,
प्राप्तं यत् प्रतिभात्मकं दिनकरात् वृक्षात् पराराधनम् ।
वैशाल्यं जलधेः, गिरेरचलता, वायोः सदा जागृति-
स्तत्तत् पुष्टिमवाप्नुयादनुदिनं प्रीत्यै परेषां मयि ॥

बुद्ध्वा वाऽनवबुध्य वा प्रतिदिनं कुर्वे शतान्यागसा-
मन्तस्तान्यनुतापभारपरिणामान्युत्तुदन्ते मनः ।
त्रुट्यामि प्रदहामि निश्वसिमि च क्षुभ्यामि मुञ्चाम्यहं
बाष्पं, मां नय दीनरक्षक परार्थेषु प्रवृद्धां रतिम् ॥

तृष्णा मां तपति त्वदर्पणपरानर्थान् विधातुं सदा,
दुःखैकान्तफलः परन्तु गृहिणां बन्धश्चरीकर्ति माम् ।
नित्यं त्वत्करुणा मृदोर्मृदुतरा मां भाति, भित्त्वा कथं
मोक्ष्येऽहं चिरसक्तिरक्तिनरकाकारान्नु कारागृहात् ॥

कृत्याकृत्यविवेचनेष्वभिरुचिर्वर्धेत, सत्ये दृढा
वर्तेत क्षितपापकल्मषमषीशुद्धामनीषापि मे ।
अन्तर्मे परतत्त्वबोधनचणो दीपः सदा दीप्यताम्
अन्येषां भविकाय सन्तु सततं कर्माणि सर्वाणि च ॥

हस्तं प्रेरय मे त्वदर्चनविधौ, चित्तं परावर्तय
क्षुद्रेभ्यो ह्यविरामभीमपरिणाहिभ्यः सुखेभ्योऽनिशम् ।
नास्त्यन्यो मम देशिकोऽत्र सकलान्तर्यामिनं त्वां विहा-
यान्धोऽन्धैश्चरं चिरं धृतकरस्तेजोऽन्धतो मां नय ॥

—०—

9711

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

GURUKUL KANGRI LIBRARY

	Signature	Date
[illegible]		
Class on		
Cat on		
[illegible]		
Filing		
E.A.R.		
Any other		
Checked		

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ஆசிரியர்

சம்ப்ரதாய முறைப்படி ஸம்ஸ்கிருதத்தில் அடிப்படை தேர்ச்சி பெற்றார். இவர் தனது பத்தொன்பதாவது வயதில் தந்தை காலமானதும், இமாலயத்தை கடவுளின் இருப்பிடமாகக் கருதி ஒரு குருட்டு நம்பிக்கையில் கால்நடையாகவே செல்லக் கிளம்பினார். இவர் ரிஷிகேசத்தை அடைந்ததும், அங்கு இவருக்கு சுவாமி தபோவனத்துடன் தொடர்பு ஏற்பட்டது. அவரிடம், தான் ஸன்யாஸத்தை மேற்கொள்ள வேண்டும் என்ற எண்ணத்தை வெளியிட்டார். அதற்கு அந்த ஞானி, இவருடைய தாயார் காலமான பிறகு ஸன்யாஸ வாழ்வை மேற்கொள்ளலாம் என்று கூறி விட்டார். ஆகையால் தன் ஊருக்குத் திரும்பி தாயாருடன் வாழ்ந்து வந்தார். தனிப்பட்ட மாணவனாக ஸம்ஸ்கிருத பரீட்சையில் தேர்வு பெற்று, அதற்குண்டான "வித்வான்" பட்டத்தை பெற்று 1943 ம் வருஷம் முதல் ஆசிரியர் வேலையை மேற்கொண்டார். பிறகு திருமணம் செய்து கொண்டார். பல பள்ளிகளில் ஆசிரியர் தொழிலைச் செய்தார். 1959ல் "காமதேனு பத்ததி" என்னும் முறையை பின்பற்றலானார். இவர் ஸம்ஸ்கிருதத்தை பரப்ப நடத்தும் முயற்சிகளை கண்டு ஷோரனூர் உயர்நிலைப் பள்ளி நிர்வாகத்தினர் இவரை வேலையிலிருந்து நீக்கி விட்டார்கள். அதன் காரணமாகத் தான் 27 வருஷம் சேவை செய்த பலன்களையும் உதறி விட்டு வெளியேறினார். இதனால் மிகவும் மனம் தளர்ந்து, விரக்தி அடைந்த இவர் திருவனந்தபுரத்தில் இருந்த ஸ்வாமி அபேதானந்தரிடம் அடைக்கலம் புகுந்தார். ஸ்வாமியின் ஆசீர்வாதமே அவருக்கு ஒரு புது வாழ்வளித்தது.

அதிருஷ்டவசமாக திரு. ம. க. க. நாயர் (அப்போதைய நிர்வாக இயக்குனர், FACT) இவரை உத்யோக மண்டலத்தில் உள்ள ஐ.எஸ் சி. பள்ளியில் ஸம்ஸ்கிருத ஆசிரியராக நியமித்தார். அப்பள்ளியின் முதன்மை ஆசிரியரான திரு. க. ந. பி. நாயர், இவருக்கு எல்லா வகையிலும் தக்க ஊக்கமளித்தார். அந்த பள்ளி ஆங்கில போதனா முறையை பின்பற்றி வந்ததால், இவர் வேறு வழியின்றி வலுக்கட்டாயமாக ஆங்கிலத்தை கற்றுக் கொள்ள வேண்டிய நிர்ப்பந்தம் உண்டாயிற்று. மேலும் இந்த மொழி இவருடைய நடுத்தர வயது வரை ஒரு புதுமையான மொழியாகவே இருந்து வந்தது. ஒருவருட கால சேவைக்குப் பிறகு தன் தொழிலில் இவருக்கு ஒரு பிடிப்பு ஏற்பட்டது. பிறகு இவர் ஸம்ஸ்கிருத மொழியை மலையாள போதனா முறையிலிருந்து ஆங்கில போதனா முறைக்கு மாற்ற ஆக்க பூர்வமாக செயல் பட இறங்கினார். பிறகு இவரது தாயார் காலமானதும், குடும்பக் கட்டுகளிலிருந்து விடுபட்டு, பல வருஷங்களுக்கு முன் ஞானி சொன்னபடி ஆனார். பாரத வித்யா பீடத்தின் நிரந்தர அலுவலகத்தை தனது சொந்த ஊரான ஏரநல்லூரில் நிறுவினார். பிறகு ஏழு நீண்ட ஆண்டுகளுக்குப் பின், கேரள அரசாங்கம், இவர் ஸம்ஸ்கிருத மொழியைப் பரப்புவதற்காக செய்த சேவைதனை பாராட்டும் வகையில் ஓய்வு காலத்திற்குப் பிறகும் இவரைத் தொடர்ந்து வேலையில் நீடிப்பதற்கான உத்தரவை பிறப்பிக்கும் யோசனையை ஏற்றுக் கொள்வதாக அறிவித்தது. இப்போது இவர் : "காமதேனு அஞ்சல் வழி பாடமுறையை" பல மொழிகளிலும் பரப்ப வேண்டும் என்று தன்னை முழுமையாக அர்ப் பணித்து மேலும் இம்மொழியின் சாராம்சத்தை எவ்வளவு தூர தற்கால ரீதிக்கு எப்படி பரப்ப வேண்டும் என்ற நோக்கத்தை தனது குறிக்கோளாகக் கொண்டு செயல்பட்டு வருகிறார்.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar